म० म० वाचस्पति ग्रन्थावल्यां तृतीयं पुष्पम्

म० म० वाचस्पतिमिश्र-विरचित

आचारचिन्तामणिः

सम्पादकाः

१ डॉ० जयमन्त मिश्रः, २ पं० श्रीधर्मनाथ झा

३ डॉ० कृष्णानन्द झा, ४ डॉ० शशिनाथ झा

प्रकाशकः—

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः

दरभङ्गा

53

SV-2024

म० म० वाचस्पति ग्रन्थावल्यां तृतीयं पुष्पम्

म० म० वाचस्पतिमिश्र-विरचित

आचारचिन्तामणिः

सम्पादकाः

१ डॉ० जयमन्त मिश्रः, २ पं० श्रीधर्मनाथ झा

३ डॉ० कृष्णानन्द झा, ४ डॉ० शशिनाथ झा

प्रकाशकः—

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः

दरभङ्गा

सर्वाधिकारः सुरक्षितः

प्रकाशनवर्षः—१९८३ ई०, शाके १९०५

प्रथम संस्करणम्—१०००

मूल्यम्—३५) (पञ्चत्रिंशद् रूप्यकाणि)

JACL-KRC
001953

सम्पादकाः

१ डॉ० जयमन्त मिश्रः, —कुलपतिः।

२ पं० श्री धर्मनाथ झा,—सम्मानित-पण्डितः।

३ डॉ० कृष्णानन्द झा,—उपाचार्यः (व्याकरणे)।

४ डॉ० शशिनाथ झा,—प्रध्यापकः (व्याकरणे)।

प्रकाशकः

कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालयः

कामेश्वरनगरम्, दरभङ्गा

मुद्रकः—

श्री सुदर्शन प्रेस, दरभङ्गा

प्राक्कथनम्

अथायं प्रकाश्यते म० म० वाचस्पतिग्रन्थावल्यास्तृतीयपुष्परूप आचारचिन्तामणिनामा वाजसनेयिसदाचारग्रन्थः। इतः पूर्वं कृत्यप्रदीपः, श्राद्धचिन्तामणिश्च प्रकाशितौ। अग्रे कृत्यमहार्णव-द्वैतनिर्णय-शुद्धिचिन्तामणि-व्यवहारचिन्तामणि-पितृभक्तितरङ्गिण्याख्या ग्रन्था ग्रन्थावल्यामस्यां यथाशीघ्रं प्रकाशतां यास्यन्ति।

सुविदितमेवैतद् विदितवेदितव्यानां यदाचारस्य महत्त्वं सकलकर्मसु सर्वोपरि विद्यते। आचारपरायणस्य कान्तिरायुर्बलं यशश्च चकासतितमाम्। अतस्तस्य तत्त्व जिज्ञास्यते सर्वैः। तत्र 'परमगुरु' पदाङ्कितानां वाचस्पति-मिश्राणां प्रामाण्यं सर्वसम्मतमिति समेषां समुपकारः स्यादनेन ग्रन्थेन। एतत्प्रणीतग्रन्थानां महतीं समुपयोगितां समवलोक्य अस्माभिः ग्रन्थावली-प्रकाशन-योजना प्रारब्धा। सौभाग्यवशादेतत्प्रणीतग्रन्थानां हस्तलिखितपद्धतयोऽस्माकं विश्वविद्यालये सुप्राप्याः सन्ति। तदाधारेण सम्पादनपुरस्सरं प्रस्तुतं विद्वन्मूर्द्धन्य वाचस्पतिमिश्रकृतं ग्रन्थरत्नमिदं जायतां सदाचारवर्द्धनाय, जिज्ञासूनां जिज्ञासासमाधानाय, विवेकिनां ज्ञानाय, जगन्मङ्गलाय चेति शम्।

डॉ० जयमन्त मिश्रः
कुलपतिः
कामेश्वरसिंह-दरभङ्गासंस्कृत विश्वविद्यालयस्य

संस्कृतदिवसः
१९८३ ई०

विषय सूची

भूमिका	....	क–च
मङ्गलाचरणम्	....	१
प्रतिपाद्यविषयाः	....	१
सदाचारः	....	२
उद्बोधनम्	....	३
मैत्रकर्म (बाह्यक्रिया)	....	३
शौचम्	....	१०
आचमनम्	....	१६
दन्तधावनम्	....	३२
स्नानम्	....	३८
सन्ध्योपासनम्	....	७१
विभ्राट्सूक्तम्	....	९४
पुरुषसूक्तम्	....	९५
शिवसङ्कल्पसूक्तम्	....	९६
मण्डलब्राह्मणम्	....	९७
ब्रह्मयज्ञः	....	१००
तर्पणम्	....	१०१
तर्पणोत्तरकर्म	....	१२५
देवपूजा	....	१२९
पञ्चोपचाराः	....	१३७
सूर्यपूजा	....	१४०
दुर्गापूजा	....	१४५
शिवपूजा	....	१४६
विष्णुपूजा	....	१५७
अष्टाक्षरमन्त्रपूजा	....	१६७

विष्णोरपराधाः.... .... १७१
पञ्चमहायज्ञाः.... .... १७७
भोजनम्.... .... १९८
भोज्याभोज्यानि.... .... २१०
अभक्ष्याणि.... .... २१२
मांसभक्षणवर्जनयो विधिः.... .... २२१
पशुहिंसाविधि-त्यागौ.... .... २२३
भोजनोत्तर कर्म.... .... २२३
शयनविधिः.... .... २२५
दाराभिगमनम्.... .... २२६
रजस्वलानिरूपणम्.... .... २३२
दम्पत्योरभिगमानन्तरं शुद्धिः.... .... २३५
शुद्धिपत्रम्.... .... २३७

श्रीः

भूमिका

धर्मस्य मूलभूत आचार एवेति निश्चप्रचम्। आचारवान् एव कामपि सिद्धिं, कमपि यज्ञं, किमपि धर्मानुष्ठानं कर्त्तुं पारयति। इत्येतन्मूलकमेव 'आचारः परमो धर्मः', 'आचारहीनं न पुनन्ति वेदाः' इत्यादिवचनं प्रसिद्ध्यति'। शिष्टपरिगृहीतं शास्त्रानुगं तत्तद्देशीयमाचरणमेव आचार सदाचार प्रभृति-शब्देन व्यवह्रियते। तत्रापि मुख्यतो नित्यकर्मात्र आचारशब्देन गृहीतम्। प्रातरुद्बोधनकालतो रात्रौ शयनपर्यन्तं वाजसनेयिनां द्विजानां कर्त्तव्यकृत्यानां विवरणं प्रस्तुतग्रन्थे 'आचारचिन्तामणि' नामके म० म० वाचस्पतिमिश्रेण प्रतिपादितम्।

देशभेदेनाचारभेदात्, श्रुति-स्मृतिषु परस्परविरुद्धवचनोपलब्धेः, नाना-विदुषां विचारभेदाच्च धर्मशास्त्रोयकर्त्तव्यनिर्णये विद्वांसोऽपि मुह्यन्ति। अत-स्तत्र कस्यचन शिष्टजनस्य सर्वमान्यस्य निर्णय एव शरणम्। तत्र परमगुरुपद-भाजो महामहोपाध्यायस्य वाचस्पतिमिश्रस्य मान्यता धर्मवित्सु आर्येषु सर्वत्र प्रथिता एव। धर्मस्य प्रायः सकलेष्वङ्गेषु एतत्कृतनिर्णयो विद्यते। अतएव धर्मशास्त्रीय-वाचस्पति शब्देनायं प्रथितः।

आचारविषयक एतस्य निर्णयोऽद्यावधि अप्रकाशित एव आसीत्। अस्माकं विश्वविद्यालये एका एतद्ग्रन्थस्य हस्तलिखिता पुस्तकी उपलभ्यते। तदाधारेण प्रस्तुतं संस्करणं जातम्। सापि अशुद्धि बहुलैव, तथापि अस्माभिः शुद्धीकृत्य विदुषां पुरत उपस्थाप्यते।

ग्रन्थकृत्परिचयः

एतद्ग्रन्थप्रणेता म० म० वाचस्पतिमिश्रो वाचस्पतिरूपेणैव मान्यः। तथा च प्रसिद्धिः—

शङ्करवाचस्पत्योः शङ्करवाचस्पती सदृशौ।
पक्षधरप्रतिपक्षी लक्षीभूतो न च क्वापि॥ इति।

अयं हि मिथिलाजनपदान्तर्गत 'समौल' ग्रामकृतवास पञ्जी बन्धानुसारेण 'पलिवार-समौल' मूलग्रामको मैथिल मनीषी बभूव। पञ्जीप्रबन्धेऽयं महामहोपाध्याय-परमगुरुपदेनालङ्कृतो दृश्यते। मिथिलायां 'पल्ली' मूलका ब्राह्मणाः उपाध्यायोपनामका दृश्यन्ते। वाचस्पतिमिश्रस्य पिता गिरिपतिः सदुपाध्यायरूपेण स्मृतः। किन्तु एते त्रयो भ्रातरः तत्सन्ततयश्च सन्मिश्रपदेनालङ्कृता दृश्यन्ते। वस्तुतो मिश्रोपाधिरुभयाधिकरणवेत्तॄणां मीमांसकानां कृते प्रयुज्यते स्म।

पञ्जीप्रबन्धे दशमशताब्दीतो ब्राह्मणानां वंशपञ्जी उपलभ्यते। तदनुसारेण 'पल्ली' कुलस्य बीजी पुरुषो 'राउल भृगु'—नाम्ना उल्लिखितः। अत्र 'राउल' पदं 'राजुल' शब्दस्यापभ्रंशरूपः प्रतीयते यस्यार्थः कान्तिमान् योगी भवति। एतत्पौत्रो म० म० वररुचि आसीत् यस्य समयः १०५० ई० इति प्रतीयते। 'भागवमुहूर्त्त' नामक ज्योतिषग्रन्थः, 'प्रयोगसंग्रह प्रयोगविवेकाख्य' व्याकरणग्रन्थश्च अनेन प्रणीतौ। एतत्सन्ततिपरम्परा इत्थं बभूव—राउलभृगुः—अभिमन्युः—वररुचिः—देल्हनः—गङ्गदत्तः—धारेश्वर—वीरेश्वरः—महोपाध्यायो हलधरः, देवधरः, महो० लक्ष्मीधरः, (१२५० ई०) श्रीधर इति चत्वारो भ्रातरः। तत्र हलधरः—सौंसे—सदुपाध्यायो गिरिपतिः—म० म० परमगुरु वाचस्पतिमिश्रः—म० म० नरहरिमिश्रः—म० म० केशवमिश्रः—म० म० अर्जुनमिश्रः—महो० रघुपतिः—महो० भोजः—बोधनः—भवनाथः—प्रीतिनाथः (१८०० ई०)।

वाचस्पतिमिश्रस्य अग्रजो मिश्रशिवपतिः, अनुजश्च मिश्रकान्तः। एतस्य चत्वारः पुत्राः—(१) म० म० वेणीनाथः (एतत्पुत्रः महो० हर्षः) (२) म० म० रघुनाथः (एतत्पुत्रः महो० रामदेवः), (३) म० म० नरहरिः (एतत्पुत्राः म० म० माधवः, म० म० केशवः, म० म० नारायणः, म० म० विष्णुः। तत्र माधवसुतौ चिन्तामणिः, म० म० वर्धमानश्च।) (४) लक्ष्मीनाथः (गणिततत्त्वचिन्तामणिकारः)॥ पञ्जीप्रबन्धविषयकसकलसूचना पञ्जीकार श्रीहरिनन्दनझा महोदयतोऽधिगता।

म० म० वाचस्पतिमिश्रः (१४०० ई० १४७५ ई०) मिथिलेशस्य भैरवसिंहस्य (हरिनारायणाख्यस्य) सभापण्डित आसीत्। एतच्छिष्यो दण्डविवेक-

कारो विल्वाञ्चकवंशीयो वर्द्धमानो राज्ञो भैरवसिंहस्य धर्माधिकरणिक आसीत्।

नवमशताब्दीस्थित-द्वादशदर्शन-टीकाकृद् वाचस्पतिमिश्राद् भिन्नोऽयमिति निदर्शयितुं बहुधा एतन्नाम्ना सह 'स्मार्त्तः' 'अभिनवः' इत्यादिशब्दः प्रयुज्यते। एतत्समकालिका ग्रन्थकाराः म०म० शङ्करमिश्रः, म० म० पक्षधरमिश्रः, म० म० रुचिदत्तः, म० म० वर्द्धमान, म० म० रुचिपतिः इत्यादय आसन्।

म० म० वाचस्पतिमिश्रकृता ग्रन्थाः

प्रकाशिताः—

(१) श्राद्धचिन्तामणिः—वाराणसीतः १९१५ ई०, दरभङ्गा १९८३ ई०।
(२) तीर्थचिन्तामणिः कलकत्तातः, १९१२ ई०।
(३) कृत्यचिन्तामणिः— ,, १९२४ ई०।
(४) सम्बन्धचिन्तामणिः—आसामतः १९२८ ई०।
(५) शुद्धिचिन्तामणिः—वाराणीतः १९१४ ई०।
(६) विवादचिन्तामणिः—पटनातः, १९३७ ई०।
(७) व्यवहारचिन्तामणिः—वाराणसीतः १९१४ ई०।
(८) द्वैतनिर्णयः—दरभङ्गातः १९०१ ई०।
(९) कृत्यप्रदीपः— ,, १९८२ ई०।
(१०) आचारचिन्तामणिः—दरभङ्गातः १९८३ ई०।

अप्रकाशिताः—

ग्रन्थाः	हस्तलेखस्थानम्
१ शूद्राचारचिन्तामणिः	कलकत्ता
२ तिथिनिर्णयः	,,
३ महादाननिर्णयः	नेपालः
४ विवादनिर्णयः	,,
५ कृत्यमहार्णवः	दरभङ्गा
६ पितृभक्ति तरङ्गिणी	,,

७ शुद्धिनिर्णयः ,,
८ पितृतीर्थसंग्रहः ,,
९ कल्पलतोद्धारः ,,
१० प्रायश्चित्तचिन्तामणिः वाराणसी
११ दत्तकविधिः ,,

एतदतिरिक्ता अनेके ग्रन्था अनुपलब्धाः सन्ति, यतो हि पितृभक्तितरङ्गिण्यामनेन स्वयं स्वस्य ४० ग्रन्थाः निर्दिष्टाः।

प्रस्तुतसंस्करणं यथासंभवं संस्कृतमपि प्रकाशनत्वरादिकारणवशाद् बहुत्रुटिसकुलं जातम्। विशेषतः प्रथमपृष्ठाद् द्वादशपृष्ठं यावदसंस्कृतमेव विद्यते। तथापि जिज्ञासूनामौत्सुक्यशान्तिः स्यादनेन। एतदर्थं ग्रन्थान्ते शुद्धिपत्रं योजितं, विद्वद्भिः कृपया सशोध्यपठनीयम्। अग्रिमे संस्करणे एतद्दोषशान्तिः स्यात्।

आशासे अनेन संस्करणेन धर्मं जिज्ञासमानानां प्रमोदः स्यात्, स्याच्च सदाचारान्वेषिणां कर्त्तव्यबोधः, सदाचारप्रचारश्चेति।

संस्कृतदिवसः संवत् २०४०
स्नातकोत्तर व्याकरण भाषा विज्ञान विभागः, डॉ० शशिनाथ झा
का० सं०, द० संस्कृतविश्वविद्यालयः,
दरभङ्गा।

❀ श्री गणेशाय नमः ❀

आचारचिन्तामणिः

"आमीरदारक मुदञ्चितकिङ्किणीक-
माताम्रपाणि चरणं पुरुषं पुराणम् ॥
मञ्जीरमञ्जु मरुणाधर मम्बुजाक्ष-
मद्वैत चिन्मय मनादि मनन्तमीडे ॥१॥
अहोरात्राश्रितोधर्म इह वाजसनेयिनाम् ।
निबध्यते हरिन्नत्वा श्रीवाचस्पतिशर्म्मणा ॥२॥
उद्बोध मैत्रशौचानि तथाचमन कारणम् ।
हेतुर्द्विराचमेतद्व दपवाद स्तथाचमे ॥३॥
दन्तधावन कर्माथ प्रातः स्नानादिकन्ततः ।
मध्यन्दिने स्नान विधि स्ततोजपविधि ≍परः ॥४॥"
"तर्पणस्य विधिस्तद्वत्तर्पणोत्तर कर्म च ।
देवार्चनं महायज्ञ पञ्चकातिथि पूजने ॥५॥
भोजनस्य विधिश्चात्र भोज्याभोज्यविधिस्ततः ।
अभक्ष्य परिभाषा च मांस भक्षण वर्जने ॥६॥
पशुहिंसा विधित्यागौ भोजनोत्तर कर्म च ।
शयनस्य विधिस्तद्व द्वारोपगमने विधिः ।
प्रसङ्ग सङ्गति प्राप्तः पुष्पिताथाविधिस्ततः ॥७॥"

तत्र—विष्णुपुराणे—

"साधवः क्षीण दोषाःस्युः सच्छब्दः साधुवाचकः ।
तेषामाचरणं यत्स्यात्सदाचारः स उच्यते ॥"

विष्णुः—

श्रुतिस्मृत्युदितोधर्मः साधुभिर्यश्च सेवितः ।
तमाचारं निषेवेत धर्मकामो जितेन्द्रियः ॥

मनुः—श्रुतिस्मृत्युदितं धर्मं मनुतिष्ठन्हि मानवः ।
इह कीर्तिं मवाप्नोति प्रेत्य चाप्युत्तमं सुखम् ॥
आचाराल्लभते ह्यायुराचारा दीप्सिताःप्रजाः ।
आचारादृन मक्षय्यमाचारो हन्त्यलक्षणम् ॥

अलक्षणम्—अशुभसूचक मङ्गचिह्नन्तत्सूचितं-
चा धर्ममजनित फलमेवाचारो नाशयति ।

तथा— "सर्वलक्षणहीनोऽपि समुदाचार वान्नरः ।
श्रद्दधानोऽनसूयश्च शतंवर्षाणि जीवति ॥"

हारीतः—

"आचारः प्रथमोधर्म इतिवेदविदोविदुः ।
नह्यनाचारिणोलोकान् प्रवदन्ति मनीषिणः ॥

भारते— यस्यनोत्क्रामतिमतिर्द्धर्माचारानुसारिणी ।
तमाहुः पुण्यकर्माणं मशोच्यं मित्रबान्धवैः ॥
सोपानभूतं स्वर्गस्य मानुष्यंप्राप्यदुर्लभम् ।
तथात्मानं क्षमादद्यान्नभस्येत यथापुनः ॥"

अथाचारविशेषाः। मनुः—

"ब्राह्मेमुहूर्त्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थ मेव च॥"

ब्राह्मोमुहूर्त्तः—पञ्चदशधा विभक्ताया रात्रेश्चतुर्दशो भागः। तन्मूलान्—धर्मार्थोत्पादनमूलान्। वेदतत्त्वार्थमिति। तत्त्वपदं कुयुक्तिप्रतीतवारणार्थम्।

भारते— "प्रक्षाल्यपादौ हस्तौ च मुखञ्च सुसमाहितः।
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः॥"

अयमर्थः—वस्त्रान्तरे परिधाय पादहस्तनेत्रमुखानि प्रक्षाल्य द्विराचमेत्।

अथमैत्रं तत्रापस्तम्बः—

'मुत्र पुरीषेकुर्याद्दक्षिणां दिशं: दक्षिणापरांवा गत्वैतिशेषः। दक्षिणापरा—नैर्ऋती। इदं शयनस्थानापेक्षया, इदञ्च दूरेकार्यम्। नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुव' इति विष्णुपुराणात्।

यमः— "कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम्।
विण्मुत्रञ्च गृहीकुर्या द्यद्वाकर्णे समाहितः॥"

कर्णे चोपवीत धारणम् एकवस्त्रत्वपक्षे यद्येकवस्त्रो यज्ञोपवीतं कर्णेकृत्वा इति शांखायन गृह्यते। बौधायनः—शुष्कतृणमयज्ञियं काष्ठं लोष्टं वा तिरस्कृत्याहोरात्रयो रुदग्दक्षिणा मुखः प्रावृत्योच्चरेदबमेहेत वा। तिरस्कृत्य-अपानाधो घृत्वा-अवमेहेत-मूत्रं त्यजेत।

हारीतः—

घ्राणास्ये वेष्टयित्वा मृद्धात्रीं ग्रीवायामासज्यदक्षिणे बाहुपार्श्वे कमण्डलुमाधायोत्सृजेत्। मृद्धात्री—मृत्तिकापात्री-उत्सृजेत् पुरीषमितिशेषः।

"मनुः— "मूत्रोच्चार समुत्सर्गन्दिवाकुर्यो दुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथादिवा ।
तिरस्कृत्यो चरेत्काष्ठं पत्रं लोष्टं तृणानि वा ।
नियम्य प्रयतो वाचं सम्वीताङ्गोवगुण्ठितः ।

प्रयतः, शुचिः वाचं नियम्येत्यन्वयः । संवीतं-निमींतंसंवीतं मानुषमिति तैत्तिरीयश्रुतेः उद्यम्याङ्गे समम्वीताङ्गः ।

यमः—

"प्रत्यङ्मुखस्तु पूर्वाह्णेऽपराह्णे प्राङ्मुखस्तथा ।
उदङ्मुख स्तु मध्याह्ने निशायां दक्षिणामुखः ।'

देवलः— "सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः ।
विण्मूत्रं विसृजेन्नित्यं सन्ध्यासु परिवर्जयेत् ।"

अत्रचेयं व्यवस्था—रात्रौ दक्षिणामुखः त्रिमुहूर्त्तात्मके प्रातःकाले ददङ्मुखः तदनन्तरं पूर्वाह्णेप्रत्यङ्मुखः, मध्याह्णे उदङ मूखः अपराह्णे प्राङ्मुखः सायाह्ने दक्षिणामुखः अयज्ञिय शुष्कतृणकाष्ठाद्युपरि मूत्रोच्चारौकुर्यात्, सन्ध्ययोश्च नैव कुर्यात् । यदि वा पीड़ावशात्-तदाउदङ्मुख एव । एवमेव-छन्दोगाह्निकादयः ।

आपस्तम्बः—

अस्तमिते, वहि ग्रामादाराच्चावसथान्मूत्र पुरीषयोः कर्म विवर्जयेत् । आवसथात् —गृहात्, आरात् समीपे मूत्रादि वर्जयेत् । अस्तमिते तु ग्रामाद्वहिर्वर्जयेदित्यर्थः । यद्वा-आराद्दूरे ग्रामाद्गृहाच्चरात्रौ मूत्रादि वर्जयेदित्यर्थः ।

मनुः—

"छायायामन्धकारे वा रात्रावहनि वा द्विजः ।
यथामुख मुखः कुर्यात्प्राणबाधकृच्छ्रमितिः ॥"

"श्वश्मृगाल खरैर्दष्टो स्यैःक्रव्याद्भि रेव च।
नरा श्चोष्ट् वराहै, श्च प्राणायामेन शुद्ध्यति।"

न च दंशाभिशापौ निषिद्धौ तयोगतः। प्रवृत्यभावेन निषेधस्यानुपपत्तेः। दश्यमानाभिशप्यमानयो स्तत्तत्कर्मत्वेना कर्तृत्वात्। न च तौ क्षतादिवत् पूर्वोत्पन्न दुरितसूचकौ पापोदक प्रकरणे पाठात्।

क्षतादीनान्तु ज्योतिरागमेसूचकप्रकरणेपाठात्। अथेन्द्रियार्थप्रसङ्गम्विनापि दंशाभिशापौ दृश्येते। तथा महर्षे र्मांशुव्यस्य, चौराभिशाप पूर्वं शूलेनिपातनम्। तथा लक्ष्यसंख्यजनरक्षितस्यापि परीक्षितस्य तक्षकेण भक्षणम्। अतः कथं तत्कार्यत्वं तयोरपि पूर्वकृतेन्द्रियार्थप्रसङ्ग जनिताभिशापोत्पन्नत्वात्।

अतस्त्रिविधं पापकारगम्। एतेन यद्गोतमेनोक्तं शिष्टस्याक्रियाप्रतिषिद्ध सेवनमितिद्वैविध्यं प्रायिकत्वेन नरइत्यनेन ब्राह्मणादिचाण्डालानां सर्वेषां पापं दर्शयति। अस्ति च चाण्डालादीनामपि विधिर्निषेधश्च। देवलः— स्वजातिशोधनं सर्वजनप्रणाम स्तितिक्षा व्यवहारसिद्धि रपरापमानं स्वभृत्य पोषणं प्रधानकर्मणोविवर्जनमिति चाण्डालधर्मः।

मनुः— "गवार्थे ब्राह्मणार्थे वा प्राणत्यागोन्नपस्कृतः।
स्त्रीबालाद्युपपत्तौ च बाह्याणां शुद्धिकारणम्।
अतो वेदार्थव्यवहारिणामेव प्रायश्चित्तानुष्ठानम्।
न चाण्डालदीनामिति प्रत्युक्तम्।

अथ पापकर्मफलनिवृत्तिः।

मनुः— "शुभाशुभफलंकर्म मनोवाग्देह सम्भवम्।
कर्मजा गतयोनृणा मुत्तमाधममध्यमाः।
मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम्।
वाचा वाचाकृतं कर्म कायै रेवच कायिकम्।"

हारीतः—यस्मिन् यस्मिन् वयसि यः करोति शुभाशुभानि तस्मिन् तस्मिन् वयसि शारीरवाचिकमानसान्याप्नोति ।

याज्ञवल्क्यः—

"अनन्ताश्च यथाभावा शरीरेषु शरीरिणाम् ।
रुपाण्यपि तथैवेह सर्वयोनिषु देहिनाम् ।
विपाकः कर्मणांप्रेत्य केषाञ्चिदिह जायते ।
इहचामुत्रचैकेषां भावस्तत्र प्रयोजनम् ।"
रुपाण्यन्ध कृष्णत्वादीनि प्रयोजनं प्रयोजकः ।
अशुभकर्मणां देहत्रितय प्राप्ति यथाक्रममुक्ता ॥

विष्णुधर्मोत्तरे—

"तत्क्षणादेव गृह्णाति शरीरमातिवाहिकम् ।
उद्ध्वं व्रजन्ति भूतानि त्रीण्यस्मात्तस्य विग्रहात् ।"

तथा— "आतिवाहिक संज्ञोऽसौ देहोभवति भार्गव ।
केवलं तन्मनुष्याणां नान्येषां प्राणिनां क्वचित् ॥
तथा-प्रेतपिण्डैस्ततोदत्तैर्देह माप्नोति भार्गव ।
भोगदेहमिति प्रोक्तं क्रमादेवन संशयः ।
प्रेतपिण्डान दीयन्ते यस्यतस्य विमोक्षणम् ॥
श्मशानिकेभ्योदेवेभ्य आकल्पं नैवविद्यते ।
तत्रास्य यातनाघोरा शीतवाता तपोद्भवा ॥
ततः सपिण्डीकरणे वान्धवैः सकृतेनरः ।
पूर्णे संवत्सरेदेह मतोऽन्यं प्रतिपद्यते ।
ततः सनरकेयाति स्वर्गे वा स्वेनकर्मणा ।"

तत्क्षणात्— मृत्युक्षणादित्यर्थः। शरीरञ्च पूर्वदेह सत्यन्तगतिमत्। यथा—मार्कण्डेयपुराणम्—

"वाय्वनुसारितद्रूपं, देहमन्यत्प्रपद्यते।
तत्कर्मजं पतनात्वे न माता पितृसम्भवम्।"

तत्प्रमाण वयोवस्थानंस्थानं प्राग्भवं यथाकर्मानुरूपं तत्कालं तत्तन्नरकाननुभूय तिर्यगादिशरीरंप्राप्य पापकर्मणा. तत्तल्लक्षणोपेतं मनुष्यशरीरं प्राप्नोति।

यथा विष्णुः—

अथ नरकाननुभूत दुःखनीति तिर्यक्त्व मुत्तीर्णानां मनुष्ये लक्षणानि सन्ति। कुष्ठयतिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तः। स्वर्णापहारी कुनपो गुरुतल्पगो दुश्चर्मेत्यादि।

तथा मनुः—

"एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः।
जड़मूकान्ध वधिरा विकृताकृतयस्तथा॥"

तथा— सुवर्ण चौरः कौनख्यं सुरापः श्यावदन्तताम्।
ब्रह्महाक्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः॥

तथा— "न मूत्रं पथिकुर्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां नच पर्वते।
न जीर्ण देवायतने न वल्मीके कदाचन।
न स सत्त्वेषु गर्त्तेषु न गच्छन्नापि च स्थितः॥"
न नदीतीर मासाद्य नच पर्वतमस्तके।
वाय्वग्नि विप्रानादित्य मपापश्यं स्तथैवगाः।

न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनम् ॥"

चित्यां - चितायाम्। अग्निचयस्थाने वा स्थितः। ऊर्द्ध्वं पर्वत निषेधेनैव, तन्मस्तक निषेधेसिद्धे, पुनर्निषेधोऽशक्य परीहारेपि पर्वते मस्तक-परोहारार्थं वायुपदेन वाय्वागमनदेशोलक्ष्यते, वायोरदृश्यत्वात्। हारीतः— न चत्वरोपद्वारयोः मूत्रपुरीषे कुर्यात्। न तीर्थे न सस्यपूर्णे न यज्ञभूमौ न यज्ञियानां वृक्षाणा मधस्तात्। चत्वरं—नानाजनस्थानम्। उपद्वारं द्वारसमीपं तीर्थं - पुण्यतीर्थं, घटो वा।

देवलः—

"वापी कूपनदीगोष्ठ चैत्याम्भः पथिभस्मसु।
अग्नौ काम्ये स्मशाने वा विण्मूत्रं न समाचरेत्।"

वाप्यादिपदं तीरपरम्। अम्भसः पृथगुपादानात्। चैत्यो - ग्रामोपलक्षको वृक्षः। काम्यो—रमणीय प्रदेशः।

यमः— "नगगोमय भस्मानि फालकृष्टानि वर्जयेत्।
तथा— तुषाङ्गार कपालानि देवतायतनानि च।
राजमार्गं स्मशानानि क्षेत्राणि च खलानि च।
उपरुद्धो न सेवेत छायां दृश्यञ्चतुष्पथम् ॥
उदकञ्चोदकान्तञ्च पन्थानञ्च विवर्ज्जयेत्।
वर्ज्जयेद्वृक्ष मूलानि चैत्यश्वभ्र विलानि च।

उपरुद्धो - विण्मूत्रवेग पीड़ितः। न सेवेत, तत्त्यागार्थं मितिशेषः।

पथि प्रतिषेधेपि विशिष्य राजपथ चतुःपथ प्रतिषेधो दण्डार्थः। दृश्यमनावृतं, श्वभ्रं —स्वतोविदीर्ण भूभागः।

हारीतः—

"आहारश्चरहः कुर्यान्निर्हारश्चैव सर्वशः।
युज्यते च श्रियागुप्तैः प्रकाशैर्मुच्यतेश्रिया ॥"

आहारो—भोजनं निर्हारो—मैत्रम्। वशिष्ठः—नोप्तेन शाद्वलोपजीव्यच्छायासु, उप्तं—कृतवपनम्। शाद्वलो—हरितस्निग्ध भूभागः उपजीव्य च्छायापान्थाद्युपजीव्यच्छाया।

विष्णुः—

"नोषरे न पराशुचौ नोद्यानोदक समीपयोर्नाकाशे।"

पराशुचौ—परोच्चाराद्युपहते स्थाने। आकाशे—अट्टालिकादौ। आपस्तम्बः-छायायां मूत्रपुरीषयोःकर्म विवर्ज्जयेत्। स्वान्तरमेहेत स्वांछायाम् अतोऽन्यदीय छायासु प्रतिषेधः।

गौतमः—

नवाग्न्वग्नि विप्रादित्यापोदेवता गाश्च प्रतिपश्यन् मूत्र पुरीषामेध्यान्युदस्येत्। देवताः—शिवादि प्रतिमाः। अमेध्यानि - श्लेष्मादीनि।

यमः— **"प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत्।**
दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणांस्तथा।
प्रत्यादित्यं प्रत्यनलं प्रतिगाञ्च प्रतिद्विजम्।
प्रतिसोमं प्रतिजलं प्रतिसन्ध्ये च नित्यशः॥
हन्ति मेहयतः प्रज्ञां प्रतिपन्थान मेव च।
मेहयन्ति यएतेषु ते भवन्ति गतायुषः॥"

प्रत्यादित्यम्—आदित्यसम्मुखं यथास्यादेवं मेहयतोमूत्रोच्चारंत्यजतः। आदित्यः प्रज्ञां हन्तीत्यर्थः। एवमुत्तरेष्वपि।

विष्णुपुराणे—

"तिष्ठेन्नाति चिरं तत्र नवा किञ्चिदुदीरयेत्।"

तदयं संक्षेपः। ब्राह्मे मुहूर्त्ते विबुध्य स्वस्थमानसोधर्मादिकार्यं विचिन्त्य शयनादुत्थाय रात्रिवासस्त्यक्त्वा वाससी परिधाय नेत्रे मुखञ्च प्रक्षाल्य द्विरा-

चामेत्। ततो यदि वेगीस्यात्तदा नैऋत्यां दक्षिणस्यां वा दिशि गृहादिषु विक्षेपपर्यन्त देशमतीत्य-रात्रौ ग्रामाभ्यन्तरे गृहसमीपेऽपि पथि भस्मगोव्रज फालकृष्ट वोजितनस्य पूर्णक्षेत्रखल श्मशान शाद्वल महावृक्षतल यज्ञवृक्षतल वृक्षमूलोषर परा शुच्युद्यानोदक समीप चतुष्पथतुषाङ्गार कपाल देवगृह गोष्ठ गोमय वह न्याकाशचत्वरोपद्वार शुभ्रबिल यज्ञभूमि वल्मीक जलचिति पर्वत पर्वत मस्तक जीर्णदेवायतनमसत्वगर्त्तकरीषात्यन्त नदीनिकट पल्वलोपजीव्यच्छाया-वर्जमकाम्यस्थाने संवृतेऽयज्ञियानार्द्र काष्ठपत्र तृणान्यतमं लोष्टवेणुदल मृण्मय भाण्डं वाऽस्तीयं एकवासाश्चेत्कर्णे यज्ञसूत्रं निधायः, द्विवासस्तु उत्तरीयेण शिरो नासिकाञ्चप्रावृत्य कण्ठासक्त यज्ञसूत्रं पृष्ठेनिधाय मौनी गो वाय्वग्नि विप्र-जलादित्यानपश्यन् गोसन्ध्याग्निसूर्यचन्द्र जलस्त्रीपथि यिप्रवाय्वनभिमुखः प्रातः सङ्गव मध्याह्नापराह्णसायाह्नभेदैः पञ्चधाविभक्तस्याह्नः प्रातर्मध्याह्ने सन्ध्ययोश्चउदङ्मुखः सङ्गवे पश्चिमाभिमुखः सायाह्ने रात्रौ च दक्षिणामुखो-ऽपराह्णे प्राङ्मुखोभयादौयथामुखमुखो ग्रीवासक्त मृत्पात्रीको दक्षिणकरधृत कमण्डलुरनुपानत्कः शुचिरासीनो मूत्रपुरीषे कुयात्।

अथशौचम्। हारीतः—

लोष्टेन प्रमृजीत शुष्ककाष्ठेन वा। लिङ्गगुदे इतिशेषः। न पर्ण लोष्टाश्मभि र्मूत्रपुरीषापकर्षणं कुर्यात्।

व्यासः— "नाश्ममूल फलाङ्गारै रुन्मृज्यान्नास्थिबर्हिषा।

लोष्टविधि रितर द्रव्यालाभे।

देवलः— अशौचान्नोत्सृजेच्छिष्टं प्रस्रावोच्चारयोः स्वयम्।

अशौचाच्छौं च पर्यन्तम।

याज्ञवल्क्यः—

"गृहीत शिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः।

गन्धलेपक्षयकरं शौचंकुर्यादतन्द्रितः ॥"

अतन्द्रितोऽनलसः। गन्धेति एतच्च कृष्यन्तर विहितसंख्याभ्यनुज्ञानार्थम्-अतो गन्धलेप क्षयादेव शुद्धिः। संख्यानियमस्तु दृष्टार्थमिति व्याख्यात मनादेयम्।

"न्यूनाधिकं न कर्त्तव्यं शौचं शुद्धि मभीप्सता।
प्रायश्चित्तेन युज्येत विहिताति क्रमेकृते ॥"

इति दक्षवचनात्। एतच्च संख्या परिमाणोभय विषयकअविशेषात्।

ब्रह्मपुराणे –

"उद्धृतोदकमादाय मृत्तिकां चैव वाग्यतः।
उदङ्मुखो दिवाकुर्यां द्रात्रौचे दक्षिणामुखः ॥"

शौचमितिशेषः।

"स्वनिर्णिक्ते मृदन्दद्यान्मृदन्तेत्वप एव च।"

स्वनिर्णिक्ते – केवल जलक्षालिते पाद्यादौ।

देवलः—

"धर्मविद्दक्षिणंहस्त मधःशौचेन योजयेत्।
वामेनपाणिनातद्व न्नाभेरूर्द्ध्वं न शोधयेत्।
प्रकृतिस्थितिरेषास्यात् कारणादुभयक्रिया।"

कारणात्—रोगादेः।

मनुः— "एकालिङ्गे गुदेतिस्रः तथैकत्र करेदश।
उभयोः सप्तदातव्या मृदः शुद्धि मभीप्सता।"

एकत्र—वामे।

"तिस्रस्तु मृत्तिकाः देयाः कृत्वातु नखशोधनम् ।"

अत्र च प्रकृतत्वाद्धस्तयोरिति मन्तव्यम् ।

ब्रह्मपुराणे—

"पादयोर्द्वे गृहीत्वा च स्वप्रक्षालित पाणिमान् ।
द्विराचम्य ततः शुद्धः स्मृत्वाविष्णुं मनातनम् ।।"

रदश्चोभयं मूत्रमात्रोत्सर्गे । मैत्रेतु मनूक्तं मैत्रेऽपीदं, लेपशङ्कायान्तु, मनूक्तमित्यन्ये । तत्रापि-पादयोः प्रत्येकं तिस्रः ।

"तिस्रस्तु पादयोर्देयाः शुद्धिकामस्यनित्यशः ।"

इति शङ्खवचनात् । अत्रापि वामहस्तेपृष्ठे षट् दशमध्ये षट्पृष्ठ इति हारीत वचनात् ।

यत्तु—ऋष्यन्तराणामधिकाधिकमृदभिधानं तद्गन्धलेपाद्यनुवृत्तौ, यथालिखितन्त्वावश्यकमेव । स्त्री शूद्रानुपनीतानान्तु, गन्धलेपक्षयकरमेव शौचम्, नतु मृत्संख्यानियमोपि ।

तदाह देवलः—

"यावतामन्यते शुद्धिं तावच्छौचं विधीयते ।
प्रमाणं द्रव्यसंख्या वा नशिष्टे रुपदिश्यते ।।"

गन्धलेपक्षयाद्वा प्रयतोभवतीति पैठीनसिवचनमपि तत्परम् । अन्यथा—मनुविरोधः स्यात् । मृत्सामान्य परिमाणन्तु—

"मृत्तिकातु समाख्याता त्रिपर्वीपूर्यते यया ।"

इति शङ्खवचनाज्ज्ञेयम् ।

त्रिपर्वी तर्ज्जनीमध्यमानामिकानां तिसृणां चरमंपर्व अङ्गुष्ठपर्वमात्रापि मृत्तिकाग्राह्या इति छन्दोगाह्निकम् ।

दक्षः— "दातव्य मुदकं तावद्यावत्स्यान्मृत्तिकाक्षयः ।"

गुदमृत्तिकायां दक्षः—

"अर्द्धप्रसृति-मात्री तु प्रथमा मृत्तिका स्मृता ।
द्वितीया च तृतीया च तदर्द्धं परिकीर्तिता ॥"

लिङ्गे त्वाह स एव—

"लिङ्गेप्यत्र समाख्याता त्रिपर्वी पूर्यते यया ।"

संख्यामुक्त्वा मनुः—

"एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
त्रिगुणन्तु वनस्थानां यतीनाञ्च चतुर्गुणम् ॥"

तथा — "यद्दिवा विहितं शौचं रात्रौ तस्यार्द्धमिष्यते ।
तदर्द्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि ॥"

इदञ्चाष्टमांशं शौचमतिकान्तारे । आपस्तम्बः—

"अहि शौचं यथाप्रोक्तं निश्यर्द्धन्तत्तदिष्यते ॥
पथि पादस्तु विज्ञेय आर्त्तःकुर्याद्यथाबलम् ॥"

सर्वश्चायं ह्रासो यथोक्तकरणाशक्तावेव, नतु—निशार्त्तादि पुरस्कारेणैव वाक्यस्यादृष्टार्थतापत्तेः ।

विष्णु पुराणे -

"वल्मीक मूषकोत्खातां मृदमन्तर्ज्जलान्तथा ।
शौचावशिष्टाङ्गेहाच्च नादद्याल्लेप सम्भवाम् ।
अन्तः प्राण्यविपन्नाश्च हलोत्खातान्नराधिप ॥
परित्यजेन्मृदस्त्वेताः सकलाः शौचसाधने ॥"

अन्तः प्राण्यवपन्नां सकीटाम्।

यमः—

"आहरेन्मृत्तिकां विप्रः कूलात्ससिकतां तथा।
नाखूत्कृष्टान्न वल्मीकान्न पांशोर्न्न च कर्द्दमात्॥
न मार्गान्नोषराच्चैव मृदं गृह्णीत बुद्धिमान्॥"

विप्रइति शौचकर्तृमात्र उपलक्षकम् बुद्धिमानित्युपसंहारात्। आखूत्कृष्टात्—मूषकोत्करात्।

स्मृति मञ्जूषायाम—

"वापीकूप तड़ागेषु नाहरेत्तीर मृत्तिकाम्।
अन्तर्ज्जलगता ग्राह्याः परतोमणिवन्धनात्॥"

इति वचनादन्तर्ज्जलगता अपि मृदो ग्राह्या इति केचित्।

दक्षः— "सुधाद्रव्येण शुद्धिः स्यान्न क्लेशो न धनक्षयः।
यस्य शौचेऽपि शैथिल्यं तस्य चित्तं परीक्षितम्॥"

सुधाद्रव्यं—सुलभद्रव्यं मृज्जलादिकम्।

ऋष्य शृङ्गः—

"यस्मिन् स्थाने कृतं शौचं वारिणा तद्विशोधयेत्।
न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्॥"

कमण्डलु मार्जनम् गोमयेन मृदा वा कमण्डलु परिमृज्येदिति हारीतवचनात्। साम्भसा गोमयेन मृदा वा तत्काम्यम्। तदयमत्र प्रयोगः—शुष्ककाष्ठेन, तदलाभे लोष्ठेन, तदलाभे भस्मास्थिशर्करापत्रमूल फलाङ्गार वर्हिस्सद्यश्छिन्नौषधिवर्जमन्येनापि। लिङ्ग-गुदे परिमृज्य गृहीतशिश्न उत्थाय उद्धृ-

तोदकं मृत्तिकाश्चान्तर्जलां गृहलेप मूषिकोत्कर कर्द्दमपांशु वल्मीक वर्त्मसम्बन्धि-हलोत्खातपरशौचावशिष्टाऽशुचिदेशस्थान्तःप्राण्यवकीर्णव्यतिरिक्तां ससिकता-मादाय दिवोदङ्मुखो रात्रौ दक्षिणामुखो मौनी आसीन आदौ लिङ्गं केवलजलेन प्रक्षाल्य अङ्गुली त्रिपर्वीपूरिकया मृदा मृत्भयपर्यन्तं उदकेन प्रक्षाल्य, ततो गुदं जलमात्रेण प्रक्षाल्यार्द्धप्रसृतिमितया मृदा तत्क्षयपर्यन्त मम्भसात् प्रसृति-चतुर्थांशमितया मृदा पुनस्तथैव द्विः प्रक्षाल्य,

वामकरं केवल जलेन प्रक्षाल्य तत उत्थाय अधरीयं वासः परिधाय उपवीतो भूत्वा वामहस्तं दशभिः पृष्ठं षड्भिः वामदक्षिणहस्तौ मिलितौ सप्तभिः मृद्भिः प्रक्षाल्य हस्तयोर्नखान् तृणादिना संशोध्य तौ मृत्त्रयेण प्रक्षाल्य दक्षिण-पादं मृत्त्रयेण ततो वामपादं मृत्त्रयेण प्रक्षालयेत्।

छन्दोगस्तु आदौ वामपादं -

हस्तादि मृत्तिकात् त्रिपर्वी पूरिका अङ्गुष्ठपर्वमात्री वा। आर्द्रामलकमिता वा।

आर्द्रामलक मानेन कुर्याद्धोम हविर्बलीन्।
प्राणाहुति बलिश्चैव मृदं गात्र विशोधनम्॥"

इति परिशिष्टटीका। मूत्रोत्सर्गे तु एकालिङ्गे वामकरे तिस्रः, कर-योर्द्वे पादयोः प्रत्येकमेकैकेति। ततस्तत्स्थानं वारिणा प्रक्षाल्य दलान्तरं तत्र कृत्वा यथाविधि द्विराचम्य विष्णुं स्मृत्वा दिवा सूर्ये रात्रौ चन्द्रमग्निं वा पश्येदिति।

तत्र मूत्रपुरीषष्ठीवनादिषु, पुनरुपस्पृशेदिति शंखवचनादत्र द्विराचम-नम्। तत्र देवलः—

"प्रथमं प्राङ्मुखः स्थित्वा पादौ प्रक्षालयेच्छनैः।
उदङ्मुखो वा दैवत्ये पैत्रिके दक्षिणामुखः॥"

शनैः अत्वरम्।

"इत्येवमद्भिराजानु प्रक्षाल्य चरणौ पृथक्।
हस्तौ चामणिबन्धाभ्यां पश्चादसीत संयतः।"

याज्ञवल्क्यः—"अनुजानु शुचौ देशे उपविष्ट उदङ्मुखः।
प्राग्ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥"

मरीचिः—"ईशानाभिमुखो भूत्वा उपस्पृशेद्यथाविधि।"

हारीत -प्रांङ्मुख-उदङ्मुखः प्रागुदङ्मुखो वा उपविश्यान्तरुर्वीररत्नीकृत्वा त्रिरपोहार्द्धं पिवेत्। प्राङ्मुख उदङ्मुख ईशानाभिमुखो वा नित्यमाचामेदिति वत्तलार्थः।

गोभिलः—

उदग्भुग्नेरुत्सृप्य प्रक्षाल्य पाणीपादौ चोपविश्य त्रिराचामेद् द्विः परिमृजीत पादावभ्युक्ष्य शिरोभ्युक्षेदिन्द्रियाण्यद्भिः संस्पृशेद्दक्षिणी नासिके कर्णाविति।

भविष्ये—

"घनाङ्गुलिकरं कृत्वा एकाग्रः सुमना द्विजः।
समौ च चरणौ कृत्वा तथा बद्धशिखो नृप॥"

आचामेदित्यन्वयः।

नरसिंहपुराणे—

"दक्षिणन्तु करं कृत्वा गोकर्णाकृतिवत्पुनः।
त्रिः पिबेद्वीक्षितं तोयमास्यं द्विः परिमार्जयेत्॥"

गौतमः—आमणिबन्धात्पाणी प्रक्षाल्य वाग्यतो हृदयस्पृशः त्रिश्चतुर्वा अप आचामेत्। त्रिचतुर्वेति भावशुद्ध्यपेक्षया विकल्पः।

मनुः—

"ब्राह्मेण विप्रस्तीर्थेन नित्यकाल मुपस्पृशेत्।
काय त्रैदशिकाभ्यां वा न पित्र्येण कदाचन॥"

कायादि विधानं ब्रह्मावरोधे द्रष्टव्यम्।

हारीतः—आमणिबन्धात्पाणी प्रक्षाल्य दक्षिणचरणाङ्गुष्ठे पाणिमवश्राव्य खानि स्पृशेत्। एतन्मते शेषे इन्द्रियस्पर्शः।

याज्ञवल्क्यः—

"कनिष्ठादेशिन्यङ्गुष्ठ मूलान्यग्रं करस्य तु।
प्रजापति पितृब्रह्म दैवतीर्थान्यनुक्रमात्॥"

देशिनी—तर्ज्जनी।

देवलः—

"द्विजस्त्वङ्गुष्ठ मूलेन द्विः प्रमृज्यात्ततोमुखम्।
ततः कृत्वाङ्गुलिस्पर्शं दृग्घ्राणश्रोत्रनाभिषु॥
मूर्द्धानश्चरणौ चाद्भिः संप्रोक्ष्याथ शुचिर्भवेत्॥"

एवञ्चेन्द्रिय स्पर्शानन्तरं मूर्द्धनश्चरणयोश्च प्रोक्षणं सिद्धयति। दृगुपक्रमकश्च स्पर्शश्छन्दोगपरः।

गोभिलसंवादात्—दक्षः—

"संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्।
संहृत्यतिसृभिः पूर्वमास्यमेव मुपस्पृशेत्॥"

तिसृभिः—तर्ज्जनी मध्यमानामिकाभिः।

मुखं संवृत्य प्रमृज्यादित्यन्वयः। उपस्पृशेदित्यत्रापि संवृत्येत्यनुषज्यते।

आचान्तः पुनराचामेद्वासो विपरिधाय च। ओष्ठौ संस्पृश्य च तथा यत्र स्यातामलोमकाविति वशिष्ठेन मिल्लोमपर्यन्तयोरोष्ठयोः स्पर्शनिषेधात्।

आपस्तम्बः—

त्रिरोष्ठौ परिमृजेद्द्विरित्येके। सकृदुपस्पृशेद्दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेन्द्रियाण्युपस्पृशेत। सकृदिति। ओष्ठावित्यनुषङ्गः। उपस्पृशेत्—उप समीपे स्पृशेदित्यर्थः। तेन श्यावो परिलोमोदयादधः स्पृशेदित्यर्थः।

एतन्मते ओष्ठस्पर्शं स्ततो वामपाणि पादद्वयशिरसां प्रोक्षणं, तत इन्द्रिय स्पर्शः।

"अङ्गुष्ठेनप्रदेशिन्या घ्राणं पश्चादनन्तरम्।
अङ्गुष्ठानामिकाभ्याञ्च चक्षुः श्रोत्रे पुनः पुनः॥
नाभिङ्कनिष्ठाङ्गुष्ठेन हृदयन्तु तलेन वै।
सर्वाभिश्च शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत्॥"

पुनः पुनरिति। चक्षुर्द्वय श्रोत्रद्वयाभिप्रायेण।

तेनैकं चक्षुः स्पृष्ट्वाऽपरं चक्षुः स्पृशेत्। एवं श्रोत्रे अपि, अत्र चक्षुषी श्रोत्रे नासिके सकृदुपस्पृशेद्द्विरित्येके। इति कामधेनुलिखितापस्तम्ब वचनेनैकत्रैव नासापुटादौस्पर्शनद्वयं केचिदाहुः। प्रदेशिनी—तर्ज्जनी।

व्यासः—

"ततः स्पृशेन्नाभिदेशं पुनरपश्च संस्पृशेत्।"

नाभिस्पर्शनानन्तरं हस्तप्रक्षालनं कार्यमित्यर्थः। घ्राणस्पर्शस्तु नासापुटद्वये।

"तर्जन्यङ्गुष्ठ योगेन स्पृशेन्नासापुटद्वय"–

मिति शङ्खवचनात्।

पैठीनसिः—

"स्पृष्ट्वा प्राणान्यथासंख्यं पादौ प्रोक्ष्य ततः शुचिः।"

सव्ये च पाणौ शेषा अपो निनयेत् इति। श्रोत्रवन्दमानन्तरं किञ्चिज्जलं वामे पाणौ दद्यादित्यर्थः। फलमाह शङ्खः–त्रिः प्राश्नीयाद्यदम्भस्तु प्रीतास्तेनास्यदेवताः। ब्रह्मा विष्णुश्च रुद्रश्च भवन्तीत्यनुशुश्रुम।

"गङ्गा च यमुना चैव प्रीयेते परिमार्जनात्।
"नासत्य-दस्रौप्रीयेते स्पृष्टे नासापुटद्वये।
स्पृष्टे लोचनयुग्मे तु प्रीयेते शशि-भास्करौ।
कर्ण-युग्मे तथा स्पष्टे प्रीयेते अनलानिलौ।
स्कन्धयोः स्पर्शनादेव प्रीयन्ते सर्वपर्वताः।
मूर्द्धे संस्पर्शनादस्य प्रीतस्तु पुरुषोऽभवत्॥"

पुरुषः—परमात्मा।

पैठीनसिः—

प्रदेशिनी—वायुः। अनामिका—सूर्यः। कनीनिका—मघवा। अङ्गुष्ठः—अग्निः। तस्मादेभिः स्पृशेदिति तात्पर्यम्।

देवलः—

"न गच्छन्न शयानश्च न चलन्न परान् स्पृशन्।
न हसन्नैव संजल्पन् आत्मानञ्चैव वीक्षयन्॥"

चलन्—कम्पमानः। आत्मानं—हृदयं, वीक्षयन्निति स्वार्थेणिच्।

तथा— "केशान्नीवीमधःकायमस्पृशन् धरणीमपि ।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत्करम् ।"

अधःकायं—नाभेरधः । गच्छदादिनाचामेदितिवर्त्तुलार्थः ।

"अशब्द मनवस्राव मबहिर्ज्जानु बुद्बुदम् ॥"

अशब्द मित्यादि चतुर्ष्वपि यथा स्यादेवमाचामेदित्यर्थः ।

एवं द्वितीयाचमनेपि, तच्च द्विराचमने साङ्गमावर्त्तते ऽदृष्टार्थत्वात् । न तु पादप्रक्षालनमपि दृष्टार्थत्वात् इन्द्रिय स्पर्शानन्तरम् ।

भविष्यपुराणे—

"यद्भूमावुदकं वीर समुत्सृजति मानवः ।
वासुकि प्रमुखान्नागांस्तेन प्रीणाति नित्यशः ॥
"विना यज्ञोपवीतेन तथा मुक्तशिखो द्विजः ।
अप्रक्षालित पादस्तु आचान्तोऽप्यशुचिर्भवेत् ॥
बहिर्जानु रुपरुपृश्य एकहस्तार्पितैर्ज्जलैः ।
सोपानत्कस्तथा तिष्ठन्नैव शुद्धिमवाप्नुयात् ॥"

देवलः—

"सोपानस्को जलस्था वा मुक्तकेशोऽपि वा द्विजः ।
उष्णीषीवापि नाचामेद्वस्त्रेणावेष्टय वा शिरः ॥
न शौच वर्षधाराभि राचामेद्वेदतत्वविद् ॥"

गोभिलः—"जानुभ्यामूर्द्ध्वमाचम्य जले तिष्ठन्न दुष्यति ।
ताभ्यामधः तथा तिष्ठन्नाचामेच्च विचक्षणः ॥"

याज्ञवल्क्यः -

"परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी भवेत् ।
धर्मे कर्मणि विद्वद्भिः वर्जनीया प्रयत्नतः ॥"

कक्षा – पश्चादञ्चलं, वहिर्निवद्धेत्यन्वयः । प्राप्तद्वयमित्यन्ये ।

शाट्यायनः—

"दानमाचमनं होमं भोजनं देवतार्चनम् ।
प्रौढ़पादो न कुर्वीत स्वाध्यायं पितृतर्पणम् ।
आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा ।
कृतावशक्तिको यश्च प्रौढ़पादः स उच्यते ॥"

प्रचेताः—

नानन्त्रवांसा नाश्रु कुर्वन्नचामेध्ये, अनन्तर्वांसा अधोवस्त्रशून्यः ।
गोभिलः -नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम् ।

मरीचिः -

"न बहिर्जानुस्त्वरया नासनस्थो न चोत्थितः ।
न पादुकास्थो नाचित्तः शुचिः प्रयतमानसः ।
उपस्पृश्य द्विजो नित्यं शुद्धःपूतो भवेन्नरः ।
भुक्त्वासनस्थोऽप्याचामेन्नान्यकाले कदाचन ॥"

व्यासः -

"शिरः प्रावृत्यकण्ठो वा मुक्तकच्छ–शिखोपि वा ।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचि र्भवेत् ।
अपः पाणि–नखाग्रेण आचामेद्यस्तु ब्राह्मणः ।
सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥"

ब्रह्माण्डपुराणे—

"कण्ठं शिरो वा प्रावृत्य रथ्यापणगतोऽपि वा ।
अकृत्वा पादयोः शौचमाचान्तोप्यशुचि भवेत् ॥"

आपणः - क्रयविक्रयभूमिः । बौधायनः पादप्रक्षालनाच्छेषेण नाचामेद् यद्वाचामेद्भूमौ प्लावयित्वाऽऽचामेत् । उच्छेषेण, शेषेण प्लावयित्वा आस्राव्य ।

आपस्तम्बः—

न वर्षधाराद्याचामेत्. तथा न प्रदरोदकेन तप्ताभिश्चाकारणात् । प्रदरः—स्वयं विदीर्णो भूभागः । अकारणात्—रोगादिकं विना । न तप्ताभिराचामेत् । अप आचामेदित्यनुवृत्तौ—

वसिष्ठः—

प्रदरादपि या गोस्तर्पण समर्थाः स्यु र्न वर्णरसदुष्टा याश्च स्युरशुभागमाः । वर्णरसदुष्टाः—द्रव्यान्तरसंसर्गेण दूषितवर्णरसाः । अशुभागमाः—निन्दितदेशादायान्तीः एताः उभयोरपि नाचामेत् । गोतर्पणीस्तु साधीयसीराचामेदिति ।

विष्णु-याज्ञवल्क्यौ—

"हृत्कण्ठ तालुगाभिस्तु यथासंख्यं द्विजातयः ।
शुद्ध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरन्ततः ॥"

अन्ततो अन्तरवयवेन, तेनापां भक्षणं विवक्षितम् ।

"त्रिराचामेदपः पूर्वं द्विः प्रमृज्योत्ततोमुखम् ।
शारीरं शौचमिच्छन् हि शूद्रश्चैव सकृत् सकृत् ॥"

इति मनुवचनेन शूद्रे सकृद्भक्षणस्य स्फुटविधानात्—इति कल्पतरुकारादयः।

अन्ततः– ओष्ठप्रान्तेन, उत्तरोत्तरमपकर्षादिति पारिजातः। द्विजातिपदं त्रैवर्णिकमात्रपरम्। तेनानुपनीतानामपि तेषामुपनीतवदाचमनकल्पः। शूद्रश्चेति मनुवचनेन जातिपुरस्कारेणैव सकृदाचमनविधानात्। एवञ्च स्त्रीशूद्रयोराचमने सिद्धे स्त्री शूद्रो वाथ नित्याम्भःक्षालनाच्च करौष्ठयोरिति यद् ब्रह्मपुराणवचनं तदाचमनस्वरूपजलाभावे बोद्धव्यम्। अन्तत इत्यस्यान्तरवयवेन तालुनेत्यर्थः।

अत्र चकारादनुपनीतपरिग्रहः। तथा च तालुस्पर्शिनीभिरद्भिः। सकृदाचान्ताभिः स्त्रीशूद्रवदुपनीतस्यापि शुद्धिरिति मिताक्षराकारः। आचामेदित्यनुवृत्तौ।

शङ्खलिखितौ उद्धृत परिपूताभिरद्भिरवेक्षिताभिरक्षताभिरफेणाभिरबुद्बुदाभिर्न्न शूद्राशुचैकपाण्या वर्जिताभिः। शूद्रेणाशुचिना एकपाणिना वा आवर्ज्जिताभिः हस्ते दीयमानाभिः—स्वयं चाऽशुचिना एकपाणिना वर्ज्जिताभिरद्भिराचमनमविरुद्धम्।

तथा च—कमण्डल्वधि बौधायनः—

मूत्र-पुरीषे कुर्वन् दक्षिणहस्ते गृह्णाति सव्य आचमनीयम्। आचमनीयमाचमनविधिं कुर्वन्, सव्यहस्ते कमण्डलं गृह्णातीत्यर्थः। तेनाचमने—वामकरावर्ज्जितत्वमभिमतम्। अन्यथा—तद्धारणस्यादृष्टार्थतापत्तेः।

आचमनविद्धयनन्तरं देवलः—

"रेतो मूत्रशकृन्मोक्षे भोजनेऽध्वपरिश्रमे।
शौचमेवंविधं प्रोक्तमीषच्चान्यत्र वर्त्तते॥"

एवंविधं यथोक्त सकलाङ्ग सम्पन्नम् इयत् आचमनमात्रमपि इन्द्रिय-स्पर्शादि रहितं त्वरादिवशादन्यत्र शुद्धये भवतीत्यर्थः। तदित्थमाचमनकल्पः। बद्धशिख उपवीती, प्राङ्मुख उदङ्मुख ऐशान्याभिमुखो वा आजानु क्षालित-पादयुग्म आमणिबन्धं क्षालित हस्तद्वयो येन केनापि सिद्ध द्विवासस्त्वः अन्तरु-र्वोररत्नीकृत्वा शुचौ देशे अप्रसारित समस्थित पादयुगः सुमना स्तन्मनाः प्रणतो भूमिष्ठपादोऽनासनस्थो भुक्त्वासनस्थोपि अजलस्थो जानूद्ध्र्वंजले तिष्ठन् वा अनपावृतशिरः कण्ठः केशनीव्यधःकायधरणीरस्पृशन् तत्स्पर्शे तु क्षालितहस्तः अजल्पन्नहसन्नप्रौढ़पादः कमप्यस्पृशन्नचलन क्वचिदप्यनावर्जितदेहः दिश आत्मानञ्चानवलोकयन्नवथ्यास्थोऽत्वरो वामहस्तास्पृष्ट सफेलमविरसमदु-र्गन्धि अवुद्बुदं शूद्रा शुच्यैकपाण्यनावर्जितं वर्षधारातिरिक्तं न पदक्षालनशेषं, तच्छेषञ्चेत्तदा भूमिश्रावितार्ग्रं अग्निप्रोक्षणार्थं-जलशेषातिरिक्तं हस्ताना-लोलितमप्रहरप्रभवं प्रहरप्रभवमपि गोतृप्तिक्षममतप्तं रोगिणां तप्तमपि।

अकलुषं वोक्षितं घनाङ्गुलिना गोकर्णाकृतिना दक्षिणहस्तेन त्रिश्चतुर्वा-ब्राह्मेण क्षतादिना तदवरोधे कायेन तदवरोधे दैवेन तीर्थेन ब्राह्मणो हृद्गाभिः, क्षत्रियः कण्ठगाभि र्वैश्यस्तालुगाभि र्जलमाचामेत्। शूद्रः सर्वैव च स्त्रीमुखा-भ्यन्तर प्राप्तिक्षमं, यथोक्तमेवजलं सकृदाचामेत्। ततः संवृत श्यावान्ताधरौ-ष्ठं मुखमङ्गुष्ठमूलेन द्विः परिमृज्य पाणिं प्रक्षाल्य तर्जनी-मध्यमानामिकाभि-स्तादृशमेव मुखमोष्ठे श्मश्रुतोधः श्यावादुपरि द्विरुपस्पृश्य पुनः पाणिं प्रक्षाल्य वामपाणिं पादौ शिरश्चाभ्युक्ष्य तर्जन्यङ्गुष्ठाभ्यां सोदकाभ्यां नासापुटे।

ततोङ्गुष्ठानामिकाभ्यामक्षिणी, छन्दोगश्चेत्तदादावक्षिणी इति विशेषः। परिमार्जनोपस्पर्शनयो र्मध्ये पाण्याद्यभ्युक्षणमिति विशेषः। ततो-ङ्गुष्ठानामिकाभ्यां सोदकाभ्यां श्रोत्रे, ततः कनिष्ठाङ्गुष्ठाभ्यां नाभि स्पृष्ट्वा पाणिं प्रक्षाल्य करतलेन हृदयम्। सर्वाङ्गुलीभिः शिरो अङ्गुल्यग्रेणांसद्वयं स्पृशेत्, ततः शेषं जलं किञ्चिद्वामहस्ते देयमिति। इदमाचमनं द्विराचमने पाद-क्षालनवर्ज्जमखिलमावर्त्तते। दक्षिणारत्निमात्र रन्त रुर्वोःकार्यम्।

तथा भोजनोपक्रमाचमने सकृदेवौष्ठस्पर्शः। तथा द्विजातीनामपि पुनराचमने ओष्ठजल स्पर्शमात्रं प्रत्युपस्पृश्याचान्तः शुचिर्भवतीति गोभिल-गृह्यसूत्रादिति केचित्।

अथाचमननिमित्तानि। मनुः—

"विण्मूत्रष्ठीवने ऽभ्यङ्गे तथा पादावसेचने।
उच्छिष्टस्य च सम्भाषादशुच्य-प्रयतस्य च।
सन्देहेषु च सर्वेषु शिखां मुक्त्वा तथैव च।
बिना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत्॥"

सन्देहेषु आचमन निमित्तस्य आचमनस्य च, विना यज्ञोपवीतेनेत्यनेन यज्ञोपवीतत्याग आचमननिमित्ततयोक्तः। तथा उष्ट्र-वायस-संस्पर्शे दर्शने चान्त्यवासिनाम्, अन्त्यवासिनोत्र चाण्डालाः।

योगि याज्ञवल्क्यः—

"रौद्रे पित्र्या सुरान् मन्त्रां स्तथाचैवाभिचारिकान्।
व्याहृत्यालभ्य चात्मानं अपस्पृष्ट्वान्यदाचमेत्॥"

आत्मानमालभ्य हृययं स्पृष्ट्वा स्वं स्तुत्वा वा अपस्पृष्ट्वा, आचम्य।

विष्णुः—

"सुप्त्वा क्षुत्वा च मुक्त्वा च भोजनाध्ययनेप्सुभिः।
पीत्वा स्नात्वा च निष्ठीव्य वासो विपरिधाय च।"

रथ्यामाक्रम्य कृतमूत्रपुरीषः पञ्चताखास्थ स्नेहं स्पृष्ट्वाचामेत्। चाण्डाल म्लेक्ष संभाषणे च—ब्रह्मपुराणे—

"क्षुते श्लेष्मपरित्यागेऽधीते वा भक्षिते सति।

अघवर्णस्य संभाषे सुप्ते वा दन्तधावने ॥
आचम्य प्रयतो भूत्वा ततः शुद्धो भवेन्नरः ॥"

धीत इति धेटपाने इत्यस्य रूपम् अघवर्णोत्र चाण्डालादिः ।

देवलः—

"विशेषशौचं वक्ष्यामि भोजनोच्चार कर्मणोः ।
सामान्येन हि निर्दिष्टः सर्वत्राचमनक्रमः ।
उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं वापि तथाविधम् ।
तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुद्ध्यति ॥

तथाविधमुच्छिष्टंम् । तथाः-यदम्भः शौचनिर्मुक्तं क्षितिं प्राप्य विनश्यति ।
प्रक्षाल्याशुचि लिप्तं च स्पृष्ट्वा चाचम्य शुद्ध्यति ॥

तेन तदार्द्रम्भूमिं स्पृष्ट्वाऽशुचि लिप्तञ्च स्पृष्ट्वा प्रक्षाल्याचम्य शुद्ध्यतीत्यर्थः ।

आपस्तम्बः—मूत्रं कृत्वा पुरीषं वा मूत्र पुरीषानुलेपानुच्छेषणलेपान् रेतसश्च ये लेपास्तान् प्रक्षाल्य पादौ चाचम्य प्रयतो भवति । अनुलेपानुद्वर्त्तनादि लेपान् । तथाच —मूत्रपुरीषोद्वर्त्तनादिलेपानुच्छिष्टलेपान् शुक्रलेपांश्च, प्रक्षाल्य पादौ च प्रक्षाल्य आचम्य च शुद्ध्यतीत्यर्थः ।

तथा सुप्ते क्षुवथौ सिंहाणिकायाश्चालम्भे केशानामग्ने गवां ब्रह्मणस्य स्त्रियाश्चलम्भे महापथं गत्वाऽमेध्यं चोपस्पृश्याप्रयतश्च मानुषं नीवीञ्च परिधाय अप उपस्पृशेत् । आर्द्रम्वा शकृदोषधीं भूमिम्वा । क्षुवथुः—क्षिक्का ।

सिंहाणिका नासाश्लेष्म, अश्रु नेत्रजलम्, महापथो-राजमार्गः, नीवी वसनग्रन्थिः, शकृदिह गोशकृत् । तेनैतेषु निमित्तेष्वाचामेत् । तदसम्भवे आर्द्रगोमयं वा आर्द्रौषधीम्वा, आर्द्रम्भूमि म्वा स्पृशेदित्यर्थः । गो ब्राह्मणाग्निस्पर्शे तु यदाचमनं तद्विशेष विहितेतर विषयम् ।

बौधयनः—

नीवीं विश्रम्य परिधायोपस्पृशेद् वार्द्रतृणं भूमिं गोमयं वा। आपस्तम्बः-रिक्तपाणि र्व्वयस उद्यम्य अप उपस्पृशेत्। शक्ति विषये न मुहूर्त्तमप्यप्रयतः स्यान्नग्नो वा नाप्स्वंशतः प्रयमणं विद्यते-उदीर्याचामेत्। रिक्तपाणिः-लोष्टादि शून्यहस्तः। वयसे—पक्षिणे. उद्यम्यपाणिं प्रयमणं प्रायत्तं शौचमिति-यावत्।

यमः—

"उदीर्योदकमाचम्य अवतीर्य उपस्पृशेत्।
एवं स्याच्छ्रेयसा युक्तो वरुणश्चैव पूजितः॥"

अवतीर्य—जलं प्रविश्य जलमित्यनुवृत्तौ हारीतः—नोत्तरेदनुपस्पृश्य। उत्तरेत्—सन्तरेत्।

पैठीनसिः—अन्तरुदक आचान्तोऽन्तरेव शुद्धो भवति—वहिरुदक आ-चान्तो वहिरेव शुद्धो भवति। तस्मादन्तरेकं वहिरेकञ्च कृत्वा पादमाचामेत्। सर्वत्र शुद्धो भवति।

सम्बर्त्तः—"चर्मारं रजकं वेणं धीवरं नटमेव च।
एतान् स्पृष्ट्वा नरो मोहादाचामेत्प्रयतोपि सन्॥"

पराशरः—

"क्षुते निष्ठीविते चैव दन्तश्लिष्टे तथानृते।
पतितानाञ्च संभाषे दक्षिणं श्रवणं स्पृशेत्॥
प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा।
विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत्॥
आदित्यो वरुणः सोमोऽग्नि र्वायुस्तथैव च।
विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः॥"

अयञ्च कल्प आचमनासम्भवे, दक्षिणकर्णस्पर्शानुवृत्तौ शातातपः—

"वातकर्मणि निष्ठीवे दन्तश्लिष्टे तथानृते ।"

मार्कण्डेयपुराणे—

"कुर्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् ।
कुर्वीतालम्भनं वापि दक्षिण-श्रवणस्य च ॥

'यथाविभवतो ह्येतत् पूर्वाभावे ततः परम् ।
अविद्यमाने पूर्वस्मिन् उत्तरप्राप्तिरिष्यते ॥"

आपस्तम्बः—श्यावान्तपर्यन्तावोष्ठावुपस्पृश्याचामेत्। न स्मश्रुभिरुच्छिष्टो भवत्यन्तरास्येसद्भि र्यावन्नोपस्पृशति। य अस्याद्विन्दवः पतन्त उपलभ्यन्ते तेष्वाचमनं विहितम्। ये भूमौ न तेष्वाचामेदित्येके। श्यावान्तपर्यन्तौ विलोमकौ पतन्तः स्वाङ्गेष्वितिशेषः।

अथ द्विराचमननिमित्तानि। आपस्तम्बः—भोक्ष्यमाणस्तु प्रयतोपि द्विराचामेत् - द्विः परिमृजेत् - सकृदुपस्पृशेत्। एतच्चाङ्गुलीत्रयेण यदोष्ठयोः सकृत् स्पर्शनं तद् भोक्ष्यमाणस्यैव। अन्यथा—तु सकृद्द्विर्वेति व्यवस्था।

शंखः—मूत्र पुरीष ष्ठीवनादिषु, शुक्तवाक्याभिधाने च पुनरुपस्पृशेत्। शुक्तं - परुषम्।

पैठीनसिः—कलिल काशश्वासागमे रथ्या-चत्वर-श्मशानाक्रान्तेष्वाचान्तः पुनराचामेत्। कलिलं—कठिनश्लेष्म, श्वासोत्र विकृतो व्यायामादिना, चत्वरं—भूतवलिस्थानम्।

याज्ञवल्क्यः—

"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेद् वासो विपरिधाय च ॥"

द्विराचमनानन्तरं विष्णुस्मरणम्।

"द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्।"

इति ब्रह्मपुराणात्। यत्तु—कमण्डलुमुपस्पृश्य प्रक्षाल्य पाणिपादौ चाचम्येशानं मनसा ध्यायेदिति शंखवचनं, तत्रापोशानपदं—योगाद्विष्णुपरम्। एकमूलककल्पनालाघवादिति।

अथाचमनापवादः। तत्र पराशरः :—

"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने।
कर्मस्थ एषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्॥"

आपस्तम्बः—न स्मश्रुभिरुच्छिष्टो भवत्यन्तरास्ये सद्भि यावन्न हस्तेनोपस्पृशति। न स्मश्रुगतो लेपः। अशौचायेति शेषः।

गौतमः—

दन्तश्लिष्टे दन्तवदन्यत्र जिह्वाभिमर्षणात्। प्राक्च्युतेरित्यैके। च्युते चाम्रारवद्विद्यान्निगरन्नेव तच्छुचिः। दन्तलग्नमशौचजनकं न भवतीत्यर्थः। इदञ्चानुपलभ्यमान रसविषयम्।

"दन्तवद्दन्तलग्नेषु रसवर्जमिति"

शंख वचनात्।

अन्यत्रेति जिह्वास्पृष्टं त्वशौचायेत्यर्थः। इदन्तु शक्योद्धारण विषयं नत्वन्यत्र, तदुक्तं—देवलेन—

"भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत्।
दन्तलग्नमसंहार्यं लेपं मन्ये तदन्तवत्॥
न तत्र बहुशः कुर्यात् यत्नमुद्धरणे पुनः।
भवेदशौचमत्यर्थं तृणवेधात् तृणे कृत इति।"

प्राक् तैरित्यशक्त्योद्धरणविषयम्। च्युते चेत्याद्यनुपलभ्यमान-रस-विषयम्।

पैठीनसिः—

भूमिगत विन्दवः परामृष्टा पूता विप्रुषः शुद्धाद्विलोम क्लिन्नेष्वाचमेत्, भूमिगता-उच्छिष्टादिजलकणाः स्पृष्टा अपि न स्युरशौचाय। ततोपि क्षुद्रा अङ्गेपि पतिता नाशौचाय। रोमद्वयक्लेदका स्त्वङ्गे लग्नाः सकृदाचमन निमित्तानीत्यर्थः।

मनुः—

"स्पृशन्ति विन्दवः पादौ य आचामयतः परान्।
भूमिगैस्ते समाज्ञेया न तैरुपहतो भवेत्॥"
"मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च।
नोच्छिष्टस्तु भवेद्विप्रो यथा ते वचनं तथा॥"

अप्स्वित्यपोशान विषयं प्राणाहुतिसाहचर्यात्। अन्यथोदकपाने पीत्वाप इत्यादिनाचमनविधानात्।

शातातपः—

"दन्तलग्ने फले मूले भक्ष्ये स्नेहे तथैव च।
ताम्बूले चेक्षुखण्डे च नोच्छिष्टो भवति द्विजः॥"

फले—कटुतिक्तकषाये शिष्टाचारात्। भक्ष्ये—फलमूलभिन्ने, तादृश्यैव जातीकोशादौ। एतेषु दन्तलग्नेषु उपलभ्यमानरसेष्वपि। नाप्रायत्त्यमित्यर्थः। तथा चाचमननिवृत्तौ—

लघुहारीतः—

"कषायकटु ताम्बूल मुक्तस्नेहाङ्गलेपने।"

सामानाधिकरण्येनान्वयः ।

वशिष्ठः—

"प्रचरन्नव्यवहार्येषु उच्छिष्टं यदि संस्पृशेत् ।
भूमौ निधाय तद्द्रव्यमाचम्य प्रचरेत्पुनः ॥"

उच्छिष्टपदेनेहाचमनार्होच्छिष्टविवक्षा न तु स्नानार्होच्छिष्टे, केवलाचमनविधानानुपपत्तेः ।

शङ्खः—द्रव्यहस्त उच्छिष्टो निधायाभ्युक्ष्य द्रव्यं, एतदप्यभ्यवहार्यविषयम् ।

मनुः—

"उच्छिष्टे नतु संस्पृष्टो द्रव्यहस्तः कथञ्चन ।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥"

एतत्त्वभ्यवहार्येतरद्रव्यहस्तविषयमिति विश्वरूप-भर्तृयज्ञौ ।

तथा च बृहस्पतिः—

"प्रचरंश्चानुपानेषु यदोच्छिष्टमुपस्पृशेत् ।
भूमौ निधाय तद्द्रव्यमाचम्य प्रचरेत्पुनः ॥
अरण्ये तूदके रात्रौ चौरव्याघ्रोकुले पथि ।
कृत्वा मूत्रं पुरीषंवा द्रव्यहस्तो न दुष्यति ॥
शौचन्तु कुर्यात्प्रथमं पादौ प्रक्षालयेत्ततः ।
उपस्पृश्य तदभ्युक्ष्य गृहीतं शुचितामियात् ॥"

इति द्रव्यहस्ते—गृहीतद्रव्यः । द्रव्यपदमत्रासंकुचितमस्तस्यापि ग्राहकम् ।

आपस्तम्बः –

"कृत्वा मूत्रं पुरीषन्तु द्रव्यहस्तः कथञ्चन ।
भूमावन्नं प्रतिष्ठाप्य कृत्वा स्नानं यथाविधि ।
तत्संयोगात्तु पक्वान्नमुपस्पृश्य ततः शुचिः ॥"

पक्वान्नमपि तत्पुरुष संयोगाच्छुचीत्यर्थः ।

वायुपुराणे—

"प्रक्षाल्यपादौ निःक्षिप्य आचम्याभ्युक्षणं पुनः ।
पुष्पादीनां तृणादीनां प्रोक्षणं हविषान्तथा ॥"

निःक्षिप्य द्रव्यं भूमौ निधाय ।

बौधायनः –

तैजसं चेदादायोच्छिष्टी स्यात्, तद्वदस्याचम्यादास्यन्नद्भिः प्रोक्षेत्, स चेदन्येनोच्छिष्टी स्यात्तद्वदस्याचम्यादास्यन्नद्भिः प्रोक्षेत् । अथ चेदद्भिरुच्छिष्टी स्यात्तद्वदस्यादास्यन्नद्भिः प्रोक्षेत् । एतदेव विपरीतममत्र वानस्पत्ये तु विकल्पः । अन्येनोच्छिष्टी अन्येनोच्छिष्टेन स्पृष्टः । अद्भिराचमनः जलपानादौ, एतदेवेति-आदानापेक्षं चात्र वैपरीत्यम्-उदस्य त्यक्त्वा, आचम्य-प्रोक्ष्य पुनस्तद् गृह्णीयादित्यर्थः ।

अथ दन्तधावनम् । दक्षः—

"उषः काले तु सम्प्राप्ते शौचं कुर्याद्यथार्थवत् ।
ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम् ॥"

उषःकालः सन्ध्यातः पूर्वं, प्राची प्रकाशवान् ।

याज्ञवल्क्यः—"शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः ।
प्रातः सन्ध्यामुपासीत दन्तधावन पूर्विकाम् ॥"

अत्र स्नाने सन्ध्याञ्च दन्तधावनं नाङ्गम्।

"मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः।
तस्मात्सर्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥"

इति वृद्ध शातातपेनाचमनवत् स्वतन्त्रस्यैव शुद्धि हेतुतयाभिधानात्। अतएव दन्तान् प्रक्षाल्य स्नायादिति छन्दोगपरिशिष्टेप्यारम्भणी यावत्कालार्थ एव संयोगो न त्वङ्गाङ्गिभावः।

भारते –

"तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम्।
क्षीरिणो वृक्षाद् गुल्माद्वा भक्षयेद्दन्तधावनम् ॥"

गुल्मा—अस्कन्धा मल्लिकादयः।

नरसिंह पुराणे –

दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम्।
सर्वकण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥
खदिरश्च कदम्बश्च करञ्जश्च वटस्तथा।
तिन्तिणी वेणुपृष्ठश्च आम्रो निम्बस्तथैव च ॥
अपामार्गश्च बिल्वश्च अर्कश्चोदुम्बरस्तथा।
एते प्रशस्ताः कथिता धन्तधावनकर्मणि ॥"

विष्णुः—

वटासनार्क खदिर करञ्ज करुवीर सर्जारिमेदापामार्ग मालती ककुभ-बिल्वानामन्यतमं कषायं कटुकं तिक्तं वा। असन आसन इति प्रसिद्धः। सर्जः शालः, अरिमेदो—विट्खदिरः, मालती-जाती, ककुभो—अर्जुनः, कषायं कटुकं तिक्तं वेत्यन्यदप्यवहिता निषिद्धं बोद्धव्यम्।

हारीतः—

विल्व खदिराम्र पौनाश शिरीषापामार्गाणामन्यतमम्। पौनाश—आम्रातकः।

भारते—

"त्याज्यं सपत्रमज्ञातमूर्द्ध्वशुष्कञ्च पाटितम्।
त्वग्विहीनं ग्रन्थिमुखं तथा पालाश शांशपम्॥
ऋजु वितस्तिमात्रञ्च कीटाग्निभिरदूषितम्"

ऋजुमित्यादिना विधिः।

विष्णुः—

न पालाशं दन्तधावनं स्यान्न श्लेष्मातकारिष्ट विभीतक धरधन्वनजं न कोविदार शमी पिलु पिप्पलेङ्गुद गुग्गुलुजं, न वर्वर निर्गुण्डी शिश्रु चिल्लक तिन्दुकजम्। न पारिभद्राम्लिका मोचकाशाल्मलीशशजं नाम्लं न मधुरं नोर्द्ध्वशुष्कं न शुषिरं न पूतिगन्धि न पिक्षीण न दक्षिणाशामुखोद्यादुदङ्मुखः प्राङ्मुखो वाऽद्यात्। अरिष्टको—हरिठ इति प्रसिद्धः। धन्वनो—धामनिरिति प्रसिद्धः। पीलु -गुंड़फलः। यस्य पीलुरिति पश्चिमदेशे प्रसिद्धिः। इङ्गुदो—सुजनोति प्रसिद्धः। शिशुः—शोभाञ्जनः। पारिभद्रः—फरहद इति प्रसिद्धः। अम्लिका—तिन्तिली। मोचका—कदली ऊर्द्ध्वशुष्कं—वृक्षशुष्कं, शुषिरं—छिद्रयुक्तम्।

हारीतः—पलाश कोविदार श्लेष्मातक चिल्लक शाकवृक्ष निर्गुण्ठी शिखण्डि वेणुवर्जम्। पूष माषकरदरी करञ्ज शमी शिंशपा इत्येके। दरित्यहरीतक्यश्वकर्णशालामलकान् इत्यपरे।

नार्द्रं नातिशुष्कं नातिस्थूलमापोत्थितायमनोष्ठग्रन्थि उदङ्मुखः प्राङ्मुखो वा वाग्यत—आसीनो दन्तधावनं भक्षयेत्। कोविदारः श्वेतपुष्पः

काञ्चनालसदृशः कोइआर इति प्रसिद्धः। श्लेष्मातको—बहुआरः। चिल्लकः चिल्ह इति प्रसिद्धः। शाकवृक्षः—सगरन इति प्रसिद्धः। निर्गुण्ठी—सिन्दुवारः। शिखण्डी—मयूरशिखा। वेणु निषेधस्त्वगितरविषयः। पूषः—ब्रह्मदारुः दवित्थः कपित्थः शालः—शङ्कुवृक्षः। एकेऽपरे इत्युभयत्र वर्जयित्वेति शेषः।

आर्द्रमत्र सद्यश्छिन्नं ततोन्यदनार्द्रं नार्द्रं नातिशुष्कमित्यभिधानात्। आपोत्थिताग्रमीषच्चूर्णिताग्रम्। अनोष्ठग्रन्थि, ओष्ठसमीपे यस्मिन् ग्रन्थिर्नास्ति ओष्ठस्पर्शिग्रन्थिविहीनमित्यर्थः। दन्तघर्षणमात्रे भक्षयेदिति गौणः प्रयोगः। स च भक्षण धर्म-प्रथम चरमाचमन लाभाय।

विष्णुः—

"कनीन्यग्र—समस्थौल्यं सकूर्चं द्वादशाङ्गुलम्।
प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दन्तधावनम्॥"

भुक्त्वेति यतिविषयमिति हलायुधः। सकूर्चं—चूर्णिताग्रम्।

छन्दोगपरिशिष्टे—

"नारदाद्युक्तवार्क्षेय मष्टाङ्गुलमपाटितम्।
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत्॥
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः।
प्रतिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम्॥"

मन्त्रस्तु तत्रैव—"आयु र्बलं यशो वर्चः प्रजा-पशु-वसूनि च।
ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वन्नो धेहि वनस्पते॥"

नरसिंह पुराणे—अष्टाङ्गुलेन मानेन तत्प्रमाणमिहोच्यते।
प्रादेशमात्रमथवा तेन दन्तान्विशोधयेत्॥"

अत्र - वितस्तिरिति प्रथमः कल्पः, प्रादेशमात्रमिति मध्यमः, अष्टाङ्गुल इत्यपकृष्टः, न तु वितस्त्यादौ फलभूमाशुद्धयविशेषात्।

मार्कण्डेये—रत्निरङ्गुष्ठ पर्वाङ्गुलम्, अष्टाङ्गुलन्तु वैश्यानां शूद्राणान्तु षड्ङ्गुलं चतुरङ्गुल मानन्तु नारीणां विधिरुच्यते। अन्तर प्रभवाणान्तु षड्ङ्गुलमुदाहृतम् इति स्मृतिमञ्जूषा लिखित वाक्याद्व्यवस्थाङ्केचिदाहुः।

विष्णुः—

दन्तधावनमद्यादुदङ्मुखः प्राङ्मुखो वा।

भारते — प्रक्षाल्य हस्तौ पादौ च मुखञ्च सुसमाहितः।
दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वन्तरन्ततः॥

"प्राङ्मुखश्चोपविष्टश्च भक्षयेद्वाग्यतो नरः।
प्रक्षाल्य च शुचौ देशे दन्तधावनमुत्सृजेत्।
पतितेऽभिमुखे सम्यग्भोज्यमाप्नोत्यभीप्सितम्।"

दक्षिणंबाहुमुद्धृत्य उपवीती भूत्वेत्यर्थः।

विष्णुः—

"प्रक्षाल्य भुक्त्वा जह्याच्च शुचौ देशे प्रयत्नतः।"

अत्र नानास्मृतिषु विहितानि आम्राम्रातक-विल्वापामार्ग - शिरीष खदिर तिन्तिली वेणुपृष्ठ वटामलार्क करञ्ज करवीर शाल निम्ब विट् खदिर मालत्यर्ज्जुन कदम्बोदुम्बर काष्ठानि। तथा निषिद्धान्यन्यानि कटु तिक्त कषाय कण्टकि क्षीरीणि। विहितनिषिद्धानि तु करञ्ज तिन्तिली निम्ब शाल वट काष्ठानि। निषिद्धानि तु

पलाश कोविदार श्लेष्मातक चिल्लक तेन्दुवार शिखण्डी वेणु गर्भपूष माषक बदरी शमी शिंशपा कपित्थ हरीतक्यश्वकर्णामलक विभीतक धन्वन-

पीलु पिप्पलेङ्गुद गुग्गुल शोभाञ्जन पारिभद्र कदली शाल्मलि काष्ठानि। अन्यान्यपि मधुराण्यम्लानि च। विहितेष्वपि ओष्ठस्पर्शिग्रन्थिकं वृक्षशुष्कं सच्छिद्रं पूतिगन्धिचिक्कणं त्वग्विहीनं पाटितं सद्यश्छिन्नं सपत्रमपरिचितं च निषिद्धम्। अत्र चेयं व्यवस्था। मुख्यतो विहितमुपादेयं, तदलाभे विहित-निषिद्धम्। तदलाभेऽविहितानिषिद्धम्, निषिद्धन्तु-सर्वथा नोपादेयम्। तथाहि—दन्तधावनकरणत्वेन प्रसक्ते काष्ठसामान्ये विशेषविधिमहिम्ना शेषनिषेधे सिद्धेपि कण्ठतस्तन्निषेधस्य प्रतिनिधिविधयाप्युपादानवारणपरत्वात्।

यथा—मौदगश्चरुर्भवतीत्यनेन विशेषविधिनाऽर्थतः प्रतिषेधेपि माषादौ पुनश्यञ्जिया वै माषा इति शब्दतस्तन्निषेधो मुख्यालाभे प्रतिनिधित्वेनाप्युपादा-नवारणाय।

नरसिंह पुराणे—

"आलाभे दन्तकाष्ठानां प्रतिषिद्धे तथा दिने।
अपां द्वादश गण्डूषै र्मुखशुद्धिर्विधीयते॥"

भारते—"भक्षयेच्छास्त्रदृष्टानि पर्वस्वपि च वर्जयेत्।"

पर्वाणि तु—

"चतुर्दश्यष्टमी चैव अमावास्याथ पूर्णिमा।
पर्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च॥"

इति विष्णुपुराणोक्तानि।

नरसिंह पुराणे—

"प्रतिपद्दर्शषष्ठीषु नवम्याञ्चैव सप्तमाः।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम्॥"

गौड़ाः— उपवासे तथा श्राद्धे न खादेद्दन्तधावनम्।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम्॥"

अत्र च यत्र दन्तकाष्ठसंयोगो निषिद्धस्तत्र पत्रादिना दन्तमार्जनम् ।

"गन्धालङ्कार वस्त्राणि पुष्पमाल्यानुलेपनम् ।
उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ॥"

इति वचनादिति योगीश्वरः ।

द्वादशगण्डूषैरेव तदाशुद्धिरिति तु दन्तधावनानन्तरं मङ्गल्यमाकाष्ठ करणकमित्यर्थकमञ्जनसाहचर्यादित्यन्ये । उशनाः – नाङ्गुलीभिर्दन्तान् प्रक्षालयेत् ।

अथ प्रातःस्नानादि । विष्णुपुराणे—

"श्रोत्रियं शुभगां गाञ्च अग्निमग्निचितन्तथा ।
प्रातरुत्थाय यः पश्येदापद्भिः स विमुच्यते ॥
पापिष्ठं दुर्भगां मर्त्त्यं नग्नमुत्कृत्तनासिकम् ।
प्रातरुत्थाय यः पश्येत्तत्कलेरुपलक्षणम् ॥"

दक्षः— "अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।
स्रवत्येष दिवारात्रौ प्रातः स्नानं विशोधनम् ॥
अस्नात्वा नाचरेत्कर्म जपहोमादि किञ्चन ।
नानास्वेद समाकीर्णः शयनादुत्थितः पुमान् ॥
प्रातः स्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् ।
सर्वमर्हति पूतात्मा प्रातःस्नायी जपादिकम् ॥"

दृष्टं—मलापकर्षणम् । अदृष्टं—प्रत्यवायपरीहारः ।

तथा—

"यथाहनि तथा प्रातः नित्यं स्नायादनातुरः ।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत् ॥

अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्मणः ।
प्रातर्न तद्भवेत्स्नानं होमलोपो विगर्हितः ॥"

यथा–ययेतिकर्त्तव्यतया अनातुरः स्नानसम्वर्द्धनीयव्याधिरहितः । गेहे—उद्धृतोदके । गेहे वा अमन्त्रवत्—मन्त्रशून्यं स्नानसम्वर्द्धनीय व्याधिके । न तु मार्जनादिना शौचमुत्पाद्य सन्ध्यावन्दनादि कार्यम् ।

विष्णुपुराणे—

"स्नातोधिकारी भवति दैवे पित्र्ये च कर्मणि ।
पवित्राणान्तथा जप्ये दाने च विधिदेशिते ॥
अलक्ष्मी कालकर्णी च दुःस्वप्नं दुर्विचिन्तितम् ।
अम्मात्रेणाभिषिक्तस्य नश्यन्ति इति धारणा ॥
याम्यं हि यातनादुःखं नित्यस्नायी न पश्यति ।
नित्यस्नानेन पूयन्ते अपि पापकृतो जनाः ॥"

कालकर्णी दुःसहस्य रक्षसो दुहिता, दुर्विचिन्तितमनिष्टचिन्तनम् । अम्मात्रेण येन केनाप्यम्भसेत्यर्थः । धारणा निश्चयः ।

तथा—

"य इच्छेद्विपुलान् भोगान् चन्द्रसूर्यग्रहोपमान् ।
प्रातःस्नायी भवेन्नित्यं द्वौ मासौ माघफाल्गुनौ ॥"

यमः— प्रातःस्नायी च सततं द्वौ मासौ माघफाल्गुनौ ।
देवान् पितॄन् समभ्यर्च्य सर्वपापैः प्रमुच्यते ॥"

प्रातः शब्दश्चात्रोषःकालपरः प्रातः स्नाय्यरुणकरग्रस्तां प्राचीमवलोक्य स्नायादिति विष्णुवचनात् । इदञ्चानुदित होमोत्तरपरम् । तस्य रात्रिषोड़शांशरूपकालाधिकरणक होमानुरोधेन तत्पूर्वमेव प्रातःस्नानात्—तदन्ताप-

कर्षन्यायात्। तच्चोद्धृतोदकेनैव आचान्तमनुगतं वा निशि स्नानं न विद्यत इति निषेधात्।

दक्षः—

"उदयास्तमयं यावन्न विप्रः क्षणिको भवेत्।
नित्य-नैमित्तिकैर्युक्तः काम्यैश्चान्यैव गर्हितैः॥"

क्षणिक इति। उक्तकर्महीनः क्षणमपि न तिष्ठेदित्यर्थः।

वराहपुराणे—

"उदयान्निःसृतं सूर्यं यस्तु भक्त्या नरोत्तमः।
दध्यच्चताञ्जलिभिस्तु त्रिभिः सम्पूजयेच्छुचिः॥
तस्य भावप्रपन्नस्य अशुभं यदुपार्जितम्।
तत्क्षणादेव निर्दग्धं भस्मीभवति काष्ठवत्॥"

दक्षः— "दिवसस्याष्टभागे तु कृत्यं तस्योपदिश्यते।"

मनुः— "मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्।
पूर्वाह्ण एव कुर्वीत देवतानाञ्च पूजनम्॥"

मैत्रं—पुरीषोत्सर्गः। मित्रदेवतारूपाद्यन्यसम्बन्धात्। सोपि तथोक्तः। प्रसाधनं—केशविरचनादि। अञ्जनं—सौवीराञ्जनादि। स्नानदेवपूजे काम्ये।

विष्णुपुराणे—

"आचान्तस्तु ततः कुर्यात् पुमान् केशप्रसाधनम्।
आदर्शाञ्जन-मङ्गल्य-दूर्वाद्यालम्भनानि च॥"

आदिपदेन दध्याद्युपादानम्। प्रातःसन्ध्यामुपक्रम्य नरसिंहपुराणे—

"ततश्चावसथं प्राप्य होमं कुर्याद्विचक्षणः।
देवकार्यन्ततः कृत्वा गुरु मङ्गल वीक्षणम् ॥"

कर्त्तव्यमिति शेषः। गुरुः—पित्रादिः। मङ्गलं नारदोक्तम्—

"लोकेस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौ हुताशनः।
हिरण्यं सर्पिरादित्यो आपो राजा तथाष्टमः ॥"

ब्रह्मपुराणे—"स्वात्मानं न घृते पश्येद्यदीच्छेच्चिरजीवितम्।"

आत्मानं—शरीरम्।

यमः—

"यतीनां दर्शनञ्चैव स्पर्शनं भाषणन्तथा।
कुर्वाणः पूयते नित्यं तस्मात्पश्येत्तु नित्यशः ॥"

भारते—

"यज्वा मिष्टान्नदः सत्री शतायु र्धार्मिकः शुचिः।
ज्ञानसिद्धान् तपः सिद्धान् दृष्ट्वा पापात्प्रमुच्यते ॥"

दक्षः— द्वितीये च तथा भागे वेदाभ्यासा विधीयते।
वेदस्वीकरणं पूर्वं विचारोभ्यसनं जपः ॥
तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासस्तु पञ्चधा।"

स्वीकरणमध्ययनम्।

"समित्पुष्पकुशादीनां स कालः परिकीर्तितः।"

आहरणस्येति शेषः।

याज्ञवल्क्यः—

"वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च ।
बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च ॥
नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् ।
यथा यथा हि पुरुषः शास्त्रं समधिगच्छति ॥
तथा तथा विजानाति विज्ञानञ्चास्य रोचते ॥"

बुद्धिवृद्धिकराणि मीमांसादीनि । धन्यानि धनाय हितानि अर्थ-शास्त्राणि । हितानि आयुर्वेदादीनि ।

निगमः—पदार्थनिर्णायकाः निघण्टु प्रभृतयः । रोचते दीप्तं भवति ।

यमः—

"दानेन तपसा यज्ञैरुपवासव्रतैस्तथा ।
न तां गतिमवाप्नोति विद्यया यामवाप्नुयात् ॥"

दक्षः— "तृतीये च तथा भागे पोष्यवर्गार्थसाधनम् ।"

अर्थ साधनं—धनार्जनम् । कुर्यादिति शेषः ।

पोष्यवर्गश्च—"माता पिता गुरु र्भार्या प्रजा दीनः समाश्रितः ।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः ॥
भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम् ॥"

गौतमः—

योगक्षेमार्थमीश्वरमधिगच्छेन्नान्यत्र देवगुरुधार्मिकेभ्यः । योगो-लाभः । क्षेमो लब्धस्य परिपालनम् । अन्यमनीश्वरम् ।

मनुः—

"दैवतान्यभिरुपासीत गच्छतः पृष्ठतोन्वियात् ।"

अभिगच्छेत्—अभिमुखेन पूजार्थं गच्छेत्। गुरूनेवेत्येवकारो भिन्नक्रमो गच्छेदित्यनन्तरं बोद्धव्यः।

छागलेयो यमश्च द्वितीये—

यतीनां दर्शनं चैव स्पर्शनं भाषणं तथा।
कुर्वाणः पूयते नित्यं तस्मात्पश्येत्तु नित्यशः॥
"अग्निचित्कपिला सत्री राजा भिक्षु र्महोदधिः।
दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत्तु नित्यशः॥"

पश्येदित्यनेन स्पर्शन—भाषणे अप्युपादीयेते अजहत्स्वार्थलक्षणया। अग्निचित् कृताग्निचयनः कपिला—कपिल वर्णा गौः। सत्री—कृतसत्रयागः। भिक्षु र्यतिः।

वराहपुराणे—

"वामनं ब्राह्मणं दृष्ट्वा वराहञ्च जलोत्थितम्।
नमस्येच्चैव यो भक्त्या स पापेभ्यः प्रमुच्यते॥"

नारदः— लोकेस्मिन् मङ्गलान्यष्टौ ब्राह्मणो गौ र्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः॥
एतानि सततं पश्येन्नमस्येदर्च्चयेच्च यः।
प्रदक्षिणञ्च कुर्वीत तथास्यायुर्न्न हीयते॥"

एतानि ब्राह्मणादीनां अष्टानाम्मङ्गलानि दर्शन-नमस्कारार्चन-प्रदक्षिणीकरणानि समुदितानि आद्यः—कामस्य तृतीयभाग एव कर्त्तव्यत्वेन विहितानि। दिवसस्य भागे तु मङ्गलाद्यालंभनं केवलं दानम्।

वृहस्पतिः—

"प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम्।
एतद्धि मङ्गलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः॥"

मनुः— मङ्गलाचारयुक्तः स्यात्प्रयतात्मा जितेन्द्रियः ।
मङ्गलाचारयुक्तानां नित्यञ्च प्रयतात्मनाम् ।
जपतां जुह्वताञ्चैव विनिपातो न विद्यते ॥"

मङ्गलाचारः - प्रातर्गोरोचनाद्यालम्भनम् । विष्णुः—

"गोमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना ।
षड्ङ्गमेतत्परमं मङ्गलं सर्वदा गवाम् ॥
शृङ्गोदकं गवां पुण्यं सर्वाघविनिसूदनम् ॥"

वामन पुराणे—

"कृत्वा शिरः स्नानमथाह्निकानि सम्पूज्य तोयेन पितॄन् सदेवान् ।
होमञ्च कृत्वालभनं शुभानां ततो गृहान्निर्गमनं प्रशस्तम् ॥
दूर्वां दधि सर्पिरथोदकुम्भं धेनुं सवत्सां वृषभं सुवर्णम् ।
मृद्गोमयं स्वस्तिकमक्षतानि लाजं मधु ब्राह्मणकन्यकाश्च ॥
श्वेतानि पुष्पाणि तथा शमीं च हुताशनं चन्दनमर्कबिम्बम् ।
अश्वत्थवृक्षं च समालभेत ततश्च कुर्यान्निजजातिधर्मान् ।
देशानुशिष्टं कुलधर्ममुख्यं स्वगोत्रधर्मञ्चहि सन्त्यजेच्च ॥"

सम्पूज्य तोयेन पितृनित्यनेन प्रातःस्नानेपि - तर्पणङ्कर्त्तव्यमित्युक्तम् । अत्र शिरः स्नानादि—सर्वं यथाकालप्राप्तमनुद्य, ततश्च कुर्यान्निजजातिधर्मानित्यादि तृतीयभागे निजजातिधर्मश्च स्वस्वजातिविहितधनार्जनरूपः । तत्रापि—यस्मिन्देशे यस्याञ्च जातौ-यस्मिन् कुयोधनोपायो विहितोऽनिन्दितः । स एव करणीय इत्यर्थः ।

दक्षः—

"चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् ।
तिल पुष्प-कुशादीनि स्नानञ्च कृत्रिमे जले ॥"

चतुर्थे - अष्टधा विभक्तदिनचतुर्थांशे। इदञ्च—मध्याह्नस्नान-विषयम्। आदिपदाद् गोमय दूर्वाद्युपादानं स्नानमिति कुर्यादिति शेषः।

शातातपः—

"वल्मीकाखूत्करान्लेपाज्जलाच्च पथिवृक्षयोः।
कृतशौचावशिष्टात्तु न ग्राह्याः सप्तमृत्तिकाः॥
शुचौ देशे तु संग्राह्या शर्करास्मादि वर्जिता।
रक्ता गौरी तथा श्वेता मृत्तिका त्रिविधा स्मृता॥"

लेपात्—कुड्यादेः पथिवृक्षयोरित्यत्र सामीप्य लक्षणा।

"न मृदं नोदकं वापि न निशायान्तु गोमयम्।
न गोमूत्रं प्रदोषे तु गृह्णीयाद्बुद्धिमान्नरः॥"

गृह्णीयादुपाददीत रक्तेति, यत्र देशे श्यामैव मृत्तिका तत्र सापि ग्राह्या। मृत्तिका यत्र यादृशीतिविधेः।

दक्षः—

"मृत्तिकाः सप्त न ग्राह्या वल्मीके मूषकोत्करे।
अन्तर्जले श्मशाने च वृक्षमूले सुरालये।
परस्नानावशिष्टा च श्रेयस्कामैस्सदा बुधैः॥

वल्मीक इत्यादौ स्थितेति शेषः। इदमदृष्टार्थं कर्मविषयम्।

मनुः—

"न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि।
न वासोभिः सहाजस्रं नाविज्ञाते जलाशये॥"

अत्र—भोजनानन्तरं रागप्राप्तस्नानस्य निषेधः। नित्यस्याप्राप्तत्वात्। नैमित्तिकस्य निषेद्धुमशक्यत्वात्।

"नैमित्तिकानि कर्माणि विपतन्ति यदा यदा ।
तदा तदैव कार्याणि कालस्तु न विधीयते ॥"

इति दक्षवचनात्। आतुरस्य जलसम्बर्द्धनीयव्याधिकस्य सदैव वारुणस्नाननिषेधः।

महानिशा—रात्रिमध्य प्रहर द्वयम्—

"महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम् ।
तस्यां स्नानं न कर्त्तव्यं काम्य नैमित्तिकादृते ॥"

इति देवल वचनात्। वासोभिरिति। सचैलस्नाने तु विशेषवचनादेव तत्त्यागः। अजस्रमनवरतम्, श्रद्धाजाड्यादिना प्राप्तं प्रतिनिषिद्धयते। अविज्ञाते सुगमतया साधुकृततया च।

जावालः—

"न पारक्ये सदा स्नायान्न भुक्त्वा न महानिशि ।
नाद्रर्द्रमेकश्च वसनं परिदध्यात्कथञ्चन ॥"

एकवासस्त्वस्य सदैव निषेधात्। स्नानकालेपि द्विवासस्त्वे सिद्धे स्नानं तर्पणपर्यन्तं कुर्यादेकेन वाससेति। यदि समूलं तदाप्येकजातीयपरमेकपदमिति नेयम्। एतद्वाक्यं शावस्नानपरिमित्यन्ये।

तथा— "त्रयोदश्यां तृतीयायां दशम्यान्तु विशेषतः ।
शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथञ्चन ॥"

वैधस्नान निषेधोयमिति प्राञ्चः।

वस्तुतस्तु—अनेन वैधस्य निषेधे नञः प्रसज्यप्रतिषेधार्थत्वे विकल्पः तद्भयादमुख्यत्वे पर्युदासलक्षणा स्यात्। त माद्रागप्राप्तस्नाननिषेधोयम्। अतएव जीवत्पितृकस्य कुहूस्नाननिषेधो यदि समूलस्तदापि रागपरिप्राप्तविषयक एवेति तत्त्वम्।

बौधायनः—

न नग्नः स्नायान्न निशि स्नायात्। प्रकाशे आपस्तम्बः। अशिरोवमज्जनमप्सु वर्ज्जयेदस्तमिते च स्नानम्। अशिरस्कं स्नानं जलं प्रविश्य न कार्यमित्यर्थः।

देवलः—"राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषु च॥"

योगि याज्ञवल्क्यः—

"उभे सन्ध्ये तु स्नातव्यं ब्राह्मणैस्तु गृहाश्रितैः।
तिसृष्वपि च सन्ध्यासु स्नातव्यं तु तपस्विभिः॥"

प्रातर्मध्याह्नयोः तपस्विभिः। वाणप्रस्थै यतिभिश्च।

एवञ्च— "स्वप्नमध्ययनं स्नानमुच्चारं भोजनं गतिम्।
उभयोः सन्ध्ययो र्नित्यं मध्याह्ने च विवर्जयेत्॥"

इति देवलीयो निषेधो रागप्राप्तस्नानविषयः।

"स्नानं मध्यन्दिने कुर्यात् सुजीर्णेन्ने निरामये॥"

इति व्यासवचनात् अभ्युदयादेर्विशेषात् पूर्वाह्णेपि स्नानम्। तदुक्तं वशिष्ठेन – अरुग् दिवाचरेत्स्नानं मध्यात्प्राग् विशेषत इति।

शंख लिखितौ –अनग्नन्न नग्नः स्नायान्नाप्सु मेहेत नोद्घर्षणं कुर्यात, न पादेन पाणिना वा जलमभिहन्यात, यदापो वै सर्वदेवताः, न स्रवन्तीं वृथातिक्रामेतानवसिच्यामेध्योदकं परिहरेदल्पोदके न स्नायान्न समुद्रोक्रमवगाहेत। मेहनं—मूत्रशुक्र त्यागः। उद्घर्षणं -अङ्गमलक्षालनम्। अतिक्रामेत्—

लंघयेत्। वृथा निःप्रयोजनं अनवसिच्य तर्पणमकृत्वा एवञ्चैकत्र दिने—अनेकत्र तीर्थ लाभे नाना स्नानानि तर्पणानि च कार्याण्येव। अमेध्योदकं परिहरेत्, तत्र न किमपि कर्म कुर्यात्, अल्पोदके न स्नायात्।

प्रभूते सति योगियाज्ञवल्क्यः—

"प्रभूते विद्यमाने तु सलिले सुमनोहरे।
नाल्पोदके द्विजः स्नायान्नदीञ्चोत्सृज्य कृत्रिमे॥
पादेन पाणिना वापि यष्ट्या वस्त्रेण चोदकम्।
न हन्यान्नाप्यपवदेन्न च प्रक्षोभयेद्बुधः॥"

द्विज इति स्नानकर्तृमात्रपरम्। नदीपदमकृत्रिममात्रपरम्। नावगाहेत—नान्तः प्रविश्य स्नायादित्यर्थः।

दक्षः—

"मलापकर्षणं तीरे मन्त्रवत्तु जले स्मृतम्।
सन्ध्यास्नानमुभाभ्यान्तु स्नानदेशाः प्रकीर्तिताः॥"

मलापकर्षणस्नानं तीर एव, मन्त्रस्नानं जल एव। कर्माङ्गमन्यतरत्र-कुर्यादित्यर्थः।

देवलः—

"न नदीषु नदीं ब्रूयात् पर्वतेषु च पर्वतम्।
नान्यत्प्रशंसेत्तत्रस्थस्तीर्थेष्वायतनेषु च॥"

हारीतः—"न चत्वरोपद्वारयोः स्नायात्।"

चत्वरं भूतादिबलिस्थानम्।

"स्नानवर्णकयोरग्रं न प्रयच्छेदन्यत्र देवगुरुब्राह्मणेभ्यः।"

स्नानं—कुशादि, करण व्युत्पत्तेः। वर्णकमुद्वर्त्तनादि वर्णकरत्वात्।

याज्ञवल्क्यः—

"आग्रह्या आगता आपो नद्याः प्रथमवेगिकाः।
प्रक्षोभितास्तथैवापो याश्च तीर्थाद्विनिःसृताः॥"

प्रथमवेगिकाः—शुष्कनद्यां प्रथम प्रवाहरूपाः।

प्रक्षोभिताः—आविलीभूताः। तीर्थाद्विनिःसृताः—गङ्गा प्रवाह-विच्छिन्नाः।

तथा—

"पञ्च पिण्डाननुद्धृत्य न स्नायात्परवारिणि।
स्नायान्नदी देवखात-ह्रदेषु च सरस्सु च॥"

बौधायनः—तपस्यमवगाहनं देवतास्तर्पयित्वा पितृतर्पणम्। अनु-तीर्थमप उपसिञ्चत्यूर्ज्जं वहन्तीरिति।

अथप्युदाहरन्ति—

"स्रवन्तीषु निबद्धासु त्रयो वर्णा द्विजातयः।
प्रातरुत्थाय कुर्वीरन् देवर्षिपितृतर्पणम्॥
निरुद्धासु न कुर्वीरन् अंशभाक् तत्र सेतुकृत्।
तस्मात परकृतान् सेतून् कूपांश्च परिवर्जयेत्।
उद्धृत्य वा त्रीन् पिण्डान् कुर्यादापत्सु नो सदा॥"

"निरुद्धासु च मृत्पिण्डान् कूपात्तु त्रीन् घटांस्तथा।"

तपस्यं—तपसे जपादये हितम्, अनुतीर्थं—देव-पित्रादि तीर्थानतिक्रमेण।

मनुः—

"परकीय-निपानेषु स्नायान्नैव कदाचन ।
निपानकर्त्तुः स्नात्वा हि दुःकृतांशेन लिप्यते ॥"

निपानं—जलाशयः । परकीयं—परकृतम् । पैठीनसिः—
अथ स्नानविधिः—परकृतान् सेतून् कूपांश्च वर्जयेदंशभाक् तत्र सेतुकृत् त्रीन् पिण्डानुद्धृत्य वा स्नायात् ।

विष्णुः—परनिपानेषु न स्नानमाचरेदाचरेद्वा पञ्च पिण्डानुद्धृत्यापदि । आपदि—अकृत्रिमजलस्नानासम्भवे । तदयं संक्षेपः—

परकृते निपाने पञ्चपिण्डानुद्धृत्य कूपादम्बुघटत्रयमुद्धृत्य सेतुप्रतिबन्धे तु नदीतटादौ त्रीन् पिण्डानुद्धृत्य स्नायात् । एषु तु तर्पणे कूपे अम्बुघटत्रयोद्धारोऽन्येषु सर्वेषु पिण्डत्रयोद्धारः । अत्र तु स्नानार्थकपिण्डोद्धारेणैव तर्पणार्थकस्यापि तस्य तन्त्रेण सिद्धे नं तदर्थं पिण्डोद्धारः । तत्र स्नानमकृत्वा तु तर्पणकरणपक्षे तर्पणादव्यवहित प्रागेव स कार्य इति । पिण्डश्च योग्यश्रीफलप्रमाणकः पिण्डपदान्निरुपधेस्तथैवावगमात् । हस्तद्वयोद्धाह्य इत्यन्ये ।

कूपे प्रविश्य स्नानं निषिद्धम् । किन्तु उद्धृत-तत्तोयेनैव स्नानम् । तदुक्तं विष्णुपुराणे—

"कूपेषूद्धृततोयेन स्नानं कुर्वीत वै भुवि ।
स्नायीतोद्धृत तोयेन यदि वा भुव्यसम्भवे ॥

कूपेष्विति । कूपेषु यत्तोयं तेनोद्धृतेन भुवि स्थितः । स्नायादित्यर्थः । अन्यत्र तड़ागादावपि अवगाह्य स्नानासम्भवे एवमेवेति द्वितीयार्द्धार्थः ।

अत्र निपान कर्त्तुः स्नात्वा हीत्यादिना मानवहेतु सन्निगदवलेन स्वकारित वाप्यादौ न दोषः । नहि सजलाशयस्नानेन स्वपापोपलेपः । स्व-

राष्ट्रिय संस्कृत संस्थान
रामपुर परिसर, जयपुर
पुस्तकालय
क्रमांक 1953

स्मिन् जायते तस्य जातः सम्बन्धश्चेति न्यायेन पूर्वमेव जातत्वादिति केचित्।

अन्येतु—मनुवचनबलेन स्वकारिते, निषेधो मा यासीत् अन्यतस्ततस्यात्। तथाहि - तत्राप्रतिष्ठिते स्नानं प्रतिष्ठिते वा ? नाद्यः, अप्रतिष्ठितं मूत्रवदित्यनेन अप्रतिष्ठित पानीयेषु पेयं सलिलं भवेदित्यनेन च तस्याकर्मण्यत्वप्रत्यायनात्।

"यन्न सर्वार्थमुत्सृष्टं यच्चाभोज्यनिपानजम्।
तद्वर्ज्जं सलिलं तात ! सदैव पितृकर्मणि ॥"

इत्यनेन स्फुटमेव तन्निषेधनाच्च। अतएव परकृतप्रतिष्ठिते हरिहरोक्तं स्नानादि प्रत्युक्तं चौर्यापत्तेश्च। नापरः, पूर्वस्य स्वत्वस्योत्सर्गेण ध्वंसात्। नापि पुरुषान्तरवदौपादानिकं कर्त्तुरपि स्वत्वं स्यात्। नहि स्वयं त्यक्तं स्वमुपादातुमर्हति। अन्यथोत्सृष्टवृषादेः स्वयमेवोपादानापत्तेः।

न च— "सर्वभूतेभ्य उत्सृष्टं मयैतज्जालमूर्ज्जितमित्या"—

द्यसंकुचित् सर्वपदस्वरसात्। स्वस्याप्युद्देश्यताप्रीत्या स्वोपादानस्याभिमतत्वादत्रौपादानिकमुत्स्रष्टुः स्वत्वं स्यादेव वृषोत्सर्गादौ तादृशशब्दस्वरसाभावान्नौपादिकं स्वत्वमिति वाच्यम्।

नहि त्यागोद्देश्यताविशिष्टस्य त्यागकर्तृता सम्भवतीति प्रतिपादयिता तिर्यगधिकरणसिद्धान्तेनापास्तत्वात्। तथा च न्यायतः सर्वपदमुत्स्रष्टृभिन्नपरमेव। अतएव -प्रतिष्ठितस्वीयनिषेधः प्रदीपेपि कण्ठत एवोक्त इति दिगित्याहुः।

विष्णुः —

स्नायात्प्रस्रवण नदीदेवलभ्यते। सरोवरेषु उद्धृतात् भूमिष्ठमुदकं

पुण्यं स्थावरात्। प्रस्रवत् तस्मान्नादेयं तस्मादपि साधुपरिगृहीतं सर्वत्र एव गाङ्गम्।

योगियाज्ञवल्क्यः—

"वृथा तूष्णोदकस्नानं वृथा जप्यमवैदिकम्।
अश्रोत्रिये वृथा दानं वृथा भुक्तमसाक्षिकम्॥"

वृथा देहक्षालनान्यफलाजनकम्। असाक्षिकमतिथिशून्यम्।

भविष्यपुराणे—

"शिवलिङ्गं समीपस्थं यत्तोयं पुरतः स्थितम्।
शिवगङ्गेति विख्यातं तत्र स्नात्वा दिवं व्रजेत्॥"

ब्रह्मपुराणे—"नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते।
तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम्॥"

नित्यं - प्रात्यहिकम्, नैमित्तिकमुपरागादिनिमित्तकम्। न त्वस्पृश्य-स्पर्शनादिनिमित्तकम्। तत्र—

"श्मश्रुकर्माश्रुपातश्च मैथुनं छर्दनन्तथा।
अस्पृश्यस्पर्शनं कृत्वा स्नायाद्वर्ज्या जलक्रिया॥

इति ब्रह्मपुराणवचन—तर्पणनिषेधात्। काम्यं—तीर्थस्नानादि न तु यत्तूक्तं—पुष्पस्नानादि, तस्य लौकिकस्यालौकिक तर्पणाङ्गकत्वे तक्षसूत्राधिकरणविरोधात्। तद्यथा -

आरे भग्ने इन्द्रबाहु बंद्धव्यः, पायसं ब्राह्मणो भोजयितव्य इत्यत्र गृहस्थादि-कर्मणो लौकिकस्यालौकिकमिन्द्रबाहुबन्धनादिनाङ्गं, किन्तारभङ्गनिमित्त-कम, तथेदमपि तर्पणमलौकिकं लौकिकस्य स्नानस्य नाङ्गमिति।

हारीतः—

"पञ्च स्नानानि विप्राणां कीर्तितानि मनीषिभिः।
आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च ॥"

आग्नेयं भस्मना स्नानम् अद्भिर्वारुणमुच्यते।
आपो हि ष्ठेति तद्ब्राह्मं वायव्यं गोरजः स्मृतम् ॥
अद्भिः सातपवर्षाभि र्दिव्यं स्नानमिहोच्यते।
एतैस्तु मन्त्रतः स्नात्वा तीर्थानां फलमाप्नुयात् ॥"

भस्मना—संस्कृताग्निभस्मना।

स्कान्दे—

"पुण्यं कनखले यच्च प्रयागे यच्च सुन्दरि।
तत्फलं सकलं देवि भूतिस्नाने विधीयते ॥
उच्छिष्टं वा प्रमत्तं वा नरवाहन नन्दिते।
भूतिस्पृष्टं हि न नरं धर्षयन्ति विनायकाः ॥

नरवाहनः—कुबेरः। योगियाज्ञवल्क्यः—

"असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया।
मन्त्रस्नानादयः सप्त एक इच्छन्ति सूरयः ॥
मान्त्रं भौमन्तथाग्नेयं वायव्यं दिव्यमेव च।
वारुणं मानसञ्चैव सप्त स्नानाः प्रकीर्त्तिताः ॥
आपो हिष्ठेति वै मान्त्रं मृदालम्भस्तु पार्थिवम्।
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते।
वारुणञ्चावगाह्यं स्यान्मानसं विष्णुचिन्तनम् ॥

सस्तं स्नानं यथोद्दिष्टं मन्त्रस्नानक्रमेण तु ।
कालाद्देशादसामर्थ्यात्सर्वं तुल्यफलं स्मृतम् ॥"

अत्र च वारुणं मुख्यम् । असामर्थ्यादिना अन्यान्यपि तत्समानि मन्त्रस्नानमापोहिष्ठेति त्र्यृचेन मार्जनम् ।

यत्तु— "शन्न आपस्तु द्रुपदा आपोहिष्ठाघमर्षणम् ।
एभिश्चतुर्भिर्मन्त्रैस्तु मन्त्रस्नानमुदाहृतम् ॥"

इति मनुनोक्तं—तत्कल्पान्तरम् । शन्न 'इति शन्न आपो धन्वन्याः—शन्नो भवन्त्वनूप्याः । शन्नः समुद्रिया आपः शन्नो भवन्तु कूप्या' इति मन्त्रः कठब्राह्मणीयः । अन्येषु प्रसिद्धा एवेति पारिजातः ।

हारीतोक्त आपोहिष्ठा मन्त्रो मनूक्तमन्त्रचतुष्टयोपलक्षणमेकमूलककल्पना लाघवादिति कल्पतरुः । दिव्यन्तु विष्णुपुराणे—

"आकाशगङ्गासलिलं समादाय गभस्तिमान् ।
अनभोगतमेवोर्व्यां सद्यः क्षिपति रश्मिभिः ॥
तस्य स्पर्शविनिर्धूत–पापपङ्को द्विजोत्तमः !
न याति नरकं मर्त्यो दिव्यं स्नानं हि तत्स्मृतम् ॥"

तथच—भास्वति प्रतिपत्ये वा दृश्यमानमेघं यद्वर्षंतेन स्नानं दिव्यमित्यर्थः । अत्र च गृहस्थेन वारुणं सशिरस्कं स्नानं प्रत्यहं काम्यं सवस्त्रोऽहरहराप्लवेतेति शाङ्ख्यायनगृह्यात् ।

तेनैव च विहितक्रिया काम्या—

"शिरः स्नातस्तु कुर्वीत दैवं पित्र्यमथापि वा ।"

इति मार्कण्डेयपुराणवचनात् । एतदशक्तावशिरस्कं, तदशक्तावपि गात्रप्रोञ्छनम् । तथाच जावालः—

"अशिरस्के भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् ।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः ॥
स्नायाच्छिरः स्नानतया न नित्यं, नाकारणं चैव सदा निशासु।
ग्रहोपरागं स्वजनातिपातं मुक्त्वा सुजन्मर्क्षगतं शशाङ्कम् ॥"

इति वायुपुराणवचनेन शिरः स्नानं नैर्मल्यहेतु शिरःस्नानमुक्तमतो न विरोधः। वारुणं स्नानं षड्विधम्। तथाच शङ्खः -

"नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितम् ॥
अस्नातस्तु पुमान्नार्हो जपाग्निहवनादिषु ।
प्रातःस्नानं तदर्थन्तु नित्यस्नानमुदाहृतम् ॥
चाण्डाल-शवपूयादि स्पृष्ट्वाऽस्नातो रजस्वलाम् ।
स्नानार्हस्तु यत्र स्नाति स्नानं नैमित्तिकं हि तत् ॥
पुष्यस्नानादिकं यत्तु दैवज्ञविधिचोदितम् ।
तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रोजयेत् ॥
जप्तुकामः पवित्राणि अर्चिष्यन् देवताः पितॄन् ।
स्नानं समाचरेद् यत्तु क्रियाङ्गं तत्प्रकीर्त्तितम् ॥
मलापकर्षणं नाम स्नानमभ्यङ्गपूर्वकम् ।
मलापकर्षणार्था तु प्रवृत्तिस्तस्य नान्यथा ॥
सरस्सु देवखातेषु तीर्थेषु च नदीषु च ।
क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया ॥"

क्रियास्नानं—क्रियारूपं स्नानम्, स्वर्गादिहेतुतया स्नानमेव प्रधानमित्यर्थः।

"तत्र काम्यं तु कर्त्तव्यं यथावद्विधिचोदितम् ।
नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम् ॥
तीर्थाभावेपि कर्त्तव्यमुष्णोदकपरोदकैः ।
स्नातस्य वह्नितप्तेन तथैव परवारिणा ।
शरीरशुद्धि विज्ञेया न तु स्नानफलं लभेत् ॥"

परवारि—परकारितोत्सृष्टजलाशयस्थम् । परापहृतञ्च द्वयमपि ।

तथा— अद्भिर्गात्राणि शुद्ध्यन्ति तीर्थस्नानाद्भवेत्फलम् ।
सरस्सु देवखातेषु तीर्थेषु च नदीषु च ।
स्नानमेव क्रिया यस्मात् स्नानात्पुण्यफलं स्मृतम् ॥"

वराहपुराणे—

"दक्षिणावर्त्तशङ्खेन तिलमिश्रोदकेन च ।
उदके नाभिमात्रे तु यः कुर्यादभिषेचनम् ॥
प्राक् स्नातसि तु वै नद्यां नरस्त्वेकाग्रमानसः ।
यावज्जीवकृतं पापं तत्क्षणादस्य नश्यति ॥
अच्छिन्न पद्मपत्रेण सर्वरत्नोदकेन च ।
स्रोतसो वै नरः स्नात्वा सर्वपापैः प्रमुच्यते ॥
दक्षिणावर्त्तशङ्खेन पात्र औदुम्बरे स्थितम् ।
उदकं यः प्रतीक्षेत शिरमाकृष्टमानसः ।
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति ॥"

स्रोतस इति सप्तमीस्थाने व्यत्ययेन षष्ठी । औदुम्बरे ताम्रे ।

योगियाज्ञवल्क्यः—

"त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगाश्च पक्षस्य मासस्य सरिताम्पतिः ॥"

त्रिरात्रेत्यादि। यदन्यत्र त्र्यहस्नानफलं तन्नद्यामेकाहस्नानादेवमग्रेपि। त्रिरात्रोपवासफलदा नद्य एवमग्रेपीत्यन्ये। मनुः—

"नद्यां प्रत्येकशः स्नाने भवेद्गोदानजं फलम्।
गोप्रदानैस्तु दशभिस्तासां पुण्यन्तु सङ्गमे॥
सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः॥
तासु स्नानं न कुर्वीत वर्ज्जयित्वा समुद्रगाः।"

ताश्च गङ्गाद्या एकादश। उपाकर्मोत्सर्ग-सूतक-मृतकोपरागेषु तु रजोदोषो नास्ति। नदी चतुर्हस्तदण्डे नाष्ट सहस्र दण्डा नूनवेगं जलम्।

"धनुः सहस्राण्यष्टौ च गति र्यासां न विद्यते।
न ता नदीशब्दवहा गर्तास्ते परिकीर्तिताः॥"

इति च्छन्दोग परिशिष्टात्। बौधायनः—

आपो देवगृहं गोष्ठं यत्र च ब्राह्मणास्तत्राप्रक्षाल्य पादौ नान्तः प्रवेष्टव्यम्। अथ स्नानम्—

कात्यायनः—अथातो नित्यस्नानं नद्यादौ मृद्गोमय कुश तिल सुमनस आहृत्योदकान्तं गत्वा शुचौ देशे संस्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीती आचम्य ब्रूहीति तोयमामन्त्र्यावर्त्तयेद् ये ते शतमिति,सुमित्रिया न इत्यपोञ्जलिमादाय, दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्कटिं वस्थिमुरुजङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदेदं विष्णुरिति। सूर्यस्याभिमुखो मज्जेदापो अस्मानिति। स्नात्वोदिदाम्य इत्युन्मज्य विमज्योन्मज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति।

ततोभिषिञ्चेदिमम्मे वरुणेति चतसृभिर्माप उदुत्तमं मुञ्चन्त्ववभृथेत्यन्ते चैतन्निमज्योन्मज्याचम्य दर्भैः पारयेदापो हिष्ठेति तिसृभिरिदमापो

हविष्मती र्द्वीराप इति द्वाभ्यामपोदेवा द्रुपदादिव शन्नोदेवीरपां रसमपोदेवीः पुनन्तु मेति नवभिश्चित्पतिर्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावन्ते चान्तजंलेऽघमर्षणं त्रिरावर्त्तयेद् द्रुपदादिवायङ्गौरिति वा त्र्यचं प्राणायामं वा सशिरसमोमिति वा विष्णोर्वा स्मरणम्। स्नानं तावद्बहिः सर्वाङ्गोणयथोक्तजलसम्बन्धः। तदुपक्रम्य देशेतिकर्त्तव्यतादिकं सर्वं दर्शयति—अथेति। दिनतृतीयभागानन्तरमित्यर्थः।

अत इति यतः स्नानेन वैधकर्माधिकारोऽतो नित्यस्नानं—प्रात्यहिकं स्नानम्। तदेव सेतिकर्त्तव्यताकं दर्शयति। मृदित्यादि, प्रक्षाल्य पाणिपादमिति एकैकया मृदा-हस्तौ पादौ प्रक्षाल्य कुशोपग्रहः कुशहस्तो बद्धशिखी यज्ञोपवीतीति, यद्यपि नित्यं यज्ञोपवीतीति एतद्विधिना मुक्तशिखावर्जमित्येतदीयनिषेधेन च पुरुषार्थतयोपवीतित्व शिखाबन्धने कात्यायनेन विहिते तथापीदानीं क्रत्वर्थतामाश्रित्यते विदधातीति।

यत्तु—यज्ञोपवीत विशेषविधिना उत्तरीयनिवृत्तिरिति तन्न परिसंख्यापत्तेः। बद्धशिखीति—बद्धचूड़ इत्यन्ये द्वेष्यमिति, यस्यां दिशि द्वेष्यस्तिष्ठति तामुद्दिश्य जलं क्षिपेत् तां दिशं निरुक्षति यस्यामस्य द्वेष्योस्ति, दुर्मित्रियास्तस्मै भूयासुरिति बौधायनवचनात् निरुक्षति सिञ्चति। कटिमित्यादि। कटिं पाद्यमण्डलं, वस्थि नाभिमेढ्रान्तरालम्। ऊरूवस्थितोऽधस्तात् ग्रन्थिपर्यन्तौ, जङ्घे ग्रन्थितोऽधस्तात्—गुल्फपर्यन्ते, चरणौ-गुल्फतोऽधस्तात्तलमभिव्याप्य, करौ मणिबन्धादारभ्यान्तर्बहिरङ्गुल्य ग्रावधी, मृदा सव्यहस्तगृहीतया तावत्कटिं सकृदालिप्य प्रक्षाल्य पुनरालिप्य प्रक्षालयेत्। एवं वस्थ्यादिकमपि त्रिः। सूर्याभिमुख इति तड़ागाद्यभिप्रायम्,

"नद्यां स्रवत्सु च स्नायात् प्रतिस्रोतःस्थितो द्विजः।
तड़ागादिषु तोयेषु प्रत्यर्कं स्नान माचरेत्" ॥

इति नरसिंहपुराणवचनादिति लक्ष्मीधरः।

नद्यादावित्युपक्रम्य सूर्याभिमुख इत्यभिधानान्नद्यामपि प्रथमं मज्जनं सूर्याभिमुखमभिषेकान्ते तु प्रवाहाभिमुखमिति पारिजातादयः।

"स्रोतसां संमुखो मज्जेद्यत्रापः प्रवहन्ति वै।
स्थावरेषु गृहे चैव सूर्यसम्मुखमाप्लवेत्॥"

इति बाजसनेयि गुरु वृद्ध याज्ञवल्क्य वचनात्। सूर्याभिमुख इति तड़ागाद्यभिप्रायमित्यन्ये। स्नात्वेत्यादि, स्नात्वेत्यनेन व्यक्तिवचनान्यायात्प्रथममज्जनमेवोक्तम्। उदिदाभ्य इत्वस्य स्नात्वेत्यनेनैव प्रथमोपस्थितेनान्वयः।

अहो—विमलं जलं नद्याः कच्छे महिष इत्यत्र—नद्या जलान्वयवत्, तेनेदानीं मज्जनद्वयं पावनाच्च प्राक् निमज्योन्मज्येत्यभिधानात्तृतीयम्। तेन सर्वैकत्वेनात्र त्रीण्येव मज्जनानि। रत्नाकरोप्येवम्। स्नात्वेत्यनेन भिन्नमेव मज्जनमिति पारिजातः तन्न, व्यक्तिवचनान्यायविरोधात्, स्वोक्तमज्जनत्रित्वविरोधाच्च। उदिदाभ्य इत्युन्मज्य पुनस्तूष्णीं निमज्ज्योन्मज्य द्विराचमनमिति प्रदीपाद्यनुमतम्।

आपो अस्मानिति प्रथमं, तूष्णीं द्वितीयं, उदिदाभ्य इति तृतीयं मज्जनमिति श्रीदत्ताह्निकम्, तत्र च व्यवहितान्वयो दोषः। तत इत्यादि इमम्मे वरुण तत्त्वायामि त्वन्नोऽग्ने सत्वन्नो अग्ने इति चतसृभिः प्रत्येकं, मापो नौषधीः उदुत्तमं वरुण मुञ्चन्तु मा अवभृथ निचुम्पुण इति चतसृभिः प्रत्येकं, तथा च—मन्त्राष्टकेन प्रत्येकं हस्तेन शिरसि जलं क्षिपेत्।

अन्ते चैतत्, एतदभिषेकाष्टकमन्तेपि निमज्येति, एतत्तु मज्जनं सकृदेव। आवृत्तौ मानाभावात्। श्रीदत्ताह्निकादावत्र त्रिर्मज्जनमुक्तं तद्रत्नाकरादिविरुद्धम्, निर्बीजञ्चेति अनादेयम्। दर्भैरित्यादि। अत्राप्यादावन्ते चेति सूत्रणात्, प्रणव व्याहृतित्रयसहितया गायत्र्या आदावन्ते च मार्जनम्।

तथा चादौ सप्रणवव्याहृतित्रय गायत्र्या,तत—आपो हिष्ठेति तिस्रभिः

इदमाप इति हविष्मतीरिति देवीराप इति काषिरसीति, आपोदेवा मधुमतीरिति द्रुपदादिवेति शन्नोदेवीरिति, अपां रसमिति आपोदेवीरुपमृजेति। पुनन्तु मेत्याद्यास्तु नरपावमान्यः।

तथाहि—पुनन्तु मा पितर इति, पुनन्तु मा पितामहा इति, अग्न आयूंषीति, पुनन्तु मा देवजना इति, पवित्रेण पुनीहि मेति, यत्ते पवित्रमिति पवमान इति, उभाभ्यां देवेति, वैश्वदेवीति, चित्पतिर्मेति मन्त्रत्रयमिति कल्पतरुः, दीक्षितपावने कल्पसूत्रं चित्पतिर्मेति। पावमति प्रतिमन्त्रं अच्छिद्रेणेति सर्वत्रेति वामनपद्धतिः।

गारुण काशीखण्डयोरप्येवं, पारिजातादौत्वेकमन्त्रतैवास्योक्ता, शेषे च सप्रणवव्याहृतित्रयगायत्र्या, एवं चतुर्विंशतिमार्जनानि कृत्वा इमम्म इत्यादि मन्त्राष्टकेन पूर्ववदभिषेकाष्टकं कुर्यात्। अन्तर्जल इत्यादि ऋष्यादिकं स्मृत्वा मग्नस्त्रिरघमर्षणं रात्रि द्रुपदां वा त्रिरायंगौरितिवा त्र्यचं जपेत्, त्रिः प्राणायामं वा सशिरस्कं त्रिरोङ्कारं वा जपेदिति, सशिरसमिति विधानात्। क्वचिदन्यत्राशिरस्कोपि प्राणायाम इत्यायाति। विष्णुं वा स्मरेत्, परमात्मरूपं ध्यायेत्। एते तु विकल्पाः शक्त्यपेक्षया द्रष्टव्याः।

योगियाज्ञवल्क्यः—

"आचान्तः पुनराचामेत् मन्त्रवत्स्नानभोजने।
द्रुपदां वा त्रिरावर्त्य तथाचैवाघमर्षणम्॥
गायत्रीं वा त्रिरावर्त्य महाव्याहृतिभिस्तथा।
सोपांशुप्रणवेनापि आपः पीता अघापहाः॥"

एतच्चाचमनं निमज्जनानन्तरं मार्जनात्प्राक् काम्यम्। तदित्थं कातीयस्नान प्रयोगः।

शुचीनि मृत्तिकाद्रंगोमयकुशकृष्णतिलसुरभिपुष्पाण्यादाय जल-

समीपङ्गत्वा तत्तीरे शुचौ वस्त्रादौ पृथक् पृथक् प्रतिष्ठाय मृज्जलाभ्यां सकृद्दक्षिणं ततो वामं पादं तथा पाणी प्रक्षाल्य पवित्रोपग्रहपाणिराचम्य, ओं उरुग्वं हि राजा वरुणश्चकार सूर्याय पन्था मत्वेतवाउ। अपदे पादा प्रतिधातवेऽ करुतापवक्ता हृदयाविधश्चित्। नमो वरुणायाभिष्ठितो वरुणस्य पाशः इति तोयमामन्त्र्य—

"ओं येते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः।
तेभिर्नो अद्य सवितोत विष्णु विश्वे मुञ्चन्तु मरुतः स्वर्काः॥"

इति त्रिः प्रदक्षिणं जलमावर्त्तयेत्। ततः—

"ओं सुमित्रिया न आप ओषधयः सन्तु"

इत्यञ्जलिना जलमादायः—

"ओं दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्मः"

इति द्वेष्यं प्रति निषिञ्चेत्। ततः कटिं वस्थि उरुं जंङ्घे चरणौ करौ प्रत्येकं मृद्वारिभ्यां प्रक्षाल्य एकं पादं स्थलेऽपरं जङ्घे निधायाचम्य उदकं नमस्कृत्य,

"ओं इदं विष्णु विंचक्रमे त्रेधा निदधे पदं, समूढमस्य पाग्वंसुरे"

इति मन्त्रेण मृत्तिकया मात्राण्यालिप्य नाभिमात्रं जलं प्रविश्य—ओं आपो अस्मान्मातरः शुद्धयन्तु घृतेन नो घृतपूः पुनन्तु। विश्वग्वंहि विप्रं प्रवहन्ति देवीरिति मन्त्रेण प्रवाहे प्रवाहाभिमुखोऽन्यत्र सूर्याभिमुखो मज्जेत्, ततः ओं उदिदाभ्यः शुचिरापूत एमोति मन्त्रेणोन्मज्जेत्।

रत्नाकरमते द्वाभ्यां मन्त्राभ्यां मज्जनमेव क्रियते। अथ तूष्णीं पुनर्निमज्योन्मज्य द्विराचम्य—

"ओं मा नस्तोके तनये मान आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः।
मा नो वीरान्रुद्र भामिनो वधी र्हविष्मन्तः सदमित्वा हवामहे ॥"

इति मन्त्रेण गोमयेन गात्राण्यालिप्य —

"ओं इमम्मे वरुण श्रुधी हवमद्या च मृड़य त्वामवस्युराचके ॥
ओं तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः।
अहेड़मानो वरुणेह बोध्युरुशग्वं समान आयुः प्रमोषीः ॥
ओं त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेड़ो अवयासिसीष्ठाः।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाग्वंसि प्रमुमुग्ध्यस्मत् ॥"
"ओं सत्वन्नो अग्ने वमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ,
अवयक्ष्व नो वरुणग्वं रराणो वीहि मृड़ीकग्वं सुहवो न एधि ॥"

"ओं आपो मोषधी हिंग्वंसीर्द्धाग्नोधामो राजग्वं स्ततो वरुण नो मुञ्च,
यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥"

"ओम् उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमग्वंश्रथाय।
अथावयमादित्यव्रते तवानागसो अदितये स्याम ॥
ओं मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत।
अथो यमस्य पड्विंशात्सर्वस्माद्देव किल्बिषात् ॥
ओम् अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः।
अव देवैर्द्देवकृतमेनो यामिषमवमर्त्यैर्मर्त्यकृतं पुरुराव्णो देव विषम्पाहि ॥"

इत्यष्टाभिर्मन्त्रैः प्रत्येकं हस्तेन शिरसि जलं क्षिपेत्।

ततः तूष्णीं निमज्जेत्। ततो द्विराचम्य प्रणव व्याहृतित्रय गायत्र्या। ततः—ओम् आपोहिष्ठा मयोभुवस्तान ऊर्ज्जे दधातन। महेरणायचक्षसे, यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः। तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ आपो जनयथा च नः। ओम् इदमापः प्रवहतावद्यञ्चमल-

श्च यत्। तच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम्। आपो मा तस्मादेनसः पवमानश्च मुञ्चतु।

ततः ओं हविष्मतीरिमा आपो हविष्माँ अरिवासति। हविष्मान् देवो अध्वरे हविष्माँ अस्तु सूर्यः। ततः ओं देवीरापो अपान्नपाद्योव ऊर्मिर्हविष्य इन्द्रियावान्मदिन्तमः। तन्देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषा भागस्सु। ततः ओं कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि। समापो अद्भिरन्यतममौषधीभिरोषधीः। ततः ओम् अपो देवा मधुमतीरगृभ्णन्नूर्जस्वतीः राजस्वश्चितानाः। याभिर्मित्रावरुणावभ्यषिञ्चनाभिरिन्द्रमनयन्नत्यरातीः। ततः ओं द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव, पूतम्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः।

ततः— "ओं शन्नो देवीरभिष्टयं आपो भवन्तु पीतये।
संयोरभिस्रवन्तु नः।"

ततः ओम् अपांरसत्वद्वयसग्वं सूर्यं सन्तुग्वं समाहितम्। अपां रसस्ययो वसन्तु धों गृह्णाम्युत्तमम्। ततः ओम् आपो देवीरुपमृज मधुमतीरयक्ष्माभ्यः प्रजाभ्यः। तासामास्थातादुज्जिहता मोषधयः स्वपिप्पला। ततः ओं पुनन्तु मा पितरः सोम्यासः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः प्रवित्रेण शतायुषा। ततः ओं पुनन्तु मा पितामहाः पुनन्तु प्रपितामहा पवित्रेण शतायुषा विश्वमायु र्व्यश्नवै। ततः अग्न आयूंषि पवस आसुवोर्जमिषञ्चनः। आरे बाधस्वदुच्छुना। ततः ओं पुनन्तु मा देवजनाः पुनन्तु मनसाधिपः। पुनन्तु विश्वा भूतानि जातवेदाः पुनीहि माम्। ततः ओं पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत। अग्ने क्रत्वाक्रतूरनु। ततः ओं यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा ब्रह्म तेन पुनातु माम्। ततः ओं पवमानः सो अद्यनः पवित्रेण विचर्षणिः। यः पोता स पुनातु मा।

ततः— "ओम् उभाभ्यान्देव सवितः पवित्रेण सवेन च।
मां पुनीहि विश्वतः।"

ततः ओं वैश्वदेवी पुनती देव्यागाद्यस्यामिमावह्न्यस्त्वन्नो वीतॉपृष्ठाः। तया मदन्तः स घमादेषु वयग्वं स्याम पतयो रयीणाम्। ततः—

"ओं चित्पतिर्मा पुनात्वच्छिद्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥"

"ओं वाक्पति र्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥"

"ओं देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥"

ततः प्रणव-व्याहृतित्रय-सहित-गायत्र्या इति कुशत्रयेण चतुर्विंशतिं मार्जनानि कुर्यात्।

ततः पूर्ववत् इमम्म इत्यादि मन्त्राष्टकेन हस्तेनाष्टकृत्वः शिरसि जलं क्षिपेत्। ततो जले मग्नः सन्—

"ओ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः।
समुद्रादर्णवादधिसंवँत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी ॥
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ॥"

इति त्रिः पठेत्, अथवा—त्रि दुर्दुपदा, अथवा—त्रिरायङ्गौरिति त्र्यचम्। भूरित्यादि स्वरोमित्यन्त मन्त्रेण त्रिरावृत्तेन प्राणायामं वा त्रिः कुर्यात्, प्रणवं वा त्रिः पठेत्। परमात्मनो वा निष्फलस्य नारायणस्य स्मरणम्। यदि सिस्नाषुरप्रयतः स्यात्तदादौ स्नानं कुर्यात्। तदुक्तं योगिना—

"तूष्णीमेवावगाहेत यदा स्यादशुचिर्न्नरः ।
आचम्य च पुनः पश्चात् स्नानं विधिवदाचरेत् ॥

योगियाज्ञवल्क्यः -

"योऽसौ विस्तरशः प्रोक्तः स्नानस्य विधिरुत्तमः ।
असामर्थ्यान्न कुर्याच्चेत्तत्रायं विधिरुच्यते ॥
स्नानमन्तर्ज्जलश्चैव मार्जनाचमने तथा ।
जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनम् ।
अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः ।
स्नानाचरणमित्येतत्समुद्दिष्टं महात्मभिः ॥"

अयमर्थः—यदि देशकालासामर्थ्यादिना विस्तरं स्नानं कर्त्तुमशक्तः तदा अघमर्षणसूक्तेन त्रिरावृत्तेन जलाभिमन्त्रणतीर्थपरिकल्पनाचमन-मार्ज्जनान्तर्जलजपस्नानानि कुर्यात् । पूर्वप्रतिपन्नक्रमवत्तीर्थपरिकल्पनाद्यनु-वादेन मन्त्रमात्रविधानदत्र विपरीतेपि शब्दक्रमे पूर्वस्नानकल्पस्यैव क्रमो ग्राह्यः ।

तेन प्रथमं जलाभिमन्त्रणं ततस्तर्थपरिकल्पनम्, तत आचमनं, ततो मार्जनम् । ततोऽन्तर्जलजपः, ततः स्नानमिति लभ्यते । अत्र च स्नाने तर्पणं कात्यायनवदेव याज्ञवल्क्येन तथैव सूत्रणात्, ऋषितर्पणानन्तरन्तु तपोधन तर्पणमधिकम्—

"देवाँश्छन्दांसि वेदांश्च ऋषींश्चैव तपोधनान्"

इति तद्वचनात् । वर्हिष तर्पणानन्तरञ्च वसुरुद्रादित्यानां दिव्य पितृणाञ्च तर्पणम्, यमतर्पणन्तत्र नास्त्येवेति ।

अथ सर्वशास्त्रिकसर्ववर्णसाधारणः स्नानविधिः ।

तत्र—पद्मपुराणेः—

"अनुद्धृतैरुद्धृतै र्वा जलैः स्नानं विधीयते ।
तीर्थं प्रकल्पयेद्विद्वान् मूलमन्त्रेण मन्त्रवित् ॥
नमोनारायणायेति मूलमन्त्र उदाहृतः ।
दर्भपाणिस्तु विधिना ह्याचान्तः प्रयतः शुचिः ॥
चतुर्हस्त समायुक्तं चतुरस्रं समन्ततः ।
प्रकल्प्य वाहयेद् गङ्गामेभि र्मन्त्रै र्विचक्षणः ॥
ओं विष्णोः पाद प्रसूताऽसि वैष्णवी विष्णुपूजिता ।
पाहि नस्त्वेनसस्तस्मादाजन्ममरणान्तिकात् ॥
तिस्रः कोट्योर्द्धकोटी च तीर्थानां वायुरब्रवीत् ।
दिवि भुव्यन्तरिक्षे च तानि ते सन्ति जाह्नवि ॥
नन्दिनीत्येव ते नाम देवेषु नलिनीति च ।
वृन्दा पृथ्वी च शुभगा विश्वकाया शिवा सिता ॥
विद्यावती सुप्रसन्ना तथा लोकप्रसादिनी ।
क्षेम्या च जाह्नवी चैव शान्ता शान्तिप्रदायिनी ॥
एतानि पुण्यनामानि स्नानकाले प्रकीर्त्तयेत् ।
भवेत्सन्निहिता तत्र गङ्गा त्रिपथगामिनी ॥
सप्तवाराभिजप्तेन करसम्पुटयोजितम् ।
मूर्ध्नि कुर्याज्जलं भूयः त्रिश्चतुः पञ्च सप्त वा ॥
स्नानं कुर्यान्मृदा तद्वदामन्त्र्य च विधानतः ॥"

"अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
नमस्ते सर्वलोकानां प्रभवारणि सुव्रते ॥

आरुह्य मम गात्राणि सर्वपापैः प्रमुच्यते ॥"

अत्र चायं क्रमः। नाभिमात्रं जलं प्रविश्य– ओं नमो नारायणायेति मन्त्रेण चतुर्हस्तं चतुरस्रं पानीयं हस्तेनावच्छिद्य विष्णोरित्यादिना तत्र गङ्गामावाह्य नमोनारायणायेति मन्त्रेण सप्तधा पठितेन सप्तकृत्वः पञ्चकृत्वश्चतुस्त्रिर्वा करसम्पुटेन मूर्ध्नि जलं क्षिपेत्। ततोऽश्वक्रान्त इत्यादिना मृदमामन्त्र्य गात्राण्यालभ्य प्रवाहे प्रवाहाभिमुखोऽन्यत्र सूर्याभिमुखस्त्रिर्निमज्जेत्।

नरसिंहे –"हरिमेव स्मरन् बुद्ध्या निमज्जेच्छरवज्जले"। वशिष्ठः– "निर्मज्जेद्दण्डवत्ततः"। पौराणिकश्चविधिः –सर्ववर्ण साधारणो बाधकाभावात्। न च–

"ब्रह्मक्षत्रविशाञ्चैव मन्त्रवत्स्नानमिष्यते।
तूष्णीमेव तु शूद्रस्य सनमस्कारकं स्मृतम् ॥"

इति नरसिंह पुराणाच्छूद्रस्य सर्वमन्त्ररहितं स्नानमिति वाच्यम्, वेदमन्त्रवर्ज्जं शूद्रस्येति स्मृतिवाक्यैकवाक्यतया, तस्य वेदमन्त्रमात्रनिषेधकत्वात्। सनमस्कारकम् उदकनमस्कारसहितमिति प्राञ्चः।

मन्त्रं विनैव नमः शब्दमभिधाय शूद्रः स्नानमाचरेदिति केचित्। उद्धृतोदकेन त्वशुचिस्पृष्टेन स्नानं न कार्यम्–

"स्पर्शेनाद्भिर्दूषिताभिः उद्धृताभिश्च मानवः।
स्नानं समाचरेद्यस्तु न स शुद्ध्यति कर्हिचित् ॥"

इति योगियाज्ञवल्क्यवचनात्।

स एव – "अगम्यागमनात्स्तेयात्पापेभ्यश्च प्रतिग्रहात्।
रहस्याचरितात् पापान्मुच्यते स्नानमाचरन् ॥"

पापेभ्यः— पतितादिभ्यः ।

अथ स्नानोत्तरकर्म ।

तत्र कात्यायन :—उत्तीर्य धौते वाससी परिधाय मृदोरू करौ प्रक्षाल्याचम्य त्रिरायस्यासून् पुष्पाण्यम्बुमिश्राण्यूर्द्ध्वं क्षिप्त्वोर्द्ध्वबाहुः सूर्यमुदीक्षन् उद्वयन्तमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या यथाशक्ति बिभ्राडित्यनुवाक-पुरुषसूक्त शिवसङ्कल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेद्दर्भपाणिः स्वाध्यायञ्च यथाशक्त्यादारभ्य वेदं—नरसिंह पुराणे ।

"स्नात्वैवं वाससी धौते अक्लिष्टे परिधाय च ।
प्रक्षाल्योरू मृदाभिश्च हस्तौ प्रक्षाल्य वै मृदा ॥
अभावे धौतवस्त्रस्य शाणक्षौमाजिनानि च ।
कुतपं योगपट्टं वा द्विवासा येन वा भवेत्" ॥

तद्धारयेदिति शेषः । अक्लिष्टे—अरजकक्षालिते, असौत्रे इतिगृह्यात् ।

"ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन च ।
अधौतं तद्विजानीयाद्दैवे पित्र्ये च कर्मणि ॥"

इति वचनात्, सदृशे "अच्छिन्नाग्रं तु यद्वस्त्रं शुचि तन्मनु रब्रवीत्" इति वचनात् ।

शुष्के "नार्द्रमेकञ्च वसनं परिदध्यात्कदाचनेति" जाबालवचनात् सप्तवाताहतमपि शुष्कम् । उपवातानीति वचनात् शुष्के स्नातो वाग्यतः शुचिरहत शुक्ल द्विवासा अग्निहोत्रादि देवतार्था न कुर्यादिति हारीतवचनात् । अनग्निदग्धेऽच्छिद्रेऽस्यूते ।

"न स्यूतेन न दग्धेन पारक्येण विशेषतः।
मूषिकोत्कीर्णजीर्णेन कर्म कुर्याद्विचक्षणः ॥"

इति भारतात्। न नीलीरक्ते—

"नीलीरक्तं यदावस्त्रं ब्राह्मणोऽङ्गे निधापयेत्।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुद्ध्यति ॥"

इत्यापस्तम्बवचनात्। पट्टवस्त्रादौ तु प्रतिप्रसवः।

"कम्बले पट्टवस्त्रे च नीलीरागो न दुष्यति।"

तथा—"स्त्रीणां क्रीड़ार्थसम्भोगे शयनीये न दुष्यति।"

भृगुः—स्त्रीधृताशयने नीली ब्राह्मणस्य न दुष्यति।

नृपस्य वृद्धौ वैश्यस्य पर्वण्येवं विधारणमिति ॥

भविष्यपुराणे—

"नीलीरक्तेन वस्त्रेण यत्कर्म कुरुते द्विजः।
स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥

"वृथा तस्य महायज्ञा नीलीरक्तस्य धारणात्।"
चौममतिसीत्वक्कृतं, कुतपो—नेपालकम्बलः।

अन्यदप्युत्तरीय माह कात्यायनः—तृतीयमुपवीतं कुशरज्जुं वा। विष्णुः—स्नातः शिरो नावधूनेन्नाङ्गऽभ्यस्तोयमुद्धरेन्न तैलरसे स्पृशेन्नाप्रक्षालितं पूर्वधृतं वा वासो बिभृयात्। स्नात एव सोष्णीषे धौतवाससी बिभृयान्न म्लेच्छान्त्यजपतितैः सह संभाषणं कुर्यात्।

देहजलापनयनञ्च स्नानशाट्या पाणिना च निषिद्धम्। न तु प्रकारा-

न्तरेणापि। "स्नातो नाङ्गानि निर्मृज्यात्। स्नानशाट्या न पाणिना" इति विष्णुपुराणेन विशेषनिषेधात्। उष्णीष धारणन्तु शिरोजलापनयनाय, तदुक्तं भारते—

"आप्लुतः साधिवासेन जलेनाथ सुगन्धिना।
राजहंसनिभं प्राप्य उष्णीषं शिखिनार्पितम्॥
जलक्षय निमित्तम्वै वेष्टयामास मूर्द्धनीति ।."

जलक्षयनिमित्तमित्यभिधानाच्छिरोजलात्यये तत्त्याग इत्यर्थः।

मनुः—

"शिरःस्नातस्तु तैलेन नाङ्गं किञ्चिदुपस्पृशेत्।"

तैलेन तिलस्नेहेन किञ्चिदप्यङ्गन्तस्मिन्नहनि सशिरः स्नातः पुमान् नोपस्पृशेदित्यर्थः। पक्वतैलं न दुष्यतीति गौड़ाः। पराशरः—

"स्नात्वा निरस्य वाससोऽन्यज्जङ्घे प्रक्षालयेन्मृदा।
अपवित्रीकृते ते तु कौपीनोत्तरवारिणा॥"

कौपीनं—गुह्यम्। इदञ्च ऊर्वोर्जङ्घयोर्हस्तयोर्मृज्जलाभ्यां क्षालनं, धौतवस्त्र परिधानानन्तरं नरसिंहपुराणे—

तत आचमनं, स्नात्वेत्यनुवृत्तौ—नोत्तरीयविपर्यासं कुर्यात्। विपर्यासः उत्तरीयस्याधरीयत्वम्। अथेदानीन्तिलककरणमाचारात्। तत्र भारते—

"गङ्गातीरसमुद्भूतां मृदं मूर्ध्ना विभर्ति यः।
बिभर्त्ति रूपं सोर्क्कस्य तमोनाशाय केवलम्॥"

योगियाज्ञवल्क्यः—

"यावद्देवानृषींश्चैव पितॄंश्चैव न तर्पयेत् ।
तावन्न पीड़येद्वस्त्रं येन स्नातो न चोदके ॥
निःपीड़यति यः पूर्वं स्नानवस्त्रं तु तर्पणात् ।
निराशाः पितरस्तस्य यान्ति देवाः महर्षिभिः ॥"

पराशरः—

"ब्राह्मणं स्नातमायान्तमनुगच्छन्ति देवताः ।
पितरश्च महाभागा वायुभूता जलार्थिनः ॥
निराशाः पितरो यान्ति वस्त्रनिष्पीड़ने कृते ।
तस्मान्निःपीड़येद्वस्त्रं नाकृत्वा पितृतर्पणम् ॥
जलमध्ये तु यः कश्चिद् द्विजातिर्ज्ञानदुर्बलः ।
निःपीड़यति तद्वस्त्रं स्नानं तस्य वृथा भवेत् ॥"

अथ सन्ध्योपासनम् । याज्ञवल्क्यः—

"अतः परं प्रवक्ष्यामि सन्ध्योपासननिर्णयम् ।
अहोरात्रकृतैः पापैः यामुपास्य प्रमुच्यते ॥"

सन्ध्येति—प्राणायामं कर्म । तथा—

"त्रयाणाञ्चैव देवानां ब्रह्मादीनाञ्च सङ्गमः ।
सन्धिः सर्वसुराणाञ्च सन्ध्या तेन उदाहृता ॥

तथा—ब्रह्मणोपासिता सन्ध्या विष्णुना शङ्करेण च ।
कस्तां नोपासयेद्देवीं सिद्धिकामो द्विजोत्तमः ।
सन्ध्यात्रयन्तु कर्त्तव्यं द्विजेनात्मविदा सदा ॥"

दक्षः—"सन्ध्याहीनाऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत्कुरुते कर्म न तस्य फलमाप्नुयात् ॥"

शातातपः—"सन्ध्यामुपासते ये च सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥

"यदह्ना कुरुते पापं कर्मणा मनसाऽपि वा ।
आसीनः पश्चिमां सन्ध्यां प्राणायामैश्च हन्ति तत् ॥
यद्रात्र्या कुरुते पापं कर्मणा मनसा गिरा ।
पूर्वां सन्ध्याम् उपासीनः प्राणायामै र्व्यपोहति ॥"

याज्ञवल्क्यः—

"दिवा वा यदि वा रात्रौ यदज्ञानकृतं भवेत् ।
त्रिकालसन्ध्याकरणात्तत्सर्वं च प्रणश्यति ॥"

छन्दोगपरिशिष्टम्—

"एतत्सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम् ।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते ॥"

योगी—"सन्ध्या येन न विज्ञाता न च सन्ध्या उपासिता ।
स जीवन्नेव शूद्रः स्यान्मृतः श्वा चैव जायते ॥
अनार्त्तश्चोत्सृजेद्यस्तु स विप्रः शूद्रसन्निभः ।
प्रायश्चित्ती भवेच्चैव लोके भवति निन्दितः ॥"

विष्णुपुराणे—"सर्वकालमुपस्थाने सन्ध्ययोः पार्थिवेष्यते ।
अन्यत्र सूतकाशौच विभ्रमातुरभीतितः ॥"

गुणफलमाह–शातातपः—"अनृतं मद्यगन्धश्च दिवामैथुनमेव च ।
पुनाति वृषलस्यान्नं वह्निः सन्ध्या ह्युपासिता ॥"

योगियाज्ञवल्क्यः—"ह्रासवृद्धी तु सततं दिवसानां यथाक्रमम् ।
सन्ध्यामुहूर्त्तमात्रन्तु ह्रासे वृद्धौ समा स्मृता ॥"

मुहूर्त्त—दण्डद्वयं, सर्वर्त्तुषु प्रातः सायं सन्ध्ये इत्यर्थः ।

तथा—"सन्धौ सन्ध्यामुपासीत नास्तगे नोहिते रवौ ।"

उपक्रममाह-सम्वर्त्तः—"प्रातः सन्ध्यां सनक्षत्रामुपासीत यथाविधि ।
सादित्यां पश्चिमां सन्ध्यामर्द्धास्तमितभास्कराम् ॥"

आदित्यपदमत्र—लोहितमण्डलपरम् ।

मनुः—

"मुनयो दीर्घसन्ध्यत्वाद्दीर्घमायुरवाप्नुयुः ।
प्रजां यशश्च कीर्तिञ्च ब्रह्मवर्चसमेव च ॥"

दीर्घसन्ध्यत्वं जपातिशयात् । अङ्गिराः—

"उभे सन्ध्ये तु ये विप्रा मौनसास्ते समाहिताः ।
दिव्यं वर्षसहस्रन्तु ब्रह्मलोके महीयते ॥"

गुणफलमाह-शातातपः—

"गृहेषु प्राकृती सन्ध्या गोष्ठे दशगुणा स्मृता ।
नदीषु शतसाहस्री अनन्ता शिवसन्निधौ ॥"

प्राकृती-एकगुणा । शतादिपदं वहुतरपरम् । तेन नाग्रिमविरोधः ।
व्यासः—

"वहिः सन्ध्या दशगुणा गोष्ठप्रस्रवणादिषु ।
ख्याततीर्थे शतगुणा साहस्री जाह्नवी जले ॥"

सव्रती वहिः सन्ध्यामुपासीत। सव्रती—ब्रह्मचारी।
बहिः—ग्रामात्। नैनं ग्रामेभिनिम्नोचेत्।
सूर्यो नाभ्युदियात्क्वचिदिति मनुवचनात्।

एनं- ब्रह्मचारिणम्। अभिनिम्नो चेत्, अस्तंगच्छेत्, अभ्युदियात्—उदितोभवेत्।

"स्मृत्वोङ्कारञ्च गायत्रीं निबन्धीयाच्छिखान्ततः।
पुनराचम्य हृदयं नाभिं स्कन्धौ च संस्पृशेत्॥"

यदि सन्ध्योपासनकाले मुक्तशिखः स्यात्तदाऽनेन शिखा बन्धनीया। नतु पूर्वाप्युन्मोच्य बन्धनीया। साधारणाङ्गे प्रधानकालान्वयानियमात्।

लघुहारीतः—

"दर्भहीना च या सन्ध्या यच्च दानं विनोदकम्।
असंख्यातञ्च यज्जप्तं तत्सर्वं निःफलं भवेत्॥
आपद्यध्वन्यशक्तौ च सन्ध्यां कुर्वीत मानसीमिति॥"

स्मृति मञ्जूषालिखित-लिखितवचनादध्वादौ मानसीमपि गच्छन्ति। सन्ध्यावन्दनोपक्रमे वामे पाणौ कुशान् दक्षिणे पवित्रं कृत्वाचमनीयम्।

तदुक्तं छन्दोगपरिशिष्टे—

"सव्यपाणौ कुशान् कृत्वा कुर्यादाचमनक्रियाम्।"

तथा—"सव्यः सोपग्रहः कार्यो दक्षिणस्सपवित्रकः।"

उप समीपे गृह्यत इति व्युत्पत्त्या देशस्याकांक्षितत्वेन चावश्यक-कुशत्रय समीपेऽग्रिमकार्योपयुक्तकुशा धर्त्तव्या इत्यनेनोक्तम्। हारीतोऽपि—

"आचम्य प्रयतो नित्यं पवित्रेण द्विजोत्तमः।
नोच्छिष्टम्भवेत्तेन भुक्तशेषन्तु वर्जयेत्॥"

पवित्र लक्षणन्तु छन्दोगपरिशिष्टे—

"अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥"

द्विदलं - द्विसंख्याकं पत्रं अनन्तर्गर्भिणं अन्तर्गर्भव्यतिरिक्तं, तथाच गर्भं-गर्भि अन्तर्गर्भि च त्यक्त्वा चतुर्थं ग्राह्यं, छान्दसत्वात्पुंल्लिङ्गनिर्द्देश :—यत्र कुत्रचित् सन्ध्यावन्दनातिरिक्तेपि कर्मणि इदमेव पवित्रलक्षणम् ।

यत्तु द्विदलपत्रमेकमेव मध्यस्थस्तम्बं प्राप्तद्विदलमुच्यते, तन्न, एवं सत्येकपत्रधारणापत्तेः । नन्वेवं पत्रं लक्षयित्वा पुनः परिशिष्ट उक्तम् । पवित्रे सन्यासपद्धतिलिखितं वाक्यं पठन्ति ।

"सव्यापसव्य वलितं ब्रह्मग्रन्थिसमन्वितम् ।
लङ्घयेत्पर्वमेकन्तु द्विपर्वान्नैव लङ्घयेत् ॥"

कुशाश्चरन्ति न्यूनपरिमाणा गोकर्णमात्रा वा । ह्रस्वा प्रचरणीयाः स्युरिति वचनात् । गोकर्णमात्रारहिताः कुशाः साग्राः समूलका इति वायु-पुराणवचनाच्च ।

अत्र च न हरितादिवर्णविशेषादरः । हरितायज्ञियादर्भा इत्याद्युप-क्रम्य, दर्भाः पवित्रमित्युक्तमतः सन्ध्यादिकर्मस्वित्येतद्वचनाद्वर्णापुरस्कार-प्रतीतेः । सन्ध्यावन्दनं वाजसनेयिनां स्थल एव । उत्तीर्य—धौते वाससी परिधाय । मृदोरूकरौ प्रक्षाल्याचम्येति कात्यायनसूत्रे स्फुटमभिधानात् ।

योगियाज्ञवल्क्यः—

यद्येन ऋषिणादृष्टं सिद्धिः प्राप्ता च येन वै ।
मन्त्रेण तस्य तत्प्रोक्तमृषे र्मावस्तदार्षकम् ॥
छादनाच्छन्द उद्दिष्टं वाससी इव चाकृतेः ।
आत्मा संछादितो देवै र्मृत्योच्छीतैस्तु वै पुरा ॥

आदित्यै र्वसुभी रुद्रैस्तैनच्छन्दांसि तानि वै ।
यस्य यस्य तु मन्त्रस्य उद्दिष्टा या तु देवता ॥"

"तदाकारं भवेत्तस्य देवत्वं देवतोच्यते ।
पुराकल्पे समुत्पन्ना मन्त्राः कर्मार्थमेव च ॥
अनेनेदन्तु कर्त्तव्यं विनियोगः स उच्यते ।
आर्षं छन्दश्च दैवत्यं विनियोगस्तथैव च ॥
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः ।
अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपम् ॥
होममन्तर्जलादीनि तस्य चाल्पं फलं भवेत् ॥"

तथा— अघमर्षण सूक्तस्य ऋषिरेवाघमर्षणः ।
आनुष्टुभं भवेच्छन्दो भाववृत्तस्तु दैवतम् ।
अश्वमेधावभृथे विनियोगोस्य कल्पितः ॥"

भावः—सृष्टिः । तत्रवृत्तः प्रवृत्तः ब्रह्मेत्यर्थः ।

तथा— ऐशान्यभिमुखो भूत्वा शुचिः प्रयतमानसः ।
आचान्तः पुनराचामेदृतमित्यभिमन्त्रितम् ।
आन्तरं शुद्ध्यति ह्येवमन्नपानमलीकृतम् ॥

ऋतमित्याद्यघमर्षणसूक्तम् ।

तथा—

"त्रिरावर्त्य तु सावित्रीं प्रणवं व्याहृतीस्तथा ।
मार्जनञ्च ततः कृत्वा आपोहिष्ठेति मार्जयेत् ॥
सार्द्धामृचञ्च प्रक्षिप्य उद्धृर्वं सार्धां समुत्क्षिपेत् ।
अधोभागविसृष्टा या असुरा यान्ति संक्षयम् ॥

सर्वतीर्थाभिषेकश्च ऊर्द्ध्वं सम्मार्जनाद्भवेत् ।
अघमर्षणसूक्तेन मार्जनं कारयेत्ततः ॥
शन्न आपस्तु द्रुपदा कामतः संप्रयोजयेत् ।
एवं सम्मार्जनं कृत्वा बाह्यशुद्ध्यर्थकारणम् ॥"
"तथाभ्यन्तरशुद्ध्यर्थं प्राणायामं समाचरेत् ।"

त्रिरावृत्तया प्रणवव्याहृतित्रयसहितगायत्र्या एकं मार्जनं आपोहिष्ठेति त्र्यृचस्य प्रथमार्द्धेन दर्भैर्ज्जलमधः क्षिप्त्वाऽपरार्द्धेनापरम्मार्ज्जनं कुर्यात् । अघमर्षण सूक्तेन तृतीयम् । शन्न आपो धन्वन्याशन्नो भवन्तनूप्याः । शन्नः समुद्रिया आपः शन्नो भवन्तुकूप्याः । इति कल्पतरु श्रौदत्ताह्निकादयः ।

योगी—

"ओंकारः परमं ब्रह्म सर्ववर्णेषु नायकः ।
प्रजापतेर्मुखोत्पन्न स्तपः सिद्धस्य वै पुरा ॥
तेनोपाचमतस्तस्य ब्रह्मर्षिश्च स्वयंभुवः ।
गायत्री तु भवेच्छन्दः अग्निर्देवतमुच्यते ॥
आदौ सर्वत्र युञ्जीत विधिरेष्वेव कर्मसु ।
विनियोगः समुद्दिष्टः श्वेतोवर्ण उदाहृतः ॥
व्याहृतीनाञ्च सर्वासामार्षश्चैव प्रजापतिः ।
सप्तच्छन्दांसि यान्यासां तानिसम्यक् प्रवर्त्तयेत् ॥
गायत्र्युष्णिगनुष्टुब्बृहती पङ्क्तिरेव च ।
त्रिष्टुप् च जगती चैव छन्दांस्येतानि सप्त वै ॥"

"अग्निर्वायुस्तथादित्यो बृहस्पत्याप एव च ।
इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः ॥

अनादिष्टेषु सर्वेषु प्रायश्चित्तेषु सर्वशः ।
प्राणायामप्रयोगे च विनियोग उदाहृतः ॥"

"सविता देवता यस्या मुखमग्निस्त्रिपाच्चया ।
विश्वामित्रऋषिश्छन्दो गायत्री सा विशिष्यते ॥
विनियोगोपनयने प्राणायामे तथैव च ॥"

तथा—

"ओमापोज्योतिरित्येष, मन्त्रो यस्तु प्रकीर्त्यते ।
तस्य प्रजापतिश्चार्षं यजुश्छन्दो विवर्जितम् ॥
ब्रह्माग्निवायुसूर्याश्च देवताः समुदाहृताः ।
प्राणस्यायमने चैव विनियोग उदाहृताः ॥
पूर्वा सन्ध्या तु गायत्री सावित्री मध्यमा स्मृता ।
या भवेत्पश्चिमा सन्ध्या विज्ञेया सा सरस्वती ॥
रक्ता भवति गायत्री, सावित्री श्वेतवर्णिका ।
कृष्णा सरस्वती ज्ञेया सन्ध्यास्तिस्र उदाहृताः ॥"

एतेन प्रथममृक्तरूपा सन्ध्या ध्येयेत्युक्तम् । जपकाले तु गायत्र्या यद्ध्यानं तत्सन्ध्यात्रयेपि, श्वेताया एवेति वक्ष्यते । बृहस्पतिः—बद्ध्वासनं नियम्यासून् स्मृत्वा ऋष्यादिकन्ततः । सन्निमीलित दृङ्मौनी प्राणायामान् समभ्यसेत् । आसनं—पद्मस्वस्तिकादीनि ।

"पद्ममर्द्धासनंवापि तथा स्वस्तिकमासनम् ॥"

इति वायुपुराणाद्युक्तम् । स्वमिति पाठः । तत्र—स्वमात्मानमित्यर्थ इत्यन्ये ।

छन्दोगपरिशिष्टे—

"रक्षान्ते वारिणात्मानं परिक्षिप्य समन्ततः ।"

अन्ते—पूर्वोक्ताचमनान्ते । आत्मानं वारिणा परिक्षिप्य रक्षाकार्ये-त्यर्थः । इयञ्च रक्षा प्राणायामात्प्रागेव । अनेनैव तदनन्तरं प्राणायामकथनात् ।

प्राणायामे याज्ञवल्क्यः —

"गायत्रीं शिरसा सार्द्धं पठेद् व्याहृतिपूर्विकाम् ।
प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः ॥
भूराद्यास्तिस्र एवैता महाव्याहृतयोव्ययाः ।
महर्जनस्तपः सत्यं गायत्री च शिरस्तथा ॥
प्रतिप्रतीकंप्रणवमुच्चार्यं च शिरस्ततः ।
एता एतां सहानेन तथैभि र्दशभिस्सह ।
त्रिजपेदायतप्राणः, प्राणायामः स उच्यते ॥"

प्रति प्रतीकं—सप्तव्याहृति गायत्री शिरसां नवानामादौ । नवोङ्काराः शिरसोऽन्ते चैक उच्चार्यः ।

एताः सप्तव्याहृतीः एतां गायत्रीं अनेनशिरसा एभिर्दशभिरोङ्कारैश्च सह, आयतप्राणो—नियतवायुः सन् त्रिर्मनसा जपेत् । सोऽयं जपः प्राणायाम-संज्ञक इत्यर्थः । शिरस्तु-आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरिति तत्रैवोक्तम् ।

योगी—

पूरक कुम्भक रेचकैः प्राणायामस्त्रिलक्षणः ।
नासिकाकृष्टा उच्छ्वासो ध्मातः पूरक उच्यते ॥
कुम्भको निश्चलश्वासो रिच्यमानस्तु रेचकः ।
नीलोत्पलदलश्यामं नाभिदेशे प्रतिष्ठितम् ।
चतुर्भुजमहात्मानं पूरकेणैव चिन्तयेत् ॥

"कुम्भके च हृदिस्थाने ध्यायेच्च कमलासनम् ।
ब्रह्माणं गौरसर्वाङ्गश्चतुर्वक्त्रं पितामहम् ॥
रेचके चेश्वरं विद्याल्ललाटस्थं महेश्वरम् ।
शुद्धस्फटिकसङ्काशं निर्मलं पापनाशनम् ॥"

गौरपदमत्र रक्तपरम् । रक्तं प्रजापतिं ध्यायेदिति व्यासवचनात् ।

"आदानं रोधमुत्सर्गं वायोस्त्रिस्त्रिः समभ्यसेत् । ब्राह्मणं केशवं शम्भुं ध्यायेद्देवाननुक्रमादिति व्यासोक्तं पक्षान्तरम् । तथा—

"पूरके विष्णुसायुज्यं कुम्भके ब्रह्मणोन्तिकम् ।
रेचकेन तृतीयेन गमयेदैश्वरं पदम् ॥
प्राणायामा ब्राह्मणेन त्रयोपि विधिवत्कृताः ।
व्याहृतिप्रणवैः सार्द्धं विज्ञेयाः परमं तपः ॥"

पुनर्याज्ञवल्क्यः—

"प्राणस्यायमनं कृत्वा आचामेत्प्रयतोपि सन् ।
आन्तरं विद्यते यस्मात्तस्मादाचमनं स्मृतम् ॥

हेतुमन्निगदस्वरसादन्यत्रापि प्राणायामानन्तरमाचमनम् । सैद्यायणीय-गृह्यपरिशिष्टम्—

"प्रातः सूर्यश्चमेत्युक्त्वा सायमग्निश्चमेति च ।
आपः पुनन्तु मध्याह्ने कुर्यादाचमनं तथा ॥
प्राणानायम्य संप्रोक्ष्य ऋचेनाब्दैव तेन तु ।
शिरसो मार्जनं कुर्यात्कुशैः सोदकबिन्दुभिः ॥"

अत्र विभागमाह व्यासः—

"विष्णुपोष्टौ क्षिपेन्मूर्ध्नि भूमौ यस्यचयाय च ।"

एतत्त्रयृचस्य देवतादिकमाह याज्ञवल्क्यः—

"सिन्धुद्वीपं भवेदार्षं गायत्र्यश्छन्द उच्यते ।
आपस्तु दैवतं प्रोक्तं विनियोगस्तु मार्जने ॥
सर्वत्र पावनं कर्म अक्लिङ्गानामुदाहृतम् ॥
पावनं मार्जनम्, अक्लिङ्गानाम् आपोहिष्ठेत्यादीनाम् ।
कोकिलो राजपुत्रस्तु द्रुपदादार्षमुच्यते ।
अनुष्टुभं भवेच्छन्द आपश्चैव तु दैवतम् ।
सौत्रामण्यवभृथके स्नाने तद्विनियोजनम् ।
अपः पाण्योः समादाय त्रिः पठेद्द्रुपदामृचं ॥"

ततोयं मूर्ध्नि विन्यस्य सर्वपापै प्रमुच्यते ॥ एवञ्चैव पाटिकक्रमादेव-मार्जनानन्तरं द्रुपदापाठः । छन्दोगपरिशिष्टे—

"करेणोद्धृत्य सलिलं घ्राणमासज्य तत्र च ।
जपेदनायता स्वर्चां त्रिः सकृद्वाघमर्षणम् ॥"

वाकार स्वरसादायता स्वर्चा जपेत् । त्रिः सकृद्वेति शक्त्यपेक्षया विकल्पः । अयञ्चाघमर्षणजपो मार्जनोत्तरं श्रुतोपि मार्जनद्रुपदयो र्याज्ञवल्क्ये—नामन्तर्यकथनाद्द्रुपदानन्तरं द्रष्टव्यः, तथैवाचाराच्च ।

मार्जनानन्तरं शङ्खः—

"उपस्पृशेत्ततः पश्चान्मन्त्रेणानेन धर्मतः ।
अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।
त्वं यज्ञस्त्वं वषट्कार आपोज्योतीरसोमृतम् ।

एतच्चाचमनं मार्जनानन्तरं श्रुतमपि ऋष्यन्तरोक्ताघमर्षणानन्तरं कार्यं शङ्खेनाप्येतदनन्तरं सूर्याञ्जल्यभिधानात् ।

छन्दोगपरिशिष्टे—

"उत्थायार्कं प्रतिप्रोहे त्रिकेणाञ्जलिमम्भसः ।
प्रणवो भूर्भुवःस्वश्च सावित्री च तृतीयिका ॥"

उक्तेनैव त्रिकेणाञ्जलिमर्कं प्रतिप्रोहेत् क्षिपेदित्यर्थः । अञ्जलावेकत्वञ्च विवक्षितम्, विधेयगतसंख्यात्वात् । जलक्षेपादिफलं तैत्तरीयश्रुतौ । ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां गायत्र्यभिमन्त्रिता अप ऊर्द्ध्वं विक्षिपन्ति ता आपो वज्रीभूत्वा तानि रक्षांसि, सन्देहान्वारुणे द्वीपे प्रक्षिपन्ति । यत्प्रदक्षिणं प्रकामन्ति, तेन पाप्मानमवधुन्वन्त्युदयन्तमस्तंयान्तमादित्यमभिध्यानं कुर्वन् । ब्राह्मणो विद्वान् सकलं भद्रमश्नुत इति ।

कात्यायनः—

पुष्पाण्यम्बुमिश्राण्यूर्द्ध्वं प्रक्षिप्योर्द्ध्वबाहुः । सूर्यमुदीक्षन्नुद्वयमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च यथाशक्ति । सूयमुदीक्षन्निति, सूर्यमुद्दिश्य पश्यन्नित्यर्थः । तेन मेघादिछन्नेप्युपस्थानसिद्धिः ।

व्यासः— "चित्रन्देवेति च ऋच ऋषिः कौत्स उदाहृतः ।
त्रिष्टुप् छन्दो दैवतञ्च सूर्योस्याः परिकीर्तितम् ।
अग्निष्टोम उपस्थाने विनियोगस्तथैव च ॥"

उपस्थानक्रममाह छन्दोगपरिशिष्टम्—

"तदसंसक्तपार्ष्णिर्वा एकपादर्द्धपादपि ।
कुर्यात्कृताञ्जलिर्वापि ऊर्द्ध्वबाहुरथापि वा ॥"

तत उपस्थानम्, असंसक्तपार्ष्णिःभूम्यसंसक्तोभयगुल्फभागः कृताञ्जलिरिति सायं प्रातर्विषयं, कात्यायनेनैव मध्याह्न ऊर्द्ध्वबाहुत्व विधानात् ।

योगी—

"अथोपतिष्ठेदादित्यं मूर्ध्नि पुष्पान्विताञ्जलिः ।
प्रक्षिप्योदकमुद्वयन्तमुदुत्यं चित्रमित्यपि ॥
तच्चक्षुर्देव इति च हंसः शुचिषदित्यपि ।
एतज्जपेद्ध्वर्वबाहुः सूर्यं वीक्ष्य समाहितः ॥
गायत्रीञ्च यथाशक्ति सर्वपापप्रणाशिनीम् ।
आगच्छ वरदे देवि जपे मे सन्निधी भव ॥
गायन्त त्रायसे यस्माद् गायत्री त्वं ततः स्मृता ॥

गायत्रीजपे स एव—

"प्रणवो भूर्भुवः स्वश्च अङ्गानि हृदयादयः ।
शिरावर्त्यं ततः पश्चादार्षं छन्दश्च दैवतम् ॥
विनियोगस्तथारूपं ध्यातव्यं क्रमशस्तु वै ।"

प्रणवादीनि हृदयादिषु त्रिर्विन्यस्य ऋष्यादिस्मृता गायत्री ध्येयेत्यर्थः ।

तद्रूपमाह स एव—

"श्वेतवर्णां समुद्दिष्टा कौशेयवसना तथा ।
श्वेतैर्विलेपनैः पुष्पैरलङ्कारैश्च भूषिता ॥
आदित्यमण्डलस्था च ब्रह्मलोकगताथवा ।
अक्षसूत्रधरादेवी पद्मासनगता शुभा ॥
आवाह्य यजुषानेन तेजोसीति विधानतः ।
तत्रावाह्य जपित्वा च नमस्कृत्य विसर्जयेत् ॥"

अत्र चावाहनानन्तरं जपात्प्रागेव गायत्र्या उपस्थानं ब्राह्मणेन । तदुक्तं शतपथे, तस्या उपस्थानम्—

गायत्र्यस्येकपदी द्विपदी त्रिपदी चतु.पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो मा प्रापदिति। अत्र इतिना व्यवच्छेदनात्, प्रापस्पर्यन्त उपस्थानमन्त्र इति शङ्कराचार्य भास्कराचार्ययोर्व्याख्या।

बोधायनः —

उपतिष्ठेद् गायत्रीं देवीन्तुरीयपदेनाथाप्युदाहरन्ति। गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुःपद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजस इत्यथैनां जपति। अत्र यद्यपि परोरजस इत्यनन्तरमपि शतपथे सावदोमा प्रापदितिरूपो मन्त्रस्य शेषः श्रूयते। तथापि तस्य नेह विनियोगो बोधायनेन व्यवच्छेदनात्, इति श्रीदत्ताह्निकम्। अन्ये तु एतत्सूत्रस्य लक्ष्मीधराद्यलिखितत्वेन निर्मूलत्वम्।

समूलत्वे वा बोधायनस्य तैत्तिरीयसूत्रकारत्वेन शतपथस्य च माध्यन्दिनानां शतपथोक्त एव मन्त्रो ग्राह्य इत्याहुः।

यत्तु—

"गायत्र्यस्येकपद्याद्यैरुपस्थाय ततो जपेत्।
उपस्थाय तुरीयेण तेनैव च विसर्जयेत्॥"

अष्टाक्षरं पदं तत्तु परोरजसे सावदोमिति मन्त्रप्रकाशानुसारात् सावदोमित्यन्त एवायं मन्त्र इति तन्न, शतपथविरोधात्।

"अजपां नाम गायत्रीं जीवो जपति सर्वदा।
हंस इति तन्मन्त्रं स च पादश्चतुर्थकः॥"

इति काशीखण्ड विरोधाच्च। जप्यमाह योगी याज्ञवल्क्यः—

"ओंकारं पूर्वमुच्चार्य भूर्भुवःस्वस्ततःपरम्।
गायत्री प्रणवश्चान्ते जप्ये ह्येवमुदाहृता।

गायत्र्यग्निमुखी प्रोक्ता तस्मादुत्थायतां जपेत् ।"

बृहस्पतिः—

"मार्जनं जलमध्ये तु प्राणायामो यतस्ततः ।
उपस्थानं ततः पश्चात् गायत्रीजप उच्यते ।
कदाचिदपि नो विद्वान् गायत्रीमुदके जपेत् ॥"

मार्जनं स्नानाङ्गमत्र । यतस्ततः—जले, स्थले वा । एवञ्च—प्राणायामोपस्थानयोः सन्ध्यान्तर्गतयोरुभयत्र विधानादुपस्थानपर्यन्ता सन्ध्या जलेऽप्यस्यमते । गायत्री जपस्तु स्थल एव सर्वेषांनियत इत्यवसीयते ।

यमः— "सहस्रपरमां देवीं शतमध्यां दशावरां ।
गायत्रीन्तु जपेन्नित्यं सर्वपापप्रणाशिनीम् ॥"

गायत्रीं जपेदित्यनुवृत्तौ वौधायनः । अपरिमितकृत्वो वा । सहस्राभ्यन्तरएव पञ्चाशद्विंशत्यादिकृत्वो वा जपेदित्यर्थः । हारीतः—

प्रणवो—व्याहृतिः सावित्री चेति । सावित्रं येन पापेभ्यो मुच्यते । शतं जपत्वामानसात्पूतो भवति । सहस्रं जपत्वा वाक्कृतात्पूतो भवति । दशसहस्राणि जपत्वा सर्वतः पूतात्मा भवतीति । मनुः—

"एतदक्षरमेतान्तु जपेद्व्याहृति पूर्विकाम् ।
सन्ध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते ॥"

याज्ञवल्क्यः—"जपन्नासीत सावित्रीम्प्रत्यगातारकोदयात् ।
सन्ध्यांप्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् ॥"

प्राङ्मुखेन प्रातः सन्ध्यायामूर्द्ध्वजानुना अर्कदर्शनपर्यन्तं सायं सन्ध्यायां सम्यङ्नक्षत्र दर्शनपर्यन्तं उपविष्टेन प्रत्यङ्मुखेन सावित्री जप्येत्यर्थः ।

एवञ्च—प्रातः सायमङ्गन्यासयोर्यथासंख्यं प्राङ्मुखस्योर्द्ध्वजानोः प्रत्यङ्मुखोपविष्टस्य चाधिकारो जपाङ्गतया तदिति कर्त्तव्यतालाभाभिति द्रष्टव्यम्। मध्याह्नजपेतु सूर्याभिमुखत्वं तिष्ठंश्चेद्वीक्ष्यमाणोऽर्कं जपङ्कुर्यात्समाहितः। इति योगियाज्ञवल्क्यवचनात्।

शंखः- कुशवृष्यां समासीनः कुशोत्तरायां वा कुशपवित्रपाणिरुदङ्मुखः सूर्याभिमुखो वा अक्षमालामादाय देवतां ध्यायन् जपं कुर्यात्। सुवर्ण-मणि-मुक्ताफल-स्फटिक-पद्माक्षेन्द्राक्ष-रुद्राक्ष-पुत्रजीवकादन्यतमामक्षमालां कुर्यात्। कुशग्रन्थियुताम्वा हस्तोपयामो गणयेदादौ। देवतामार्षं छन्दश्च स्मरेत्।

वृषी—लघ्वासनं, हस्तोपयाम—ऽङ्गुलीनमनम्। अत्र स्फटिकादारभ्योत्तरोत्तरामाणाश्रेष्ठा। स्फटिकेत्याद्युपक्रम्य,

"कोट्यादिका भवेद्वृद्धिरक्षमाला विशेषतः।
जपस्य क्रियमाणस्य तस्माच्छ्रेष्ठोपरापरेति॥"

योगियाज्ञवल्क्यवचनात्। प्रवालेनाप्यक्षमाला कार्या। प्रवालैस्तु सहस्रकमिति शिवपुराणवचनात।

अक्षमालाया अभावे याज्ञवल्क्यः—

"अभावे त्वक्षमालायाः कुशग्रन्थ्या पाणिना।
जप एवं हि कर्त्तव्य एकाग्र मनसैव हि॥"

नरसिंह पुराणे—

"त्रिविधो जपयज्ञः स्यात्तस्य भेदं निबोधत।
वाचिकश्च उपांशुश्च मानसश्च त्रिधामतः॥
त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः।
यदुच्चनीचस्वरितैः स्पष्ट शब्दपदाक्षरैः॥

मन्त्रमुच्चारयेद्यत्तं जपयज्ञः स वाचिकः ।
शनैरुच्चारयेन्मन्त्रमोपदोष्ठौ प्रचालयेत् ।
किञ्चिच्छब्दं स्वयं विद्यादुपांशुः स जप स्मृतः ।

ध्येया यदक्षरश्रेण्यो वर्णाद्वर्णं पदात्पदम् ।
शब्दानुचिन्तनाभ्यासः स उक्तो मानसो जपः ॥
ध्यायेत्तु मनसा मन्त्रान् जिह्वोष्ठौ न विचालयेत् ।
न कम्पयेच्छिरोग्रीवं दन्तान्नैव प्रकाशयेत् ॥

एतन्मानस—विषयम् ।

तथा— "जप्ये नैव हि संसिद्ध्येद् ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥"

मैत्री—मित्रदेवताका वाक् । गायत्री, तत्प्रधानो मैत्रः ।

तथा— "न चंक्रमन्न च हसन्न पार्श्वमवलोकयन् ।
नापाश्रितो न जल्पश्च नापावृतशिरास्तथा ॥
न पदापदमाक्रम्य न चैव हि तथा करौ ।
न चासमाहितमना न च संश्रावयन् जपेत् ॥
प्रच्छन्नानि च दानानि ज्ञानञ्च निरहङ्कृतम् ।
जप्यानि च सुगुप्तानि तेषां फलमनन्तकम् ॥

"उपांशु जपयज्ञस्य फलं शतगुणं भवेत् ।
साहस्रो मानसः प्रोक्तो यस्मान्न च समो हि सः ॥"

अपाश्रितः—आवर्जिताङ्गः । स्तम्भादाविति शेषः । अपावृतशिराः—आवृतमस्तकः । तथाकरौ करावपि न पदाक्रम्य । तथा—

"न क्लिन्नवासा स्थलगो जपादीनाचरेद् बुधः ।
धृतोद्धते नादुर्द्रवासा नैकवासा ऽकथञ्चन ।
न जीर्णेन मलिनेन परिक्लिन्नेन वा जपेत् ।
यक्ष-राक्षस-भूतानि-सिद्धविद्याधरागणाः ॥
हरन्ति प्रसभं यस्मात्तस्माद् गुह्यञ्च कारयेत् ।
जपकाले न भाषेत व्रतहोमादिकेषु च ॥
एतेष्वेवावशक्तन्तु यद्यागच्छेद् द्विजोत्तमः ।
अभिवाद्य ततो विप्रं योगक्षेमञ्च कीर्त्तयेत् ।
तूष्णीमासीत् च जपं चाण्डाल-पतितादिकम् ॥"

अवसक्तं—प्रवृत्तं । योगक्षेम कीर्त्तनञ्च दन्तसन्धाने सत्येव । इन्ती दन्तान् सन्धायान्तर्मुख एव यावदर्थमभिभाषेतेति, तेनैवाभिधानादिति द्रष्टव्यम् ।

तदपि संस्कृते तेनैव न म्लेछित वैनाभाषित वै इति श्रुतेः ।

मनुः— "ओंकार पूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो मुखम् ॥"

शंखः— सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः ।
सुरापश्च विशुद्ध्यन्ति लक्षजापान्नसंशयः ॥
प्राणायामत्रयं कृत्वा कल्पं कल्पं समाहितः ।
अहोरात्रकृतात्पापात् तत्क्षणादेव हीयते ॥
सव्याहृतिस-प्रणवाः प्राणायामास्तु षोडश ।
अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः ॥"

भ्रूणस्तु—एकां शाखामधीत्य श्रोत्रियो भवति, साङ्गामधीत्य भ्रूण इति बौधायनोक्तः ।

यमः—

"गायत्रीञ्चैव वेदाँश्च तुलया तोलयेत्प्रभुः।
एकतश्चतुरोवेदान् साङ्गाँश्च सपदक्रमान् ॥
एकतश्चैव गायत्रीं तुल्यरूपा तु सा स्मृता।"

ओंकारं व्याहृतित्रयं सावित्रीञ्च स्तुत्वा मनुः :—
"सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः।
महतोप्येनसस्तस्मात्त्वचेवाहि विमुच्यते ॥"

लघुहारीतः—

"जपे होमे तथा दाने स्वाध्याये पितृतर्पणे।
अशून्यन्तु करं कुर्यात् सुवर्णरजतैः कुशैः ॥"

अत्र— सुवर्णरजतैरिति बहुवचनमेकस्यैव सुवर्णस्य रजतस्य च धारणेप्युपपद्यते। सुवर्णत्वरजतत्वजात्योरवयवावयविवृत्तत्वात्। कुशैरिति तु न न्यायात्त्रित्वपर्यवसितं, तत्र सुवर्णधारणं दक्षिणानामिकायां "अनामिकायां तद्धार्यं दक्षिणस्य करस्य चेति"—हेमधारणप्रकरणस्थ देवीपुराणवचनात्।

तत्समभिव्याहृत-रजतकुशधारणमपि तत्रैव, न तु तर्जन्यां रजतन्धार्यमिति वाक्यबलाद्रजत धारणंतर्जन्यां, तस्य कल्पतरुकारादिभिः सर्वैरेवानादरणेनाप्रामाण्यावसायादिति। उशनाः—

"न वेष्टितशिरा न कृष्णवासा देवपितृकार्यं कुर्यात्।" गायत्रीजपानन्तरं कात्यायनः—विभ्राडित्यनुवाक-पुरुषसूक्तशिवसङ्कल्पमण्डलब्राह्मणैरित्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्योपविशेद्दर्भेष्विति।

बिभ्राड्वृहदित्यादयः सप्तदश ऋचः, पुरुषसूक्तं सहस्रशीर्षेत्यादि षोड़श ऋचः, शिवसङ्कल्पः—यज्जाग्रतोदूरमित्यादि षड्ऋचः, मण्डल ब्राह्मणं यदेतन्मण्डलं तप-

तीत्यादि त्रयोविंशतिः कण्डिका । अयञ्च जपः काम्यः—

"सन्ध्यात्रयेप्युपस्थानमेतदाहुर्मनीषिणः ।
मध्याह्न उदये वापि विभ्राडादीच्छया जपेत् ॥"

इति छन्दोगपरिशिष्टवचनात् । तथा च नियमतो गायत्रीं जपित्वा कामनापक्षे एतानि जपित्वा प्रदक्षिणीकृत्य तूष्णीमेव गायत्रीं नमस्कृत्य दर्भोपस्तृते आसने उपविशेदिति कात्यायनसूत्रार्थः । उदये वापीत्यभिधानात् उदयमात्रानन्तरमपि मध्याह्नसन्ध्यावन्दनमिति पारिजातः । अत्र च ऋष्यादिस्मरणे छन्दप्रयोगो न कार्यः मानाभावादसम्बन्धव्यवायापत्तेश्च ।

अथ सन्ध्याप्रयोगः

तत्रोपवीति बद्धशिख आसने कुशोपर्यैशानाभिमुख उपविष्टः पादौ प्रक्षाल्य वामे पाणौ सपिञ्जलान् समूलान् गोकर्णमात्रानूनातिदीर्घान् बहून् कुशान् कृत्वा दक्षिणे यथोक्तपवित्रं निधायासन त्यक्त्वा द्विराचम्य "अघमर्षणसूक्तस्याघमर्षण ऋषिरनुष्टुप् छन्दो भाववृत्तो देवताऽश्वमेधावभृथे विनियोगः ।" इति स्मृत्वा "ओं ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः समुद्रादर्णवादधिसम्वत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ।" इत्यपोभिमन्त्र्य द्विराचामेत् ।

ततः प्रातर्गायत्रीनाम्नीं रक्ता, मध्याह्ने सावित्रीनाम्नीं श्वेतां, सायं सरस्वतीनाम्नीं कृष्णां स्त्र्याकारां सन्ध्यां ध्यात्वा ततः "ओंकारस्य ब्रह्मऋषिर्गायत्री छन्दाग्निर्देवता शुक्ला वर्णः सर्वकर्मारम्भे विनियोगः । सप्तव्याहृतीनां प्रजापति ऋषि र्गायत्र्युष्णिगनुष्टुब् बृहतीपंक्ति त्रिष्टुब् जगत्यश्छन्दांस्यग्निवाय्वादित्य बृहस्पति वरुणेन्द्र विश्वेदेवा देवता अनादिष्ट प्रायश्चित्ते प्राणायामे विनियोगः । गायत्र्या विश्वामित्र ऋषिर्गायत्रीछन्दः सविता देवतोपनयने प्राणायामे विनियोगः । शिरसः प्रजापतिऋषि र्ब्रह्माग्निवायुसूर्या देवताः

प्राणायामे विनियोगः।" इति ऋष्यादिकं स्मृत्वा आत्मानं वारिणा वेष्टयित्वा सकुशत्रयासनस्थो बद्धासनो निमीलितनयनो मौनी प्राणायामत्रयं कुर्यात्। तत्र—वायोरादानकाले पूरकनामा प्राणायामः। तत्र—श्यामं चतुर्भुजं विष्णुं नाभौ ध्यायेत्। धारणकाले कुम्भकः, तत्र—कमलासनं रक्तवर्णं चतुर्मुखं ब्रह्माणं हृदि ध्यायेत्। त्यागकाले रेचकः, तत्र—श्वेतं त्रिनेत्रं शिवं ललाटे ध्यायेत्। त्रिष्वप्येषु त्रिस्त्रिर्मानसो जपः। मन्त्रस्तु—"ओं भूः ओं भुवः ओं स्वः ओंमहः ओंजनः ओंतपः ओंसत्यम् ओं तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात्। ओं आपो ज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोम्" एवं रूपः।

ततः—सूर्यश्चमेति-ब्रह्म ऋषिः प्रकृतिश्छन्दः सूर्यो देवता प्रातराचमने विनियोगः। इति स्मृत्वा ओं सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु। यत्किञ्चिद् दुरितम्मयि इदमहम्माममृतयोनौ सूर्यज्योतिषि जुहोमि स्वाहा। इति प्रातः सन्ध्यायामाचामेत्।

आपः पुनन्त्विति विष्णुऋषिरनुष्टुप् छन्द आपो देवता आचमने विनियोगः। इति स्मृत्वा—ओं आपः पुनन्तु पृथिवीं पृथ्वी पूता पुनातु मां पुनन्तु ब्रह्मणस्पति र्ब्रह्मपूता पुनातु माम्। यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनन्तु मामापोऽसताञ्च प्रतिग्रहग्वं स्वाहा। इति मध्याह्न आचामेत्।

अग्निश्चमेति रुद्रऋषिः प्रकृतिश्छन्दो ऽग्निर्देवता आचमने विनियोगः। ओं अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पदभ्यामुदरेण शिश्ना अहस्तदवलुम्पतु। यत्किञ्चिद् दुरितं मयि इदमहम्माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा। इति सायमाचामेत्।

ततः आपोहिष्ठेत्यादि त्र्यृचस्य सप्तभिः पादैः शिरसि, अष्टमेन भूमौ, नवमेन शिरसि, कुशत्रयेण शिरसि, जलं निःक्षिपेत्। आपोहिष्ठेत्यादि त्र्यृचस्य

सिन्धुद्वीप ऋषिर्गायत्रीछन्द आपो देवता मार्जने विनियोगः इति स्मृत्वा—ओं आपो हिष्ठा मयोभुवः ओं तान ऊर्जे दधातन ओं महेरणाय चक्षसे। ओं यो वः शिवतमो रसः ओं तस्य भाजयतेह नः ओं उशतीरिव मातरः ओं तस्मा अरङ्गमामवः ओं यस्य क्षयाय जिन्वथ। ओं आपो जनयथा च नः। ततोऽञ्जलिना जलमादाय वारत्रयं द्रुपदां पठित्वा तज्जलं शिरसि क्षिपेत्। तथाहि—द्रुपदादिवेति कोकिलो राजपुत्रऋषिरनुष्टुप् छन्द आपो देवता सौत्रामण्यवभृथे विनियोगः इति स्मृत्वा ओं द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतम्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः। ततो दक्षिणकरेण जलमादाय घ्राणं तत्रासज्य आयतासुरनायतासुर्वा ऋष्यादिकं स्मृत्वा त्रिः सकृद्वाऽघमर्षणसूक्तं जपेत्। तच्चोक्तम्। अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप्छन्दः परमात्मा-देवताऽपामुपस्पर्शने विनियोगः। "ओम् अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः। त्वं यज्ञस्त्वं वषट्कार आपो ज्योतीरसोमृतम्" इत्याचामेत्। तत उत्थाय प्रणव-व्याहृतित्रयसहितगायत्र्या सूर्याभिमुखं सपुष्पजलाञ्जलिं स्वमौलितुल्यदेश-मादाय प्रदक्षिणं प्रक्रम्य क्षिपेत्।

ततो भूम्यलग्नोभयगुल्फतलभागो भूम्यलग्नैकपादो वा भूमिलग्नार्द्ध-पादो वा सायं प्रातर्बद्धाञ्जलिर्मध्याह्ने ऊर्द्ध्वबाहुः सदा सूर्याभिमुखः सूर्यमुप-तिष्ठेत्।

यथा—उद्वयमिति हिरण्यस्तूप ऋषिरनुष्टुप्छन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः। इति स्मृत्वा—ओम् उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्। चित्रमिति कौत्सऋषिस्त्रिष्टुप् छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः। इति स्मृत्वा-ओं चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षग्वं सूर्य आत्मा जगतस्तस्थुषश्च, तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषि रक्षरातीतपुर उष्णिक्छन्दः सूर्योदेवता सूर्योपस्थाने विनि-योगः। इति स्मृत्वा—ओं तच्चक्षुर्देवहितं पुरस्तच्छुक्रमुच्चरत, पश्येम शरदः

शतञ्जीवेम शरदः शतग्वं शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।" सर्वानुक्रमण्यान्तु—उद्वयं सौरी अनुष्टुप्, प्रस्कण्वस्य उदुत्यं प्रस्कण्वसौरी गायत्री, चित्रं कुत्स आङ्गिरसः त्रैष्टुभं, तच्चक्षुः पुर उष्णिक् सौरी।

तथा च—अत्राद्याया जलादुत्क्रमेण विनियोगः। उदुत्यमिति प्रस्कण्वऋषिर्गायत्रीछन्दः सूर्यो देवता दाक्षिणहोमे विनियोगः। चित्रमिति कुत्स-अङ्गिरसऋषिः त्रिष्टुप्छन्दः सूर्यो देवता दाक्षिणहोमे विनियोगः। तच्चक्षुरिति दध्यङ्ङाथर्वणऋषिक्षरातीत पुरउष्णिक्छन्दः सूर्यो देवता महावीरशान्तिकरणे विनियोगः। ततः प्रातर्मध्याह्न ऊर्द्ध्वजानुः सायमुपरिष्टः प्रत्यङ्मुखः ओं हृदयायनमः। ओं भूः शिरसे स्वाहा, ओं भुवः शिखायै वषट्। ओं स्वः कवचाय हुं, ओं भूर्भुवः स्वः नेत्राभ्यां वौषट्। ओं भूर्भुवः स्वः अस्त्राय फट्। इत्यङ्गानि विरावर्त्य,

ओंकारस्य ब्रह्मऋषि गायत्री छन्दोग्निर्देवता जपे विनियोगः। व्याहृतित्रयस्य प्रजापति ऋषि गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निवाय्वादित्या देवता जपे विनियोगः। गायत्र्या विश्वामित्र ऋषि गायत्रीछन्दः सविता देवता जपे विनियोगः। इतिऋष्यादिकं स्मृत्वा—'तेजोसीति देवा ऋषय आज्यंदेवता आज्यावेक्षणे विनियोगः।' इति स्मृत्वा ओं तेजोऽसि शुक्रमस्यमृतमसि धाम-नामासि प्रियन्देवानामनाधृष्टं देवयजनमसि।

इति गायत्रीमावाह्य परोरजस इति विमलऋषिरनुष्टुप्छन्दः परमात्मा देवता गायत्र्युपस्थाने विनियोग। इति स्मृत्वा ओं गायत्र्यस्येकपदी द्विपदी त्रिपदी चतु पद्यपदसि नहि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदो मा प्रापदिति ब्राह्मणेन गायत्रीमुपस्थाय गायत्रीं ध्यात्वा, दक्षिणानामिकायां कुशत्रय-सुवर्ण-रजतानि धृत्वा, रुद्राक्षाद्यन्यतमाक्षमालया सहस्रकृत्वो वा शतकृत्वो वा दशकृत्वो वा यथाशक्ति वा जपेत्।

ततः प्रदक्षिणीकृत्य नमस्कृत्य तूष्णीं विसर्जयेत्। मध्याह्ने च यदि गायत्रीजपानन्तरं विभ्राडित्यनुवाकेन पुरुषसूक्तेन शिवसङ्कल्पेन मण्डलब्राह्मणेन चाधिकफलार्थितयोपतिष्ठते, तदा तदनन्तरमेव गायत्रीविसर्जनम्।

ओं विभ्राड् बृहत्पिबतु सोम्यम्मध्वायुर्दधद्यज्ञपतावविहुतम्।
वातजूतोयो अभिरक्षति त्मनां प्रजाः पुपोष पुरुधा विराजति ॥
उदुत्यञ्जातवेदसन्देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥
येना पावक चक्षसा भुरण्यन्तञ्जनाँ अनु। त्वँवरुण पश्यसि ॥
दैव्यावध्वर्यू आगतग्वं रथेन सूर्यत्वचा। मध्या यज्ञग्वं समञ्जाथे ॥
तम्प्रत्नथा पूर्वथा विश्वथे मथा ज्ज्येष्ठतातिं बर्हिषदग्वं स्वर्विदम्।
प्रतीचीनं वृजनन्दोहसे धुनिमाशुञ्जयन्तमनुयासु वर्द्धसे ॥
अयं वेन श्चोदयत्पृश्निगर्भा ज्योतिर्ज्जरायू रजसो विमाने।
इममपाग्वं सङ्गमे सूर्यस्य शिशुन्न विप्रा मतिभीरिहन्ति ॥
चित्रन्देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः।
आप्रा द्यावापृथिवी अन्तरिक्षग्वं सूर्य आत्मा जगतस्तस्थुषश्च ॥
आन इड़ाभि विंदथे सुशस्ति विश्वानरः सविता देव एतु।
अपि यथा युवानो मत्सखायो विश्वं जगदभिपित्वे मनीषा ॥
यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे।
तरणिर्विश्व दर्शतो ज्योतिष्कृदसि सूर्य विश्वमाभासि रोचनम् ॥
तत्सूर्यस्यदेवत्वन्तन्महित्वम्मध्या कर्त्तोर्विततग्वं सञ्जभार।
यदेहयुक्तहरितः सधस्थाद्रात्री वासस्तनुते सिमस्मै ॥
तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सम्भरन्ति ॥
वयमहाँ२ असि सूर्य वडादित्य महाँ२ असि।
महस्ते सतो महिमा पनस्यतेद्धा देव महाँ२ असि ॥

वट् सूर्य श्रवसा महाँ२असि सत्रा देव महाँ२असि ।
मह्ना देवानामसुर्यः पुरोहितो विभुज्योतिरदाभ्यम् ॥

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रतिभागं न दीधिम ॥
अद्यादेवा उदिता सूर्यस्य निरग्वंहसः पिपृता निरवद्यात् ।
तन्नोमित्रो वरुणो मा महन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥
आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

॥ पुरुषसूक्तम् ॥

ओं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सभूमिग्वं सर्वतः स्पृत्वा त्यातिष्ठद्दशाङ्गुलम् ॥
पुरुष एवेदग्वं सर्वं यद्भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥
एतावानस्य महिमातो ज्यायांश्च पूरुषः ।
पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥
त्रिपादूर्द्ध्व उदैत् पुरुषः पादोस्येहा भवत्पुनः ।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि ॥
ततो विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥
तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्या नारण्या ग्राम्याश्च ये ॥
तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाग्वंसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥

तस्मादश्वो अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥
तं यज्ञम्बर्हिषि प्रौक्षन्पुरुषञ्जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखङ्किमस्यासीत्किम्बाहू किमूरू पादा उच्येते ॥
ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यांग्वं शूद्रो अजायत ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ॥
नाभ्या आसीदन्तरिक्षग्वं शीर्ष्णोद्यौः समवर्त्तत ।
पद्भ्याम्भूमि र्दिशः श्रोत्रात्तथालोकाँ२ अकल्पयन् ॥
यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः ॥
सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वाना अबध्नन् पुरुषम्पशुम् ॥
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

॥ शिवसङ्कल्पसूक्तम् ॥

ओं यज्जाग्रतो दूरमुदैति दैवन्तदु सुप्तस्य तथैवेति ।
दूरङ्गम ञ्ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥
यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥

येनेदम्भूतम्भुवनं भविष्यत्परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥
यस्मिन्नृचः साम यजूंग्वंषि यस्मिन्प्रतिष्ठिता रथनाभाविवाराः ।
यस्मिँश्चित्तग्वं सर्वमोतं प्रजानान्तन्मे मनः शिवसङ्कल्पमस्तु ॥
सुषारथिरश्वानिव यन्मनुष्यान्नेनीयते भीशुभि र्वाजिन इव ।
हृत्प्रतिष्ठं यदजिरञ्जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥

॥ मण्डलब्राह्मणम्[1] ॥

ओं यदेतन्मण्डलन्तपति तन्महदुक्थन्ता ऋचः स ऋचाँल्लोकोऽथ । यदेतदर्चिर्दीप्यते । तन्महाव्रतं तानि सामानि स साम्नाँल्लोकोऽथ । य एष एतस्मिन्मण्डले पुरुषः सोग्निस्तानि यजूंषि स यजुषाँल्लोकः ॥१॥ सैषा त्रय्येव विद्या तपति । तद्धैतदप्यविद्वांस आहुस्त्रयी वा विद्या एषा तपतीति वाग्घैव तत्पश्यन्ती वदति ॥२॥ स एष एव मृत्यु र्य एष एतस्मिन्मण्डले पुरुषोऽथैतदमृतं यदेतदर्चिर्दीप्यते । तस्मान्मृत्यु र्न्न म्रियतेऽमृते ह्यन्तस्तस्मादु न दृश्यतेऽ मृते ह्यन्तः ॥३॥ तदेष श्लोको भवत्यन्तरं मृत्योरमृतमित्यवरं ह्येतन्मृत्योरमृतं मृत्यावमृतमाहितमित्येतस्मिन्हि पुरुष एतन्मण्डलम्प्रतिष्ठितन्तपति मृत्युर्विवस्वन्तं वस्त इत्यसौ वा आदित्यो विवस्वानेष ह्यहोरात्रे विवस्ते तमेषवस्ते सर्वतो ह्येनेन परिवृतो मृत्योरात्मा विवस्वतीत्येतस्मिन्हि गण्डल एतस्य पुरुषस्यात्मैतदेष श्लोको भवति ॥४॥ तयो र्वा एतयोरुभयोरेतस्य चार्चिष एतस्य च पुरुषस्यैतन्मण्डलं प्रतिष्ठा । तस्मान्महदुक्थम्परंस्मै न शंसेन्नेदेतां प्रतिष्ठाञ्छिनदा इत्येतां ह स प्रतिष्ठाञ्छिन्ते यो महदुक्थं परस्मै शग्वंसति तस्मादुक्थशंसभूयिष्ठम्परिचक्षते प्रतिष्ठा छिन्नो हि भवतीत्यधिदेवतम् ॥५॥ अथाधियज्ञं यदेतन्मण्डलन्तपत्ययग्वं स रुक्मोथ यदेतदर्चिर्दीप्यतऽ इदन्तत्पुस्करपर्णमापोह्येता आपः पुस्करपर्णमथ य एष एतस्मिन्मण्डले पुरुषोऽयमेव स योऽयग्वं हिरण्मयः पुरुषस्तदेतदेवैतत्त्रयग्वं सग्वंस्कृत्येहोपधत्ते तद्यज्ञस्यैवानुसग्वंस्थामूद्ध्वंमुत्क्रा-

१—शतपथब्राह्मणम्, काण्डः—१०, अध्यायः—५, ब्राह्मणम्—२, प्रपाठकः—३,

मति तदेतमप्येति, य एष तपति तस्मादग्निन्नोद्रियेत। परिहन्तुममुत्रह्येष-तदा भवतीत्यु ऽएवाधियज्ञम् ॥६॥ अथाध्यात्मं यदेतन्मण्डलन्तपति यश्चैष रुक्म इदन्तच्छुक्लमक्षन्नथ यदेतदर्चिर्दीप्यते। यच्चैतत्पुष्करपर्णमिदन्तत्कृष्ण-मक्षन्नथ य एष एतस्मिन्मण्डले पुरुषो यश्चैष हिरण्मयः पुरुषोयमेव स योयन्द-क्षिणेक्षन्पुरुषः ॥७॥ स एष एव लोकम्पृणा तामेष सर्वोग्निरभिसम्पद्यते। तस्यैतन्मिथुनं योयग्वं सव्येक्षन्पुरुषोर्द्धमु हैतदात्मनो यन्मिथुनं यदाबै सह मिथुने-नाथ सर्वोथ कृत्स्नः कृत्स्नतायै तद्यत्तो द्वे भवतो द्वन्द्वग्वं हि मिथुनं प्रजननं तस्मा-द्द्वे द्वे लोकम् णे, उपधीयेते तस्माद् द्वाभ्यां चितिम्प्रणयन्ति ॥८॥ स एष एवेन्द्रो योयन्दक्षिणेक्षन्पुरुषोऽथेयमिन्द्राणी ताभ्यान्देवा एतांविधृतिमकुर्वन्ना-सिकान्तम्माज्जायाया अन्ते नाश्नीयाद्वीर्यवान् ह्यस्माज्जायते। वीर्यवन्तमु ह सा जनयति यस्या अन्ते नाश्नाति। ९॥

तदेतद्देव व्रतग्वं राजन्यबन्धवो मनुष्याणामनुतमाङ्गो पायन्ति, तस्मादु तेषु वोयंवाञ्जायते मृतवाका वयसाग्वं सा क्षिप्रश्येनं जनयति ॥१०॥ स्वो हृदयस्याकाशम्प्रत्यवेत्य मिथुनीभवतस्तौ यदा मिथुनस्यान्तङ्गच्छतोथ है तत्पुरुषः स्वपिति। तद्यथा है वेदम्मानुषस्य मिथुनस्यान्तङ्गत्वा सं विद इव भवत्येवग्वं है वै तदसंविद इव भवति दैवग्वं ह्येतन्मिथुनं परमोह्येष आनन्दः॥११॥ तस्मादेवंवित् स्वप्याल्लोक्यग्वं हैते एव तद्देवते मिथुनेन प्रियेण धाम्ना समर्द्धयति तस्मादु ह स्वपन्तं धुरेव न बोधयेन्नेदेते देवते मिथुनीभवन्त्यौ हि नसानीति। तस्मादु है तत्सुषुपुषः श्लेष्मणमिव मुखम्भवत्येते एव तद्देवते रेतः सिञ्चतः, सिञ्चतस्तस्माद्रेतस इदग्वं सर्वग्वं सम्भवति यदिदं किञ्च ॥१२॥ स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुषो यश्चायन्दक्षिणेक्षन्पुरुषस्तस्य हैतस्य हृदये पादावतिहतौ तौ हैतदाछिद्योत्क्रामति। स यदोत्क्रामत्यथ हैत-त्पुरुषो म्रियते। तस्मादु हैतत् प्रेतमाहुराछेद्यस्येति ॥१३॥ एष उ एव प्राण एष ह्येमाः सर्वाः प्रजाः प्रणयति तस्यैते प्राणाः स्वाः स यदा स्वपित्यथैनमेते प्राणाः स्वा अपि यन्ति तस्मात्स्वाप्य यः स्वाप्य यो ह वैतग्वं स्वप्न इत्याचक्षते, परोक्ष-म्परोक्षकामा हि देवाः ॥१३॥

स एतैः सुप्तो न कस्यचन वेद न मनसा सङ्कल्पयति, न वाचान्नस्य रसं विजानाति न प्राणेन गन्धं विजानाति न चक्षुषा पश्यति, न श्रोत्रेण शृणोत्येतग्वं ह्येते तदाऽपीता भवन्ति, स एष एकः सन् प्रजासु बहुधा व्यादिष्टस्तस्मादेका सती लोकम्पृणा सर्वमग्निमनुविभवत्यथ यदेक एव तस्मादेका ॥१५॥ तदाहुरेको मृत्युर्वहवा३ इत्येकश्च वहवश्चेति ह ब्रूयाद्यदहासावमुत्र तेनैकोथ यदिह प्रजासु वहुधा व्याविष्टस्तेनो वहवः ॥१६॥ तदाहुरन्तिके मृत्युर्दूरा३ इत्यन्तिके च दूरे चेति ह ब्रूयाद्यदहायमिहाध्यात्मन्तेनान्तिकेथ यदसावमुत्र तेनो दूरे ॥१७॥ तदेष श्लोको भवत्यन्ने भात्यपश्रितो रसानाग्वं संक्षरेऽमृत इति यदेतन्मण्डलन्तपति तदन्नमथ य एष एतस्मिन्मण्डले पुरुषः सोत्ता स एतस्मिन्नन्नेऽपश्रितो भातीत्यधि देवतम् ॥१८॥ अथाध्यात्ममिदमेव शरीरमन्नमथ योयन्दक्षिणेक्षन्पुरुषः सोत्ता स एतस्मिन्नन्नेऽपश्रितो भाति ॥१९॥ तमेतमग्निरित्यध्वर्यव उपासते यजुरित्येष होदग्व सर्वं युनक्ति सामेति छन्दोगा एतस्मिन् होदग्वं सर्वं समानमुक्थमिति वह्वृचा, एष हीदग्वं सर्वमुत्थापयति। यातुरिति यान्तुविद एतेन हीदग्वं सर्वं यतं विषमिति सर्पाः सर्प इति सर्पविद उर्गिति देवा रयिरिति मनुष्या मायेत्यसुराः, स्वधेति पितरो, देवजन इति, देवजनविदो, रूपमिति गन्धर्वा गन्ध इत्यप्सरसस्त्र यथायथोपासते तदेव भवति तद्धैनान् भूत्वाऽवति। तस्मादेनमेवंवित्सर्वैरेवैतेरुपासीत सर्वग्वं हैतद्भवति सर्वग्वं हैनमेतद्भूत्वाऽवति ॥२०॥ स एष त्रीष्टकोऽग्निः ऋगेका यजुरेका सामैका तद्याङ्काश्चात्रऽर्चोपदधाति रुक्म एव तस्या आयतनमथ यां यजुषा पुरुष एव तस्या आयतनमथ याग्वं साम्ना पुस्करपर्णमेव तस्या आयतनमेवन्त्रीष्टकः ॥२१॥ ते वा एते उभे एष च रुक्म एतच्च पुस्करपर्णमेतम्पुरुषमपीत उभे ह्यृक्सामे यजुरपीत एवं वेकेष्टकः ॥२२॥

स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुषो यश्चायन्दक्षिणेक्षन्पुरुषः स एष एवंविद आत्मा भवति स यदैवंविदस्माल्लोकात्प्रैत्यथैतमेवात्मानमभिसम्भवति सोऽमृतो भवति मृत्युर्ह्यस्यात्मा भवति ॥२३॥

ततः प्रदक्षिणीकृत्य नमस्कृत्य विसर्जयेत्। ततः कुशवत्यासने उपविश्य कुशत्रय-सुवर्ण-रजत-पवित्रवद्दक्षिणपाणि ब्रह्मयज्ञमारभेत्।

तत्र योगी—

दर्भेषु दर्भपाणिः स्यात्प्राङ्मुखस्तु कृताञ्जलिः।
स्वाध्यायन्तु यथाशक्ति ब्रह्मयज्ञार्थमाचरेत्॥

मनुः— ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा।
स्रवत्यनोङ्कृतं सर्वं पुरस्ताच्च विशीर्यते॥

देवीपुराणे—

पठितव्यः सुवर्णोपलक्षितः।
प्लुतदीर्घक्रमां ह्रस्वां सानुस्वारां सुलक्षिताम्।
ऋचमुच्चारयेत्प्राज्ञो, न द्रुतं न विलम्बितम्॥
अपरश्च महादोषः श्रूयते ऋषिभाषितः।
इन्द्रस्तं न्ति वज्रेण योपशब्दं समुच्चरेत्॥

आपस्तम्बः—

"यथास्वाध्यायमुत्सृजन्"। पूर्वादिनाधीतं त्यजन्नित्यर्थः।

"ऋचः पठन् मधुपयःकुल्याभिः तर्पयेत्सुरान्।
घृतामृतौघकुल्याभिः यजूंष्यधिपठन् सदा॥
सामान्यपि पठन् सोम-घृतकुल्याभिरन्वहम्।
मेदः कुल्याभिरथवा अथर्वाङ्गिरसः पठन्॥
मांसक्षीरौदनमधुकुल्याभिस्तर्पयेत्पठन्।
वाको वाक्यं पुराणानि सेतिहासानि चान्वहम्॥

ऋगादीनामन्यतममेतेषां शक्तितोऽन्वहम् ।
पठन् मध्वाज्यकुल्याभिः स्वपितॄनपि तर्पयेत् ॥
ते तृप्तास्तर्पयन्त्येनं जीवन्तं प्रेतमेव च ।
कामचारी च भवति सर्वेषु सुखवेश्मसु ॥
गुर्वेनश्चैनं न स्पृशति पङ्क्तिश्चैव पुनाति सः ।
यं यं क्रतुञ्च पठति फलभाक् तस्य तस्य सः ।
त्रिवृत्तपूर्णपृथिवी-दानस्य फलमाप्नुयात् ॥"

तथा—

योऽयं श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स उच्यते ।
मध्ववर्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ॥
वैश्वदेवावसाने वा नान्यत्रर्त्ते निमित्तकात् ॥

यद्यप्यध्यापनं ब्रह्मयज्ञ इत्यनेनोक्तं तथाप्यहरहः स्वाध्यायमधीयेतेति ब्रह्मयज्ञोत्पत्तिश्रुतेः श्रुतिजप एव ब्रह्मयज्ञः। अनध्याये कथं ब्रह्मयज्ञः कार्य इत्यत्रापस्तम्बः—"मनसाचानध्याये"। अधीयेतेति शेषः। एवञ्चानध्याये मनसा स्वाध्यायविधानात्, नैत्यके नास्त्यनध्यायो ब्रह्मसत्रं हि स स्मृतमिति मानवं वचनं मानसपरम्। ब्रह्मयज्ञश्च नित्यः "तदहर्ब्राह्मणो न भवति, यदहः स्वाध्यायं नाधीते" इति तैत्तिरीय श्रुतेः। कात्यायनः—"दर्भपाणिः स्वाध्यायञ्च यथाशक्त्यादावारभ्य वेदम्"। अधीतवेदस्योपक्रममारभ्य यथाशक्ति स्वाध्यायं कुर्यादित्यर्थः।

॥ अथ तर्पणम् ॥

तत्र शातातपः—

तर्पणन्तु शुचिः कुर्यात्प्रत्यहं स्नातको द्विजः ।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥

प्रत्यहमिति श्रवणान्नित्याधिकारः। विष्णुपुराणे—

शुचिवस्त्रधरः स्नातो देवर्षिपितृतर्पणम्।
तेषामेव हि तीर्थेन कुर्वीत सुसमाहितः॥

ऋषितीर्थमङ्गुल्यग्रमार्षमिति बौधायनः। स्नानाङ्गमपीदम्—

नित्यनैमित्तकं काम्यं त्रिविधं स्नानमुच्यते।
तर्पणन्तु भवेत्तस्य अङ्गत्वेन व्यवस्थितम्॥

इति ब्रह्मपुराणवचनात्। अङ्गत्वेपि च सन्ध्यावन्दनव्यवधानेनास्यानुष्ठानं सूत्रकारवचनादेव। अतएव यत्र सन्ध्यावन्दनाप्रसङ्गस्तत्राव्यवधानमेव अनाचादात्।

मनुः—

यदेव तर्पयेदद्भिः पितॄन् स्नात्वा द्विजोत्तमः।
तेनैव सर्वमाप्नोति पितृयज्ञक्रियाफलम्॥

छन्दोगपरिशिष्टे—

नाश्नन्ति पितरश्चेति कृत्वा कुत्सितमनस्तु यः।
न तर्पयति तान् भक्त्या देहात्तद्रुधिरन्तुते॥
पिबन्ति सर्वनाशश्च कुर्वन्त्यथ पदे पदे।
तस्माद् भयेन च पितॄँस्तर्पयेत्सततं बुधः॥

तर्पणञ्च वाजसनेयिनां स्थलस्थानां स्थल एव, कात्यायनेन शुक्लवस्त्रपरिधानोत्तरं तत्कथनात्। स्थलाशौचपक्षे जलस्थैरपि तत्कार्यम्।

योगि याज्ञवल्क्यः—

यत्राशुचिस्थलं वा स्यादुदके देवताः पितॄन्।
तर्पयेत्तु यथाकाममप्सु सर्वं प्रतिष्ठितम्॥

अत्र च जलसन्ध्यावन्दनपक्षे उपस्थानपर्यन्ता सन्ध्या जले, ततस्तर्पणम्। तत उत्तीर्य शुष्कवाससा आचाहनाङ्गन्यासादिसहितगायत्रीजपो ब्रह्मयज्ञश्च स्थले कार्यः। यदार्द्रवासाः कुरुत इत्यादिना जले जपमात्रनिषेधात्।

कदाचिदपि नो विद्वान् गायत्रीमुदके जपेत्।
गायत्र्यग्निमुखी प्रोक्ता तस्मादुत्थाय ताञ्जपेत्॥

इति विशिष्य गोभिलेन निषेधाच्च। तस्य सामशाखास्नातत्वेपि कात्यायनाप्रतिषिद्धतयाऽग्निमुखत्वहेतुनिर्द्देशेन च वाजसनेयिकेऽपि जागरूकत्वात्, अत्र कात्याननेनोक्तक्रमभङ्गो गोभिलयाज्ञवल्क्यैकवाक्यतानुरोधात्।

केचित्तु-जलसन्ध्यापक्षे जल एव गायत्री जपमाचरन्ति, पठन्ति च—

यदिस्यात्क्लिन्नवासा वै गायत्रीमुदके जपेत्।
अन्यथा तु शुचौ भूम्यां कुशोपरि समाहितः॥ इति।

बौधायनः—

स्रवन्तीषु निबद्धासु त्रयो वर्णा द्विजातयः।
प्रातरुत्थाय कुर्वीरन् देवर्षि-पितृतर्पणम्॥
निबद्धासु न कुर्वीरन्नंशभाक् तत्र सेतुकृत्।
तस्मात्परकृतान् सेतून् कूपाँश्च परिवर्जयेत्॥
उद्धृत्य वा त्रीन् पिण्डान् कुर्यादापत्सु नो सदा।
निबद्धासु तु पिण्डाँस्त्रीन् कूपात्तु त्रीन् घटांस्तथा॥

तथा—देवतास्तर्पयित्वा पितृतर्पणमनुतीर्थम्। अनुतीर्थं - तीर्थं लक्ष्यीकृत्य देवपित्रादितीर्थेन इत्यर्थः। शङ्खः – नेष्टकाचिते पितॄंस्तर्पयेत वापीतड़ागोदपानेषु सप्त पञ्च त्रीन्वा पिण्डानुद्धृत्य देवान्, पितॄंस्तर्पयेत। उदपानः कूपो वापी।

यथासंख्यं वाप्यादौ सप्तपिण्डादयुद्धारः। एवं यद्यपि वाप्यादौ स्नाने तर्पणे च पिण्डोद्धारः, कूपेऽम्बुघटत्रयोद्धारश्च कथितः, तथापि स्नानकरणपक्षे स्नानस्य पूर्वकृतत्वात्तदङ्गतर्पणेनैव, प्रसङ्गात्स्वतन्त्रतर्पणस्यापि सिद्धिरिति न पृथक् पिण्डोद्धारः कार्य एकप्रयोगत्वात्। यदाह योगि याज्ञवल्क्यः—

उपस्थानादिर्यस्तासां मन्त्रवान् कीर्तितो विधिः।
निवेदनान्तन्तत्स्नानं इत्याहु र्ब्रह्मवादिनः॥

उपस्थानम् उरुंहि इत्यादिना, निवेदनं देवागातु विद इत्यादिना तर्पणोत्तरम्, तासामपाम्। रोगादिशाच्च स्नानमकृत्वैव वाप्यादौ तर्पण-पक्षे तर्पणपूर्वसमय एव पिण्डादयुद्धारः कार्यः, अव्यवधानस्यौत्सर्गिकत्वात्।

योगियाज्ञवल्क्यः—

आवाह्य पूर्ववन्मन्त्रैरास्तीर्य च कुशान् शुचीन्।
प्रागग्रेषु सुरान् सम्यक् दक्षिणाग्रेषु वै पितॄन्॥
सव्यं जानु तथान्वाच्य पाणिभ्यां दक्षिणामुखः।
तल्लिङ्गैस्तर्पयेन्मन्त्रैः सर्वान् पितृगणांस्तथा॥
मातामहांश्च सततं श्रद्धया तर्पयेद्बुधः।
प्राचीनावीत्युदकन्तु प्रसिञ्चेद्वै तिलान्वितम्॥
यद्युद्धृतं प्रसिञ्चेद्वै तिलान् सम्मिश्रयेज्जलैः।
अतोन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः॥
दक्षिणे पितृतीर्थेन जलं सिञ्चेद्यथाविधि।
दक्षिणे नैव गृह्णीयात्पितृतीर्थसमीपतः॥
तिलानामप्यलाभे तु सुवर्णरजतान्वितम्।
तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण चाप्यथ॥

पूर्ववदिति याज्ञवल्क्य संहितायां श्राद्धप्रकरणविहितैः तेन, 'विश्वेदेवा स आगतेति' 'विश्वेदेवाः श्रुणुते ममि'त्याभ्याम्मन्त्राभ्यां ब्रह्मादींनावाह्य तर्पयेत्। "उशन्तस्त्वे"ति "आयन्तु न" इत्याभ्याम्मन्त्राभ्यां पितृनावाह्य पितृलिङ्गमन्त्रैः पितॄंस्तर्पयेदिति कल्पतरु-प्रकाशकाराः।

अन्ये तु—योगशास्त्रञ्च मदुक्तमिति याज्ञवल्क्येन सहितान्तरेऽभिधानात् योगिय ज्ञवल्क्यसहितायाः प्राथमिकत्वमवसीयते। तथा च—योगियाज्ञवल्क्यसंहितायामुक्ते तर्पणे याज्ञवल्क्यसंहितोक्तश्राद्धावाहनमन्त्रस्य पूर्ववदित्यतिदेशो न युक्तः। नहि वक्ष्यमाणं पूर्ववदित्यनया रीत्याऽतिदेष्टुं शक्यते।

किञ्च 'विश्वेदेवा स' इत्यृचा विश्वेदेवान 'उशन्तस्त्वे'त्यृचा पितृनावाह्येति श्राद्धप्रकरणे याज्ञवल्क्येनोक्तम। तथा च—तत्रैकैकमन्त्रस्यैवावाहनकरणत्वश्रुते मन्त्रद्वयमेव लभ्यते। न तु बहवो मन्त्राः, तथा च मन्त्रैरिति बहुवचनमलग्नकम्।

न च विश्वेदेवाः 'श्रृण्वतेममि'त्यनेन 'आयन्तुन' इत्यनेन च सहचतुष्टे्व सिद्धे बहुवचनोपपत्तिः, याज्ञवल्क्येनैवानयोरावाहनेऽनुपयोजनात्। प्रत्युत जपेन्मन्त्रं विश्वेदेवाः श्रृणुतेति, जपेदायन्तु नस्तत इति वचनाभ्यामनयोर्जपे विनियोजनाच्च। अपि च देवावाहनमन्त्रस्य ब्रह्मादिप्रकाशनसामर्थ्यमपि नास्ति, तल्लिङ्गत्वाद्यभावात्। तस्मात्मकृतस्य याज्ञवल्क्यवचनस्यान्यथैवान्वयः।

तथाहि - आवाह्य सुरान् तर्पयेत्, आवाह्य पितृन् तर्पयेन्मन्त्रैः पूर्ववत् देववत्। तेन पितृतर्पणवाक्येपि प्रणवस्त्यज्यतामिति च लभ्यते। एवं सति कै मन्त्रैः पितृतर्पणमित्यपेक्षायां तल्लिङ्गैरिति। अत्रापि काम्यमन्त्रस्य किन्तर्पणे विनियोग इति कात्यायनेन विवेचितम्। आवाहनन्तु देवानां देवा आगच्छन्त्वित्येव तदर्थं प्रकाशकत्वात्। पित्रावाहनन्तु कार्ष्णाजिनिकथितक्रमेण। तद्यथा—"नाभिमात्रे जले स्थित्वा चिन्तयेदूर्द्ध्वमानसः। अगच्छन्तुमे पितर

इमं गृह्णन्त्वपोऽञ्जलिमिति" ॥

जलतर्पणपक्षे च अत्र नाभिमात्रजलावस्थानं द्रष्टव्यमित्याहुः। देवा आगच्छन्त्वित्यस्य मन्त्रत्वाभावाद् व्याहृतिभिरावाहनम्।

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः ॥

इति छन्दोग परिशिष्टवचनेन मन्त्रविशेषानुपदेशे व्याहृतिमन्त्रप्रतीतेः। पित्रावाहने तु उशन्तस्त्वेति आयन्तुन इत्यादि, आगच्छन्तु मे पितर इति च त्रयोमन्त्रा इति प्रदीपकृत आहुः।

वस्तुतस्तु—

आस्तीर्य च कुशान् साग्रान् तानावाह्य स्वमन्त्रतः।
प्राचीनाग्रेषु वै देवान् दद्याग्रेषु तथा पितॄन् ॥

इति ब्रह्मपुराणवचनाद्बहुवचनानुपपत्तिरहिताद् रत्नाकरादिमतं श्रेय इति। प्राचीनावं तीति कृतापसव्यः प्रसिञ्चेत् दद्यात् यदीत्यादि।

पात्रस्थितं जलमादाय तर्पणे पात्र एव तिलाः प्रक्षेप्तव्याः। तेऽपि दक्षिणहस्तेनैव, "दक्षिणस्तत्र विज्ञेय" इति वचनात्। जलाशयस्थमादाय तर्पणे वामेन पाणिना गृहीत्वा तिला अञ्जली मेलनीया इत्यर्थः। दक्षिण इत्यादि दक्षिणे करे। तथाच—दक्षिणकरेण पितृतीर्थेन जलमादाय दक्षिण. कर पितृतीर्थेनैव त्यजेदित्यर्थः।

मरीचिः—

वामहस्ते तिला ग्राह्या भुक्त्वा हस्तन्तु दक्षिणम् ॥

योगी—

यदि स्याज्जीवपितृक एतान् दिव्यान् पितॄँस्तथा।
येभ्यो वापि पिता दद्यात्तेभ्यो वापि च दापयेत् ॥

एतांश्च वक्ष्यमाणांश्च प्रमीतपितृको द्विजः ।
वसून् रुद्रांस्तथादित्यान्नमस्कारस्वधान्वितान् ।
एते सर्वस्य पितर एष्वायत्ताश्च मानुषाः ॥

नमस्कारेत्यादिकं वक्ष्यमाणानां सर्वेषां विशेषणम्, असङ्कोचात् । तेन वस्वादीनामिव स्वपित्रादीनामपि वक्ष्यमाणपदार्थानां स्वधा नम इत्येव त्यागः, कल्पतरु-रत्नाकरादयोप्येवम् ।

श्रीदत्ताह्निके तु दिव्यपितृष्वेव नमस्कारो न त्वन्येष्वपि । तस्यायं भावः—वक्ष्यमाणत्वाविशेषेति वसुरुद्रादित्यानामेव नमस्कारस्वधान्वयो दिव्य-पितृत्वात्, न तु स्वपितृणामपि, दिव्यत्वाभावेन नमोयोगे बीजाभावात् । वाक्यस्य च वस्वाद्यन्वयेनापि चरितार्थत्वादिति । स्वमात्रादिषु सर्वेष्वेव स्व-धाकारमात्रम् ।

"भ्राता पितृष्वसा चैव मातुलानी पितृष्वसा ।
दुहिता च स्वसा चैव शिष्यर्त्विग्जातिबान्धवाः ॥
नामतस्तु स्वधाकारैः तर्प्याः स्युरनुपूर्वशः ॥

इत्येतद्वचनात् । उदकं दद्यादित्यनुवृत्तौ शङ्खः—पितृपक्षे यावतां नाम जानीयात्, पितृपक्षाणामुदकतर्पणं कृत्वा गुरूणामुदकतर्पणं कुर्यात् । गुरूणां कृत्वा मातृपक्षाणां कुर्यात्, मातृपक्षाणां कृत्वा सम्बन्धिबान्धवानां कुर्यात् । तेषां कृत्वा सुहृदां कुर्यात् ।

यमः—

अपि नः सकुले जायाद्यो नो दद्याज्जलाञ्जलीन् ।
नदीषु बहुतोयासु शीतलासु विशेषतः ॥

हारीतः— देवाश्च पितरश्चैव काङ्क्षन्ति सरितं प्रति ।
अदत्ते तु निराशास्ते प्रतियान्ति यथागतम् ॥

एवञ्चैकाहेनानदीलाभे प्राप्ते सति नदी तर्पणम् ।

हारीतः— नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना ।
नोपतिष्ठति तत्तोयं यन्न भूमौ प्रदीयते ॥

भूमाविति, अत्र भूमिपदं शुष्कमात्रपरं, तेन दार्वादावपि तर्पणमिति केचित् तन्न, लक्षणाबीजस्यानुपपत्तेरभावात् । बौधायनः—

"अद्भिरेवाप्सु यथोत्तरं देवान् पितॄँस्तर्पयति ।"

यमः— भूमौ यदापो दीयन्ते दाता चैव जले स्थितः ।
वृथा तद्दीयते तोयं नोपतिष्ठति कस्यचित् ॥

कार्ष्णाजिनिः—"आपो देवगणाः सर्वे आपः पितृगणास्तथा ।
तस्माज्जले जलं देयं पितृभ्यो दत्तमक्षयम् ॥
देवतानां पितॄणाञ्च जले दद्याज्जलाञ्जलिम् ।
असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलिम् ॥

आप इत्यादि, देवादितर्पणजलं सर्वथा जल एव प्रक्षेप्यम् । असंस्कृततर्पणजलन्तु, जलस्थेनापि स्थल एव प्रक्षेप्यमित्यर्थः ।

सुमन्तुः—

आकाशे तु क्षिपेद्वारि जलस्थो दक्षिणामुखः ॥

आकाशः जलोपरिभागः ।

कार्ष्णाजिनिः—

"नाभिमात्रे जले स्थित्वा चिन्तयेद्दूर्वमानसः ।
अगच्छन्तु मे पितर इमं गृह्णन्त्वपोञ्जलिम् ॥

एवञ्च—नाभिमात्रे जले तिष्ठता तर्पणङ्कार्यमित्यर्थतः सिद्धे जलेप्यासीनो जलन्दद्यादिति यच्छन्दोगाह्निकलिखनं तच्चिन्त्यम्।

मरीचिः—

मुक्तहस्तन्तु दातव्यं मुद्रान्तत्र न दर्शयेत् ॥

मुक्तहस्तं प्रसारितहस्तं यथास्यादेवं न मुद्रामित्यादि तर्जन्यङ्गुष्ठ मुद्रया पितृतीर्थावबोधनं न कुर्यादित्यर्थः। शङ्खः—सौवर्णेन पात्रेण राजतौदुम्बरेण खड्गपात्रेण शङ्कुना वाऽप्युदकं पितृतीर्थं स्पृशेद्दद्यात्। औदुम्बरेण—ताम्रमयेन, शङ्कुना—हिमाद्रिघटितेन कीलकेन, खड्गघटितेनेत्यन्ये। तथा—

हिमेन सह यद्दत्तं क्षीरेण मधुना तथा।
तदप्यक्षयतां याति पितॄणांस्तु तिलोदकम् ॥

हिमं कर्पूरम्। मरीचिः—

रजते मनसा यायात् सुवर्णे हस्तनिर्गतम्।
तिलेषु च क्षणाद् गच्छेत्ताम्रे तु द्विमुहूर्तकः।
दर्भे सप्त मुहूर्त्तन्तु मन्त्रयुक्तं तदक्षयम् ॥

रजते हस्तसम्बन्ध इत्यर्थः। एवं सुवर्णादिष्वपि। यायात् पितृनिति शेषः। तथा—

यत्र तत्र हि यो यस्य तत्र तत्रोपतिष्ठते।
बहुगोषु यथा नष्टा मातरं लभते सुतः ॥

यत्र यत्रेति-स्वर्गनरकादौ य. पित्रादिः यस्य पुत्रादेः।

मनुः— **राजतै भाजनैरेषामपि वा रजतान्वितैः।**
वार्यपि श्रद्धया दत्तमक्षयायोपपद्यते ॥

एषां पितृणां कृत इति शेषः ।

तथा—

त्रीँस्त्रीञ्जलाञ्जलीन्दद्यादुच्चैरुच्चतरन्ततः ।
गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ॥

पित्रादिषट्सु जलाञ्जलयः क्रमेणोच्चतया वर्द्धनीयः । गोशृङ्गमात्रमिति तृतीयाञ्जल्युच्चैस्त्वनिर्द्देशः । गोशृङ्गन्तु द्वादशाङ्गुलानीति शिष्टाः । अत्र च शङ्खादिना भूमिष्ठस्य स्थले तर्पणमुक्तम् । बौधायनादिना तु जले । तत्र च व्यवस्थितविकल्पः शाखाभेदेन व्यवस्थितः । तथा च वाजसनेयिनां भूमिष्ठानां स्थल एव कुशोपरि वाजसनेयिगुरुणा याज्ञवल्क्येन तथाभिधानात् ।

कात्यायनः—

तर्पयेद् ब्रह्माणं पूर्वं विष्णुं रुद्रं प्रजापतिम् । देवाँश्छन्दांसि वेदानृषीन् पुराणाचार्यान् गन्धर्वानितराचार्यान् संवत्सरञ्च साषयवं देवीरप्सरसो देवानुगान्नागान् सागरान् पर्वतान् सरितो मनुष्यान् । सनकश्च सनन्दश्च तृतीयश्च सनातनः । कपिलश्चासुरिश्चैव बोढुः पञ्चशिखस्तथा ॥ ततोऽपसव्यं तिलमिश्रम् ।

काव्यवालं नलं सोमं यममर्यमणन्तथा ॥

अग्निष्वात्तान् सोमपो वर्हिषदश्च यमांश्चेत्येके ।

यमाय धर्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
औदुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥
एकैकस्य तिलैर्मिश्रांस्त्रीँस्त्रीन्दद्याज्जलाञ्जीन् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥

जीवत्पितृकोप्येतानन्याँश्चेतर उदीरतामङ्गिरस, आयन्तुन, ऊर्जं पितृभ्यो, ये चेह, मधुवाता इति ऋचं जपन् प्रसिञ्चेत्तृप्यध्वमिति त्रि र्न्नमो व इत्युक्त्वा। मातामहानाचार्यगुरुशिष्वर्त्विग्ज्ञातिबान्धवा अतर्पिता देहाद्रुधिरं पिबन्तीति।

सावयवमिति—सम्वत्सरविशेषणम्। चतुर्विध इति भूतग्रामविशेषणम्। ब्रह्माणमित्याद्युपक्रम्य भूतग्राम इति तद्विरुद्धोपसंहारेण प्रयोगं दर्शयति। तथाच—ओं ब्रह्मा तृप्यतामित्यादिरूपेण तर्पणवाक्यं कर्त्तव्यम्।

तथा च योगियाज्ञवल्क्यः—

अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु।
तृप्यतामिति सेक्तव्यं नाम्ना तु प्रणवादिना॥

अन्वारब्धेन-पश्चाल्लग्नेन। ततो नीवीत्यभिधानात् तत्पूर्वमुपवीतित्वमायाति। तदुक्तन्तेनैवः—

ब्रह्मादीनुपवीती तु देवतीर्थेन तर्पयेत्।
निवीती कायतीर्थेन मनुष्यान् सनकादिकान्॥

कायतीर्थं—कनिष्ठामूलम्। अत्रापि सनकस्तृप्यतामित्येवमादि प्रयोक्तव्यम्, उपस्थितत्वात्। प्रत्येकमेकैकोऽञ्जलिर्द्वयः, आवृत्तौ मानाभावात्।

एकैकमञ्जलिन्देवा द्वौ द्वौ तु सनकादयः।
अर्हन्ति पितरस्त्रीँस्त्रीन् स्त्रियश्चैकैकमञ्जलिम्॥

इति वाक्यस्य कल्पतरु-कामधेनु-रत्नाकरादिष्वदर्शनेन निर्मूलत्वावसायात्।

केचित्तु—इदमेव प्रमाणं मन्वानाः सनकादावञ्जलिद्वयं प्रत्येकमाहुः। ततोऽपसव्यमिति पितृधर्मोपलक्षणम्। तेन दक्षिणामुखत्व-पातितवामजानुत्वे अप्यत्र। कव्यवालादि तर्पणे तु प्रत्येकमञ्जलिद्वयं पितृधर्मकत्वात्। अत्र च—

कव्यवाहोनलश्चेति व्युत्पत्त्या, कव्यवाडनल इत्येका देवता, हव्यवाहो वै देवानां, कव्यवाहनः पितृणामितिश्रुतेः। तथा च—कव्यवाट्त्वगुणविशिष्ट एवानलः पितृगणान्तर्गत इति लक्ष्मीधरः। कामधेनु-रत्नाकर-हरिनाथ-श्रीदत्ताग्निकेषु तु कव्यवालोनलश्च द्वे एव देवते इत्युक्तं कव्यवालादयो दिव्य-यमा इति गोभिलवचनात् श्रुतेस्तु वह्निः पितृन् प्रति कव्यवाह इत्यर्थकतया प्रकृतास्पर्शात्। अतएव कव्यवालं नलमिति कामधेन्वादौ पाठः। यमां-श्चेत्येक इति एके आचार्या, यमानापि तर्पणीयानाहुः। यमायेत्यादि नम इत्यन्तं तेन यमाय नम इति तर्पणवाक्यं सिद्ध्यति।

एष्वेवान्यां वृत्तिमाह - एकैकस्येति। फलमाह—यावदिति। एव-ञ्चैकेषाम्मते यमतर्पणमपि नित्यम्। कात्यायनमते तु काम्यम्। जीवपितृ-कोऽपीति। जीवो जीवन्नित्यर्थः। तेन विद्यमानपितृकोऽप्येतान् ब्रह्मादीन् चित्रगुप्तान्तान् तर्पयेत्। अन्यांश्चेतर इति इतरप्रमीतपितृको वक्ष्यमाणान-पीत्यर्थः। उदीरतामित्यादि। अत्र षट्पुरुषेषु प्रतिपुरुषमञ्जलित्रयं पितृन् मातामहानिनि प्रतिपुरुषमभ्यस्येदिति छन्दोगपरिशिष्टात्। एवञ्चैत-न्मन्त्रनवकं पित्रादित्रिकाञ्जलिनवकस्य दानकरणम्।

मन्त्रैस्तु देयमुदकं पितृणां प्रीतिवर्द्धनैः।
उदीरतामङ्गिरस आयन्त्विन्वस्यूर्ज्जमित्यपि।
पितृभ्य इति ये चेह मधुवाता इति त्र्यृचम्॥

इति योगियाज्ञवल्क्यवचनात्, पाठिकक्रमापवादे बीजाभावात्। तथा च जपन् प्रसिञ्चेदिति सूत्रस्य जपाव्यवधाने तर्पयेदित्यर्थः, सामीप्येऽपि लडनुशासनात्। न च प्रसेचनपदं न तर्पणवाचीतिवाच्यम्, "यद्दुद्धृतं प्रसि-ञ्चेत्तु तिलान् सम्मिश्रयेज्जल" इत्यत्र तस्य तर्पणावाचित्वावसायात्। न च "पितृन् ध्याम्, प्रसिञ्चेद्वै जपन्मन्त्रान् यथाक्रममिति" योगि याज्ञवल्क्यवचने-न प्रसेकाख्ये भिन्न एव कर्मणि जप्यमानमन्त्रोपयोग इति वाच्यम्, तस्य मन्त्रैश्च

देयमुदकमिति तत्प्रतीतैकवाक्यतया तर्पण एव यथाक्रमं मन्त्रविनियोग-परत्वात्, लटश्च सामीप्येऽपि साधुत्वात्।

न च तद्वाक्ये मन्त्रैस्तर्पणं, जप्यमानमन्त्रैश्च तद्भिन्न एव प्रसेक इति वाच्यम्, तर्पणमात्रविनियोगे मन्त्रविधे र्वाक्यार्थत्वसम्भवे मन्त्रविशिष्टे कर्मान्तरविधेस्तदर्थत्वकल्पने गौरवात्। तृप्यध्वमिति च त्रिरिति तृप्यध्व-मित्युदीर्य पित्रादीन् त्रीन् प्रति त्रिः प्रतिषिञ्चेदित्यर्थः।

नमो व इत्युक्त्वा मातामहानिति नमो व इति यजूंषि पठित्वा वाक्येन त्रिर्मातामहान् एतद्वचनात्सकृदेव यजुषां पाठो, न त्वावृत्तिरिति रत्नाकरा-दयः। अन्ये तु मन्त्रैस्तु देयमुदकमिति, वचनान्मन्त्राणां पितृतर्पणकरणस्य-प्रतीतेरन्यवाक्येन व्यवधानावावृत्ति युक्तैव। अतएव मातामहानित्यत्रापि प्रत्येकमेव मन्त्रान्वयादावृत्तिः। अन्यथा मन्त्रेषु मिलितान्वयः। प्रत्येकं तर्पणान्वयश्चापेक्षित इति स न स्यात्। नमो व इत्युक्त्वा मातामहांस्तर्पये-दित्यत्र वाक्यभेदापत्तेरिति यजुषाञ्च प्रतिपुरुषं सकृदेव पाठो न त्वावृत्तिः, प्रमा-णाभावात्।

एवञ्च पित्रादित्रये मन्त्रेण व्यवधानाद्वाक्य मावर्त्तते। मातामहादित्रये तु तदभावान्न वाक्यावृत्तिरपीति इदमोपि बौद्धसन्निधिना सकृदेवाञ्जलित्रय-प्रकाशकत्वान्न तदनुरोधादव्यावृत्तिरित्येके। प्रदीपकृतस्तु प्रथमाञ्जलिकाले-ऽपराञ्जल्योरनुपादानेनाशयस्थजले च तदा युक्तानुत्पत्त्या त्यागासम्भवा-दत्रापि प्रत्यञ्जलित्यागवाक्यपाठ इत्याहुः।

वस्तुतस्तु—

द्रव्ययोग्यतयैव कर्माधिकारो, व्यवहितफलस्यापि धात्वर्थावच्छेदकत्व-सम्भवात्। तर्ह्यदानमफलमित्यादि विशेषनिषेधेन चासद्वस्तुदानप्रतिबन्ध-निरस्तत्वात्, न प्रत्यञ्जलि त्यागः। चन्द्रस्वरसोप्येवम्।

षट्पुरुषतर्पणमोटकमपहाय मोटकान्तेरण मात्रादितर्पणङ्कार्यम्।

पिण्डार्थं ये स्तृता दर्भा यैः कृतं पितृतर्पणम् ।
मूत्रोच्छिष्टे धृता ये च तेषां त्यागो विधीयते ॥

इति लघुहारीतवचनात् । छन्दोगपरिशिष्टे—"ये चास्मत्त उदकमिच्छन्ति तांस्तर्पयामीत्यवसनाञ्जलिः" । अत्र देवर्षि तर्पणयो र्यवा देयाः । "देवान् सर्वानृषीत् सर्वांस्तर्पयेदक्षतोदकैरिति" पद्मपुराणात् । अक्षताश्चेह यवाः । "यवाद्भिस्तर्पयेद्देवानिति" परिशिष्टदर्शनात् । देवतर्पणानन्तरञ्च देवक्रमेणैव मरीच्यादयो दश तर्प्याः ।

मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ।
प्रचेतसं वशिष्ठञ्च भृगुन्नारदमेव च ॥

इति देवतातर्पणानन्तरं याज्ञवल्क्येनाभिधानात् । पितुश्च संन्यासादिना तर्पणानर्हत्वे जीवत्पितृकोऽपि पितामहादितर्पणङ्कुर्यात् ।

यदि स्याज्जीवपितृक एतान् दिव्यान् पितॄंस्तथा ।
येभ्यो वापि पितादद्यात्तेभ्यो वापि च दापयेत् ॥

इति याज्ञवल्क्यवचनेन जीवत्पितृकस्यात्राधिकारप्रतीतेः ।

ब्राह्मणादि हते ताते पतिते सङ्गवर्जिते ।
व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ ॥

इति छन्दोगपरिशिष्टवचनेन जीवतः पितुरनधिकारस्य पुत्रेणापेक्षणीयत्वसिद्धेः । अत्र शर्मान्तं नाम प्रयोज्यम्—

शर्मन्नर्घादिके कार्यं शर्मा तर्पण कर्मणि ।
शर्मणोऽक्षय्यकाले स्यादेवङ्कुर्वन्न दुष्यति ॥

इति गोभिलवचनात् । अस्मत्पदञ्चदेयम् । न च सम्बन्धिशब्दत्वादेव तल्लाभः, सम्बन्धिपदानां समभिव्याहृतपदार्थान्वितस्वार्थबोधकत्व-

व्युत्पत्तेः। प्रकृते च तर्पयितृवाचकपदाभावात्। अतएव कल्पतरुरप्येवम्। यदिन्यायादत्रान्वय इति प्राभाकराः।

षट्पुरुषतर्पणानन्तरं तत्स्त्रीणान्तर्पणम्। "पितॄन् मातामहाँश्च तर्पयित्वैषाञ्च स्त्रियस्तर्प्यास्त्रीन् पितृतस्त्रीन्मातृत" इति गोभिलसूत्रात्। पितृतः पितृपक्षे, मातृतः मातृपक्षे। स्त्रीणाञ्च तर्पणे नावृत्तिः प्रमाणाभावात्।

स्त्रीनाम च देव्यन्तमुच्चार्यम्। "दान्तन्नाम च स्त्रीणामिति" नामप्रकरणे गोभिलवचनात्। आचार्येत्यादि आचार्य उपनीय साङ्गकवेदाध्यापकः। गुरुरल्पस्य बहुनो वा श्रुतस्योपदेष्टा। ज्ञाति वंश्यः, बान्धवो-मातृष्वस्रीय-पितृष्वस्रीयादिः।

शङ्खः—

"बान्धवानां कृत्वा सुहृदां कुर्यात्।" सुहृदो मित्राणि। मित्रायाप्यसवर्णाय जलं न देयम्। "सवर्णेभ्यो जलं देयं नासवर्णे कदाचन इति योगियाज्ञवल्क्यवचनात्। भीष्माय त्वसवर्णायापि, भीष्माष्टम्यां तर्पणङ्कार्यम्। भीष्माय तु जलं ददुस्त्रयो वर्णा द्विजातय इति शिष्टाचारोपष्टब्ध वचनात्। पितुरसवर्णस्यापि तर्पणादि शूद्रापुत्रेण कार्यम्।

"ब्राह्मणेन न कर्त्तव्यं शूद्रस्य त्वौर्द्ध्वदेहिकम्।
शूद्रेण वा ब्राह्मणस्य विना पारशवात्किचित्॥"

इति पारस्करवचनात्। और्द्ध्वदेहिकमिति मरणोत्तरसर्वकर्मपरम्। पद्मपुराणे—

ब्रह्माणन्तर्पयेपूर्वं विष्णुं रुद्रं प्रजापतिम्।
देवा यक्षास्तथा नागा गन्धर्वाप्सरसोगणाः॥
क्रूराः सर्पाः सुपर्णाश्च तरवो जम्भकाः खगाः।
विद्याधारा जलाधारास्तथैवाकाशगामिनः॥

निराधाराश्च ये जीवाः पापे धर्मे रताश्च ये ।
तेषामाप्यायनायैतद्दीयते सलिलम्मया ॥
कृतोपवीती देवेभ्यो निवीती च भवेत्ततः ।
मनुष्यांस्तर्पयेद् भक्त्या ऋषिपुत्रानृषींस्तथा ॥
सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥
सर्वे ते तृप्तिमायान्तु मद्दत्तेनाम्बुना सदा ।
मरीचिमत्र्यङ्गिरसौ पुलस्त्यं पुलहं क्रतुम् ॥
प्रचेतसं वशिष्ठञ्च भृगुनारदमेव च ।
देवान् सर्वानृषीन् सर्वांस्तर्पयेतात्ततोदकैः ॥
अपसव्यं ततः कृत्वा सव्यं जानु च भूतले ।
अग्निष्वात्तांस्तथा सौम्यान् हविष्मतस्तथोष्मपान् ॥
सुकालिनो बर्हिषद आज्यपांस्तर्पयेत्ततः ।
तर्पयेच्च पितॄन् भक्त्या, सतिलोदकचन्दनैः ॥
दर्भपाणिस्तु विधिना हस्ताभ्यान्तर्पयेत्ततः ।
पित्रादीनामगोत्रेण तथा मातामहानपि ॥
सन्तर्प्य भक्त्या विधिवदिमम्मन्त्रमुदीरयेत् ।
ये बान्धवाऽबान्धवा वा येन्यजन्मनि बान्धवाः ॥
ते तृप्तिमखिला यान्तु यश्चास्मत्तोभिवाञ्छति ॥

अत्र च ब्रह्मादितर्पणचतुष्के प्रयोगाकाङ्क्षायां योगियाज्ञवल्क्योक्त एव प्रयोगो ग्राह्यः । तस्य शाखाविशेषानुल्लेखेन प्रवृत्तत्वात् । देवादितर्पणे तु—देवा-यक्षा इत्याद्यविकृतं वाक्यं, श्रुतवाक्यपरित्यागे हेत्वभावात् । एवं सनकादावपि ।

मरीच्यादौ तु वाक्याकांक्षायां योगियाज्ञवल्क्योक्त एव प्रयोगानुक्रमः ।

अत्र च 'निवीती तु भवेत्तत' इत्युपक्रमदर्शनादृषितर्पणेऽपि निवीतित्वमिति भ्रमो हेयः। तस्य मनुष्यधर्मत्वेन तन्मात्रपरतयैवाभिधानात्। मरीच्यादौ तूपवीतित्वमेव देवधर्मत्वात्। अक्षतोदकैरित्यत्राक्षतपदं यवपरम्। यवादिभस्तर्पयेदिति परिशिष्टवचनात्। अग्निष्वात्तादितर्पणेऽपि पितृतर्पणे च स्वधानमस्कारान्वितं वाक्यं "नमस्कारस्वधान्वितानीति योगियाज्ञवल्क्यवचनात्। पित्रादीन्नामगोत्रेणेति विधिर्न तु विशेषविधिः। तेन त्रैवर्णिकैरेतदनुसारेणापि तर्पणे क्रियमाणे पित्रादितर्पणेषु स्वस्वसूत्रानुसारेण मन्त्रप्रयोगः कर्त्तव्यः। "विना दर्भैश्च मन्त्रैश्च पितृणान्नोपतिष्ठत" इति शङ्खवचनेन सम्भवति मन्त्रैश्च तदप्रयोगेऽनिष्टप्रतिपादनत्। ये बान्धवा इत्यादि तन्मन्त्रोच्चारणङ्कल्पान्तरेष्यविरुद्धम्। तर्पणेषु सर्वेषान्दर्भाः। पितृतर्पणे तु-त्रैवर्णिकानां मन्त्रा नियताः। तिलादयस्तु नावश्यकाः।

"तिलानामप्यलाभे तु सुवर्णरजतान्वितम्।
तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण चाम्भसा॥"

इति मरीचिवचनात्। विष्णुपुराणे—

त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत्।
ऋषीणाञ्च यथान्यायं सकृच्चापि प्रजापतेः॥
पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते।
पितामहेभ्यश्च तथा प्रीणयेत्प्रपितामहान्॥
मातामहाय तत्पित्रे तत्पित्रे च समाहितः।
दद्यात्पित्र्येण तीर्थेन काम्यञ्चान्यच्छृणुष्व मे॥
मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथैव च।
गुरवे मातुलादीनां स्निग्ध-मित्राय भूभुजे॥

इदञ्चापि जपेदम्बु दददात्मेच्छया नृप ।
उपकाराय भूतानां कृतदेवादितर्पणः ॥
देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः ।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ॥
जलेचरा भूनिलया वायवाधाराश्च जन्तवः ।
तृप्तिमेते प्रयान्त्वाशु मद्दत्तेनाम्बुना सदा ॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः ।
तेषामाप्यायनायैतद्दीयते सलिलं मया ॥
येऽबान्धवा बान्धवा वा येऽन्यजन्मनि बान्धवाः ।
ते तृप्तिमखिला यान्तु ये चास्मत्तोऽभिकाङ्क्षिणः ॥

त्रिरप इत्यादि । ओं देवास्तृप्यन्तामितिवाक्येन देवेभ्योऽञ्जलित्रयम् । ओम् ऋषयस्तृप्यन्तामितिवाक्येन ऋषिभ्योऽञ्जलित्रयम् । ओं प्रजापतिस्तृप्यन्तामितिवाक्येन प्रजापतय एकोऽञ्जलिरित्येव जीवत्पितृकेण तर्पणीयम् ।

केचित्—इत एव वचनाद्देवादि तर्पणेऽञ्जलित्रयम् । काण्वायनादौ संख्याकाङ्क्षाया अपूर्त्तेः । अतएव यन्मतेऽपि कल्पान्तरमिदं तन्मतेऽपि देवादितर्पणे कातीयादिकल्पेऽप्यञ्जलित्रयमेव । स्मृतिशास्त्रविकल्पस्तु—आकाङ्क्षापूरणे सतीति वचनात्, प्रकृते च तदपूरणात् । अतएव कल्पतरुरप्येवमित्याहुः ।

तन्न । पृथग्विधौ गुणविधानासम्भवात् । किञ्च विशिष्येवाभ्यासस्य कथनाद्देवर्ष्योरनभ्याससिद्धेः । पारिजातादयोऽप्येवम् । पितृणामित्यादि प्रमीतपितृकपरम् । अत्र च मात्रादितर्पणस्य काम्यत्वाभिधानं फलविशेषकथनार्थम् । नित्यता तु तस्य स्मृत्यन्तरात् । देवासुरा इत्यादि तु काम्यतः

कातीयादितर्पणशेषेपि कर्त्तुमुचितम्। इदञ्च तर्पणमेभिरेव श्लोकैः, इदञ्चापि जपेदम्बु ददादित्यभिधानात्।

छायां यदीच्छेच्छ्रमहो तपार्त्तः, पयः पिपासुः, क्षुधितोऽन्नमन्नम्।
बालो जनित्रीं जननी च बालं, योषित्पुमांसं पुरुषश्च योषाम्॥

तथा सर्वाणि भूतानि स्थावराणि चराणि च।
विप्रादुदकमिच्छन्ति सर्वाभ्युदयकाङ्क्षिणः॥
तस्मात्सदैव कर्त्तव्यमकुर्वन् महतैनसा।
युज्यते ब्राह्मणः कुर्वन् विश्वमेतद्विनर्ति च॥

इति छन्दोगपरिशिष्टवचनेनाह्नतनतर्पणस्य नित्यत्वे सिद्धे प्रातस्तनं यद्दयुदयोत्तरं क्रियते। तदा तेनैव नित्यनिर्वाहात्। द्वितीयं तर्पणं वैधस्नानकरण पक्ष एव करणीयम्। यदा तु प्रातस्तनन्तर्पणमुदयात्प्रागेव कृतं तदा दिवास्नानाकरणेपि तर्पणमवश्यं कार्यमिति।

॥ अथ कातीय-तर्पणप्रयोगः ॥

तत्र पूर्वाभिमुखः "ओं विश्वेदेवा स आगत श्रृणुता म इमग्वं हवम्। एदम्बर्हिर्निषीदत। ओं विश्वेदेवाः श्रृणुतेमं हवम्मे ये अन्तरिक्षे म उप ह्वविष्ठ। ये अग्नि जिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्" इत्यावाह्य सयवजलेन वामान्वारब्धदक्षिणकरेण दर्भेर्द्दर्भेषु पूर्वाग्रेषु देवानृषींश्च तर्पयेत्। तद्यथा—

ओं ब्रह्मा तृप्यताम्, ओं विष्णुस्तृप्यताम्, ओं रुद्रस्तृप्यताम्, ओं प्रजापतिस्तृप्यताम्, ओं देवास्तृप्यन्ताम्, ओं छन्दांसि तृप्यन्ताम्, ओं वेदास्तृप्यन्ताम्, ओं ऋषय तृप्यन्ताम्। ओं पुराणाचार्या तृप्यन्ताम्, ओं गन्धर्वास्तृप्यन्ताम्, ओं इतराचार्यास्तृप्यन्ताम्, ओं संवत्सरः सावयवस्तृप्यताम्, ओं देव्यस्तृप्यन्ताम्, ओं अप्सरसस्तृप्यन्ताम्, ओं देवानुगास्तृप्यन्ताम्, ओं नागास्तृप्य-

न्ताम्, ओं सागरास्तृप्यन्ताम्, ओं पर्वतास्तृप्यन्ताम्, ओं सरितस्तृप्यन्ताम्, ओं मनुष्यास्तृप्यन्ताम्, ओं यक्षास्तृप्यन्ताम्, ओं रक्षांसि तृप्यन्ताम्, ओं पिशाचास्तृप्यन्ताम्, ओं सुपर्णास्तृप्यन्ताम्, ओं भूतानि तृप्यन्ताम्, ओं पशवस्तृप्यन्ताम्, ओं वनस्पतयस्तृप्यन्ताम्, ओं ओषधयस्तृप्यन्ताम्, ओं भूतग्रामश्चतुर्विधस्तृप्यन्ताम् ।

ओं मरीचिस्तृप्यताम्, ओं अत्रिस्तृप्यताम् ओं अङ्गिरास्तृप्यताम् ओं पुलस्त्यस्तृप्यताम्, ओं पुलहस्तृप्यताम्, ओं क्रतुस्तृप्यताम्, ओं प्रचेतास्तृप्यताम्, ओं वशिष्ठस्तृप्यताम् ओं भृगुस्तृप्यताम् ओं नारदस्तृप्यताम् ॥

ततो निवीती प्रजापतितीर्थेन आचारादुदङ्मुखः केवलजलेन—"ओं सनकस्तृप्यताम्, सनन्दस्तृप्यताम्, ओं सनातनस्तृप्यताम्, ओं कपिलस्तृप्यताम्, ओं आसुरिस्तृप्यताम्, ओं वोढुस्तृप्यताम्, ओं पञ्चशिखस्तृप्यताम्" ।

ततः प्राचीनावीती सव्यं जान्वानाम्य दक्षिणामुखो दक्षिणाग्रेषु कुशेषु प्रत्येकं सलिलत्रयेण पितृतीर्थेन तर्पयेत्—

ओं कव्यवाडस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥
ओं नलस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥
ओं सोमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥
ओं यमस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥
ओं अर्यमा तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः ॥
ओं अग्निष्वात्तास्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधा नमः ॥
ओं बर्हिषदस्तृप्यन्तामिदं तिलोदकं तेभ्यः स्वधा नमः ॥

ओं यमाय नमः, ओं धर्मराजाय नमः, ओं मृत्यवे नमः, ओं अन्तकाय नमः, ओं वैवस्वताय नमः, ओं कालाय नमः, ओं सर्वभूतक्षयाय नमः, ओं औदुम्बराय नमः, ओं दध्नाय नमः, ओं नीलाय नमः ओं परमेष्ठिने नमः, ओं वृकोदराय नमः, ओं चित्राय नमः, ओं चित्रगुप्ताय नमः ॥

ततः—

ओं उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि ।
उशन्नुशत आवह पितॄन् हविषे अत्तवे ॥
ओं आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन्यज्ञे स्वधया मदन्तोधिब्रुवन्तु तेऽवन्त्वस्मान् ॥
ओं आगच्छन्तु मे पितर इमं गृह्णन्त्वपोञ्जलिम् ।

इति पितृनावाह्य,

ओम् उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः ।
असुं य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु ॥

ओम् अद्यामुकगोत्रोऽस्मत् पिताऽमुकशर्मा तृप्यतामिदं तिलोदकन्तस्मै स्वधा नम इति प्रथमम् ।

ओं अङ्गिरसो नः पितरो नवग्वाऽथर्वाणो भृगवः सोम्यासः ।
तेषां वयग्वं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम ॥"

इति मन्त्रेण वाक्येन च द्वितीयम् ।

"ओम् आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः ।
अस्मिन्यज्ञे स्वधया मदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान् ॥"

इति मन्त्रेण वाक्येन च तृतीयम् अञ्जलिं पित्रे दद्यात् ।

"ओम् ऊर्ज्जं वहन्तीरमृतं घृतं पयः कीलालं परिश्रुतम् ।
स्वधा स्थ तर्पयत मे पितॄन् ॥"

ओम् अद्यामुकगोत्रोऽस्मत्पितामहोऽमुकशर्मा तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इति प्रथमम्,

"ओं पितृभ्यः स्वधायिभ्यः स्वधा नमः, पितामहेभ्यः स्वधा-

यिभ्यः स्वधा नमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः ॥
अक्षन्पितरोऽमीमदन्तः पितरस्तृप्यन्तु पितरः पितरः शुन्धध्वम् ॥"

इति मन्त्रेण वाक्येन च द्वितीयम्,

"ओं ये चेह पितरो ये च नेह यांश्च विद्म यांउ उ च न प्रविद्म ।
त्वं वेत्थ यति ते जातवेदः स्वधाभि र्यज्ञ्ग्ं सुकृतं जुषस्व ॥"

इति मन्त्रेण वाक्येन च तृतीयम् अञ्जलि पितामहाय दद्यात् ।

"ओं मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ॥"

ओम् अद्यामुकगोत्रोऽस्मत्प्रपितामहोऽमुकशर्मा तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः । इति प्रथमम्,

"ओं मधु नक्तमुतोषसो मधुमत्पार्थिवग्ं रजः ।
मधु द्यौरस्तु नः पिता ॥"

इति मन्त्रेण वाक्येन च द्वितीयम् ।

"ओं मधुमान्नो वनस्पति र्मधुमाँ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥"

इति मन्त्रेण वाक्येन तृतीयमञ्जलि प्रपितामहाय दद्यात् । ततः "ओं तृप्यध्वं तृप्यध्वं तृप्यध्वम् इति मिलित पित्रादिकमुद्दिश्य–अञ्जलित्रयन्दद्यात् ।

"ओं नमो वः पितरो रसाय, नमो वः पितरः शोषाय
नमो वः पितरो जीवाय, नमो वः पितरः स्वधायै,
नमो वः पितरो घोराय, नमो वः पितरो मन्यवे ।
नमो वः पितरः पितरो नमो वो गृहान्नः पितरो
दत्त सतो वः पितरो देष्म" ॥

इति मन्त्रं पठित्वा, ओम् अद्यामुकगोत्रोऽस्मन्मातामहोऽमुकशर्मा तृप्यतामिदन्तिलोदकं तस्मै स्वधा नम इति मातामहायाञ्जलित्रयं दद्यात्। अत्र वाक्यं प्रत्यञ्जलीत्यन्ये।

एवमेव प्रमातामह वृद्धप्रमातामहयोरपि। श्रीदत्ताह्निकादौ, स्वधान्तमेव वाक्यमुच्चार्यमिति लिखितम्। तत ओम् अद्यामुकगोत्राऽस्मन्मातामुकदेवी तृप्यतामिदन्तिलोदकं तस्यै स्वधा इति सकृन्मातरम्। एवमेव पितामही-प्रपितामही-मातामही-प्रमातामही-वृद्धप्रमातामही तर्पयेत्। ततः— प्रपितामहादूर्द्ध्वमपि यावतां नाम ज्ञायते तावत एकैकेनाञ्जलिना नामगोत्रस्वधाकारैस्तर्पयेत्। तत आचार्यगुरु-शिष्य-मातृपक्षसम्बन्धि-बान्धव-सुहृदस्तथैव तर्पयेत्।

ततोपसव्येन "ओं ये ऽत्रास्मत उदकमिच्छन्ति तांस्तर्पयामीदञ्जलं तेभ्यः स्वधे" त्यवसानाञ्जलिन्दद्यात् इति प्रदीपः।

ततः— "देवासुरास्तथा नागाः यक्षो गन्धर्व-राक्षसाः।
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः॥
जलेचरा भूनिलया वायवाधाराश्च जन्तवः।
प्रीतिमेते प्रयान्त्वाशु मद्दत्तेनाम्बु॥ऽखिलाः॥
नरकेषु समस्तेषु यातनासु च ये स्थिताः।
तेषामाप्यायनायेतद्दीयते सलिलम्मया॥
ये बान्धवाऽबान्धवा वा येऽन्यजन्मनि बान्धवाः।
ते तृप्तिमखिला यान्तु ये चास्मत्तोयकांक्षिणः॥"

इत्येभिः श्लोकैर्देवविधिना काम्यतर्पणङ्कार्यम्।

पद्मपुराणीय—विष्णुपुराणीयतर्पण प्रयोगौ तु स्पष्टावेव, किन्तु— "येबान्धवा बान्धवा वा येन्यजन्मनिबान्धवाः। ते तृप्तिमखिलायान्तु यच्चास्मत्ताभिवाञ्छति।" इत्यनेन पितृविधिनाञ्जलिरिति विशेषः।

अथ वशिष्ठः—

"स्नानशाट्यान्तु दातव्या मृदस्तिस्रो विशुद्धये ॥"

पराशरः—

"जलमध्ये तु यः कश्चिद्द्विजाति र्ज्ञानदुर्बलः ।
निष्पीडयति तद्वस्त्रं स्नानन्तस्य वृथा भवेत् ॥"

योगियाज्ञवल्क्यः—

"वस्त्रनिष्पीडितं तोयं स्नातस्योच्छिष्टभागिनः ।
भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत् स्थले ॥"

उच्छिष्टभागिनस्तु—

"असंस्कृतप्रमीतानां त्यागिनांकुलयोषिताम् ।
उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरश्च यः ॥
उच्छेषणं भूमिगतमजिह्मस्याशठस्य च ।
दासवर्गस्य तत्पित्रे भागधेयं प्रचक्षते ॥"

तेनैतानुद्दिश्यास्तृतकुशत्रयायां भूमौ वस्त्रनिष्पीडनोदकं देयम् ।

तथा—

"निष्पीडयति यः पूर्वं स्नानवस्त्रं तु तर्पणात् ।
निराशाः पितरस्तस्य यान्ति देवाः महर्षिभिः ॥
अन्नप्रकरवत्तस्य अपसव्येन पीडनम् ।
पीडयित्वा ततः पश्चाज्जपं कुर्यात् सुविस्तरम् ॥"

अन्नप्रकरवत्—श्राद्धोच्छिष्टान्नविकिरवत् । तेन दक्षिणामुखत्वम-संस्कृत-प्रमीतादुद्देश्यता च लभ्यते । अतएवात्र स्थलदाननैयत्यम् । असंस्कृत-प्रमीतानामित्यादिना तत्रैव दाननियमात् । मृत्तिकादानमपसव्येनैव, तादृश-निःपीडनाङ्गत्वात् । एवञ्चास्य स्थलनैयत्ये शुष्कवाससैवैतत्कार्यम् ।

"यज्जले शुष्कवस्त्रेण स्थले चवार्द्रवाससा ।
सर्वन्तु निष्फलं प्रोक्तं बहिर्जानु च यत्कृतम् ॥"

इति दक्षवचनात् । अत्र च—गोभिलोक्तमन्त्रः—

"ये चास्माकं कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥"

अथैतत्प्रयोगः—कृतापसव्यः शुक्लवाससा मृण्मयेनाधरीयं वस्त्रं प्रक्षाल्य भूमौ कुशत्रयोपरि पितृदासादीनुद्दिश्य सतिलं वस्त्रनिष्पीडनोदकं पितृतीर्थेन मोटकेन दक्षिणामुखे दद्यात् ।

एतदनन्तरं यो जपः स छन्दोगविषयः, गोभिलसम्बादात्, कात्यायनादिभिरनभिधानात् । अत्र च येन कल्पेन स्नानं कृतं तेनैव तर्पणमपि कार्यम् उपस्थानादे र्निवेदनान्तस्य स्नानत्वात्, विजातीय प्रयोगस्य च व्यवधायकत्वादिति ।

॥ अथ तर्पणोत्तरकर्म ॥

विष्णुपुराणे—

"आचम्य प्रयतो दद्यात् सूर्याय सलिलाञ्जलिम् ।"

मन्त्रमाह—

"नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे ।
जगत्सवित्रे शुचये सवित्रे कर्मदायिने ॥"

कात्यायनः—निष्पीड्य वस्त्रमाचम्य ब्राह्म-वैष्णव-रौद्र-सावित्र-मैत्र-वारुणैस्तल्लिङ्गैरर्चयेदथ हंस इत्युपस्थाय प्रदक्षिणीकृत्य नमस्कृत्य दिशश्च देवताश्च ब्रह्माग्निपृथिव्योषधिवाग्वाचस्पतिविष्णुमहद्भ्यो अद्भ्यो अपां

पतये वरुणाय नमः इति सर्वत्र संवर्चसेति मुखं विमृशेत्। देवा गातु विद इति विसर्ज्जयेत्, स्नानविधिरेषस्नानविधिः। तल्लिङ्गैः— ब्रह्मादिप्रकाशकैः। अर्चयेत्— ब्रह्मादीनितिशेषः। एषाञ्च पूजा पुष्पैरेव। तथा च योगियाज्ञवल्क्यः—

"ध्यात्वा प्रणवपूर्वन्तु दैवतं स्वसमाहितः।
नमस्कारेण पुष्पाणि विन्यसेत्तु पृथक् पृथक् ॥"

एवञ्च मन्त्रैस्तल्लिङ्गैरिति वचनं न मिलितदेवतापरम्। तेन ब्रह्म जज्ञानमिति मन्त्रेण ब्रह्मपूजेत्यादि सिद्ध्यति।

दिशश्चेति चकारान्नमस्कृत्येत्यनुषज्यते। नम इति सर्वत्रेत्युपसंहारात्। दिशश्च देवताश्च मिलिता एव नमस्याः दिशश्च देवताश्चेति सूत्रणात्। न तु प्राचीत्वादिना, मानाभावात्। देवता इह दिशामेव आदृत्य तु नमस्कुर्याद्दिशो देवता अपीति, योगियाज्ञवल्क्यवचनात्। ब्रह्मादौ महदन्तमोषधिवर्ज्जमेकवचनम्। तदुक्तं योगिना—

"ब्रह्मणेऽग्नये पृथिव्यै चोषधीभ्यस्तथैव च।
वाचे च वाचस्पतये विष्णवे महते तथा ॥"

इति स्नानविधिरेष इत्युपसंहारः। स च एतत्पर्यन्तस्नानानुवृत्तिज्ञापनार्थः। पुनः स्नानविधिरिति माध्याह्निकस्नानविधेरन्यत्रातिदेशार्थः ॥

॥ तत्रायं पूजाप्रकारः ॥

"ओं ब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्विसीमतः
सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः ॥
सतश्च योनिमसतश्च विवः ॥" ओं ब्रह्मणे नमः ॥

"ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पाग्वंसुरे ॥" ओं विष्णवे नमः ॥
"ओं नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
बाहुभ्यामुत ते नमः ॥" ओं रुद्राय नमः ॥
"ओं आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥"
ओं सवित्रे नमः ॥
"ओं मित्रस्य चर्षणी धृतो वो देवस्य सानसि ।
द्विम्नं चित्रश्रवस्तमम् ॥" ओं मित्राय नमः ॥
"ओं इमम्मे वरुण श्रुधी हव्यमद्या च मृडय ।
त्वामवस्युराचके ॥" ओं वरुणाय नमः ॥

इति ब्रह्मादीन् सम्पूज्य उत्थाय - "ओम् अदृश्रमस्य केतवो विरश्मयो जनाँ २ अनु भ्राजन्तो अग्नयो यथा ॥ ओं हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथि र्दुरोणसत् । नृषद्वर सदृत सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥" इत्याभ्यां सूर्यमुपस्थाय - प्रदक्षिणीकृत्य, आदित्याय नम इति नमस्कृत्य, ओं दिग्भ्यो नमः । ओं देवताभ्यो नमः । ओं ब्रह्मणे नमः । ओं अग्नये नमः । ओं पृथिव्यै नमः । ओं ओषधीभ्यो नमः । ओं वाचे नमः । ओं वाचस्पतये नमः । ओं विष्णवे नमः । ओं महद्भ्यो नमः । ओं अद्भ्यो नमः । ओं अपाम्पतये नमः । ओं वरुणाय नमः । इति नमस्कृत्य,

ओं संवर्चसा पयसा सन्तनूभिरगन्महि मनसा सग्वं शिवेन ।
त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम् ॥

इति जपन् करद्वयेन मुखं संस्पृश्य—

"ओं देवा गातुविदो गातुं वित्वा गातु मित ।
मनसस्पत इमन्देव यज्ञग्वं स्वाहा वातेधाः ॥"

इति पूजितदेवता विसर्ज्जयेत् ।

अथ योगि याज्ञवल्क्यः—

"प्रक्षाल्य तीरदेशन्तु गत्वा स्वं धर्ममाचरेत् ॥"

गत्वा—गृहमिति शेषः । तथा—

"स्रवन्त्यादिषु चाचम्य सोपानत्को ह्यसंस्पृशन् ।
आगतः सोदपात्रन्तु यत्नेन शुचिरेव सः ॥
तेनोदकेन द्रव्याणि प्रोक्ष्याचम्य तथा गृहे ।
ततः कर्माणि कुर्वीत नित्यं वै यानि कानि च ॥
पात्रादिरहितं तोयमुद्धृतं सव्यपाणिना ।
न तेन प्रोक्षण कुर्यात् वस्त्रनिःपीड़नेन च ॥
सौवर्णं राजतं ताम्रं मुख्यं पात्रं प्रकल्पितम् ।
तदभावे स्मृतं पात्रं स्रवते यन्न धारितम् ॥

शातातपः—

"बहिर्न्नद्यादिष्वाचान्तः सोदकः कांश्चिदस्पृशन् ।
गृह्यागतोपि यत्नेन शुचिरेव हि मानवः ॥

तथा— "नाधोवस्त्रैकदेशेन शुद्ध्यर्थमप आहरेत् ।
यद्यानीतन्तु सव्येन प्रोक्षयेद्दक्षिणेन तु ॥"

पद्मपुराणे—

"आचम्य विधिवत्सम्यगालिखेत्पदमग्रतः ।
अक्षताद्भिः सपुष्पाभिः सतिलोदकचन्दनैः ॥

अर्घपाद्ये प्रयत्नेन सूर्यनामानुकीर्त्तनैः ।
ओं नमस्ते विष्णुरूपाय नमस्ते ब्रह्मरूपिणे ॥
सहस्ररश्मये नित्यं नमस्ते सवतेजसे ॥
नमस्ते रुद्रवपुषे नमस्ते भक्तवत्सल ।
पद्मनाभ नमस्तेस्तु कुण्डलाङ्गदभूषण ॥
नमस्ते सर्वलोकेश सुप्तानामपि बुद्ध्यसे ।
सुकृतं दुष्कृतञ्चैव सर्वम्पश्यसि सर्वदा ॥
सर्वदेव नमस्तेस्तु प्रसीद मम भास्कर ।
दिवाकर नमस्तेस्तु प्रभाकर नमोस्तु ते ।"

अक्षतास्तण्डुलाः, सूर्यार्घान्तरे तथा दर्शनात् । अर्घपाद्यदातव्ये, इति शेषः ॥

॥ अथ देवपूजा ॥

पद्मपुराणे—"एवं सूर्यं नमस्कृत्य त्रिः कृत्वा च प्रदक्षिणम् ।
द्विजं गां काञ्चनं स्पृष्ट्वा ततो विष्णुगृहं विशेत् ।
आशयस्थञ्च सम्पूज्य प्रतिमास्वपि पूजयेत् ॥"

आशयस्थं—जलाशयस्थम् विष्णुमिति, शेषः ।

"आप आयतनं तस्य तस्मात्तासु सदा हरिः ॥"

इति विष्णुनाभिधानात् । एवञ्च विष्णुपूजा नित्या फलनिरपेक्ष्य विधि-श्रवणात् । एवमिष्टदेवतापूजापि नित्यैव ।

विष्णुपुराणे सूर्याञ्जलिमुक्त्वा—

"ततो गृहार्चनं कुर्यादभीष्टसुरपूजनम् ।
जलाभिषेकपुष्पाणां धूपादीनां निवेदनैः ॥"

इत्यभिधानात् । आदिपदेन गन्धनैवेद्यग्रहणम् ।

याज्ञवल्क्यः—

"शान्तसंवाहनं रोगि-परिचर्या सुरार्चनम् ।
विप्रपादोदकोच्छिष्टमार्जनं गोप्रदानवत् ।
गवाह्निकं देवपूजा वेदाभ्यासः सविप्लवः ।
नाशयन्त्याशु पापानि महापातकजान्यपि ॥

यमः—

देवमाल्यापनयनं देवागारसमूहनम् ।
स्नपनं सर्वदेवानां गोप्रदानफलं स्मृतम् ॥

माल्यं—निर्माल्यम् । स्नपनम्-उदकेन सर्वत्र स्नाने पलानामष्टोत्तर-शतं ग्राह्यम् । तदुक्तं ब्राह्मे—

"देवानां प्रतिमा यत्र घृताभ्यङ्गक्षमा भवेत् ।
पलानि तस्यै देयानि संख्याया पञ्चविंशतिः ॥
अष्टोत्तरं पलशतं स्नाने देयञ्च सर्वदा ।
द्वे सहस्रे पलानान्तु महास्नाने तु संख्यया ॥
दातव्यं येन सर्वासु दिक्षु निर्यातितं घृतम् ॥

अत्र घृतप्रतिमे उपलक्षणे । तेन दुग्धादिनापि । लिङ्गेपि चेयमेव संख्या । कालिकापुराणे—

"शिवं भास्करमग्निञ्च केशवं कौशिकीमपि ।
मनसानर्चयन् याति देवलोकादधोगतिम् ॥"

मनसाप्यनर्चयन्नित्यन्वयः । तेन पुष्पाद्यभावे मनसाप्येते पूज्याः । कौशिकी-दुर्गा ।

तथा—

"वरं प्राणपरित्यागः शिरसो वाथ कर्त्तनम् ।
न त्वसंपूज्य भुञ्जीत केशवं कौशिकीं शिवम् ॥

मात्स्ये—

आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ।
ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात् ॥"

एतेषु फलेष्वमीषां शीघ्रदातृता । देवीपुराणे—

"महागणपतेः कर्म सिद्धिं प्राप्नोति मानवः ।
सर्वं जगद्वशीकुर्यान्महागणपतिः सदा ॥
स्वर्गापवर्गसंसिद्धिं दुर्गायागात् प्रजायते ॥

यागः—पूजा । अत्र—शिवदुर्गयोः पूजा काम्या, सफलविधिश्रवणात् । शिवपूजायान्तु, यावज्जीवप्रतिज्ञयेत्युपक्रमेण सति सङ्कल्पे नित्यत्वमिति स्फुटमेवाभिधानात् । यश्चाग्न्यादिपूजाऽकरणे निन्दार्थवादः, स तत्तदिष्टदेवतात्वपक्षे नित्यतया तदकरणे द्रष्टव्यः ।

न चाकरणेऽनिष्टश्रवणान्नित्यत्वम् । करणे फलश्रवणात्काम्यत्वमिति जीविफलकामस्य संवलिताधिकरणत्वम् इति वाच्यम् । नित्यकाम्यापूर्वयो र्द्वारफलयोरभिधाने तन्त्रासम्भवादावृत्तौ च वाक्यभेदापत्तेरिति श्रीदत्ताह्निकम् नित्यानामपि सफलत्वादपूर्वस्यावाच्यत्वाच्च संवलिताधिकरणत्व एव पञ्चदेवताऽर्चन इत्यन्ये । अत्र च न पाठिकक्रमादरः, किन्तु सर्वादौ सूर्यपूजा, "यावन्न दायते भानोरि"त्यादिवचनात् ।

अपूज्य प्रथमं सूर्यमपरान् यः प्रपूजयेत् ।
न तद्भूतकृतं पाद्यं संगृह्णन्ति देवताः ॥

इति ब्रह्मपुराणाच्च। अत्र च सूर्याग्नि-दुर्गा-शिव-विष्णुत्वेन देवतात्वं तथैव शिष्टाचारात्। नित्यपूजा च मध्याह्न-स्नानोपरि, ततो गृहार्चनमित्यादिना मध्याह्न-स्नान-सन्ध्यावन्दनानन्तरं तद्विधानात्।

यत्त—

"मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्।
पूर्वाह्ण एव कुर्वीत देवतानाञ्च पूजनम्॥"

इति मनुवचनं, तत्काम्यपूजापरम्। यत्तु—

"सुखोषितास्तां रजनीं प्रातः सर्वे कृताह्निकाः।
विविशुस्तां सभां दिव्यां कितवैरनुसेविताम्॥"

इति भारतवचनम्। तदप्रत्याख्येयकर्मानुरोधेनानन्यगत्या मध्याह्निकानां नित्यानां मध्याह्नात् प्रागपि करणमदुष्टमित्येवंपरम्। अत्रापि न क्रमभङ्गः वोजाभावात्। तेन मध्याह्नसन्ध्यापि तदा कर्त्तव्येति नेयम्। अत्र च पूजायां सर्ववर्णानामधिकारः।

क्षमा शौचं दमः सत्यं दानमिन्द्रियनिग्रहः।
अहिंसा गुरुशुश्रूषा तीर्थानुशरणं दया॥
आर्ज्जवं लोभशून्यत्वं देवब्राह्मणपूजनम्।
अनभ्यसूया च तथा धर्मः सामान्य उच्यते॥

इति विष्णुपुराणवचनात्। सर्वोपचारानुक्त्वा भविष्यपुराणम्—

अयं विनैव मन्त्रेण पुण्यराशिः प्रकीर्त्तितः।
स्यादयं मन्त्रयुक्तश्चेत् पुण्यं शतगुणोत्तरम्॥

तस्माददीक्षितेपि शुचिः शुचिनोचासनोपविष्टः शुचिवस्त्राद्वयधरो मौनी

धर्मपरायणः, कामरागभयक्रोधमात्सर्यद्वन्द्वरहितस्तन्मनाः, शुचौ सूपलिप्तेऽनिष्टगन्धशब्दरहिते देशे दक्षिणपार्श्वे पुष्पं वामपार्श्वे जलम्, अन्यच्च पूजोपकरणं यथासन्निवेश मासाद्य जलपूर्णमर्घपात्रमग्रतो धृत्वा यथालाभवस्त्रालङ्कारयज्ञोपवीतादीनि धृत्वाऽर्घपात्रस्थजलेन स्थानं द्रव्याणि च प्रोक्ष्य गन्धादिनात्मानमभ्यर्च्य सम्बोधनान्तेन देवतानाम्ना आगच्छेति देवतामावाह्य स्थापयित्वासनपाद्यार्घाचमनीयानि दत्त्वा स्नपयित्वा पूजयित्वा च यथालाभं वस्त्रयज्ञोपवीतालङ्कार-गन्ध-पुष्प-धूप-दीप-ताम्बूल-नैवेद्यादि दत्त्वा प्रदक्षिणीकृत्य प्रणम्य स्तुत्वा भगवन् भगवती वा क्षमस्वेति विसर्जयेत्। आगमिकास्तु नादेवो देवमर्चयेदित्यनुसारात्सर्वदेवताऽर्चनेषु भूतशुद्धिमाहुः।

सा चैवं, सोऽहमिति मन्त्रेण जीवात्मानं नाभितो हृदिस्थे परमात्मनि संयोज्य ततः पृथिवीं जले, ततो जलं तेजसि, ततस्तेजो वायौ ततो वायुमाकाशे प्रवेश्य यमिति वायुबीजेन षोड़शवारजप्तेन देह सशोध्य रमिति वह्निबीजेन द्वात्रिंशज्जप्तेन देहं दाहयित्वा वमिति चन्द्रबीजेन चतुःषष्टिजप्तेन चन्द्रमण्डलामृतं स्रावयित्वा तेन—तद्भस्माप्याप्लाव्य पुनर्नवीभूतदेहं चिन्तयित्वा भूतानि व्योमादिभ्यो बहिः कृत्वा हंस इति मन्त्रेण परमात्मतो जीवं नाभिपद्मे न्यसेदिति।

पूजाधारमाह शतातपः—

"भूमावप्सु तथाग्नौ च दिवि सूर्ये च देवताः।"

प्रतिमायान्तु देवतापूजा शस्ता धानाद्यविदुषामियमेव ऊर्द्ध्व दृष्टिस्तिर्यग्दृष्टिर्व्यङ्ग्यमानोन्मानहीना च प्रतिमा निषिद्धा। अप्रतिष्ठिता तु क्वापि न निषिद्धा।

मत्स्यपुराणे—

"सौवर्णी राजती वापि ताम्री रत्नमयी तथा।

शैलदारुमयी वापि लोहसंघमयी तथा ।
धीतिकाधातुयुक्ता च ताम्रकांस्यमयी तथा ।
शुभदारुमयीवापि देवतार्चा प्रशस्यते ।
अङ्गुष्ठपर्वादारभ्य वितस्ति यावदेव तु ।
गृहेषु प्रतिमा धार्या नाधिका शस्यते बुधैः ।"

अर्चा—प्रतिमा । सर्वमङ्गला प्रतिमाधिकारे देवीपुराणम्—

"सप्ताङ्गुलां समारभ्य यावच्च द्वादशाङ्गुलाम् ।
गृहेष्वर्चा समाख्याता प्रासादे चाधिका शुभा ॥
ऊर्द्ध्वस्थिता गृहे कार्या सदा देवी चतुर्भुजा ।
अन्यथा तु न कर्त्तव्या कृता भयकरी मता ॥
यथा चाष्टभुजा कार्या प्रासादे वा गृहे तथा ।
ऊर्द्ध्वस्थिता गृहे काम्या रौद्री चापि नरेश्वर ॥"

ऊर्द्ध्वस्थाष्टभुजैव गृहे निषिद्धा । चतुर्भुजायाः—पूर्वं विहितत्वात् । तथा न गृहे सजटा शुभा ।

तथा—"शैलजा न गृहे पूज्या अभावात्काष्ठजा शुभा ।"

वराहपुराणे—

"विष्णुरुद्रान्तरं ब्रूयाद्यः श्रीगौर्यन्तरन्तथा ।
तन्नास्तिकानां मूर्खाणां काव्यं शास्त्रविगर्हितम् ॥"

पूजादिकालेऽभेदश्चिन्त्य इति तात्पर्यम् ।

अर्घे देवी पुराणम्—

"षट्त्रिंशदङ्गुलं पात्रमुत्तमं परिकीर्त्तितम् ।
मध्यमन्तु त्रिभागोनं कनिष्ठं द्वादशाङ्गुलम् ॥

वस्वङ्गुलविहीनन्तु न पात्रं कारयेत् क्वचित् ।
नानारूपविचित्राणि पुण्डरीकाकृतीनि च ॥
शंखनीलोत्पलाभानि पात्राणि परिकल्पयेत् ।
रत्नादिरचितान्येव काञ्चीघनयुतानि च ॥
यथोक्ताभं यथालाभं तथा पात्राणि कारयेत् ॥"

तथा— दिवामूर्त्तिषु सर्वासु रात्रावग्निषु पूजयेत् ।
प्राक्पश्चिमोदगाम्यश्च प्रातः सायं निशासु च ।

यथासंख्यमन्वयः । भविष्यपुराणे—

"शुचिः सुवस्त्रधृक् प्राज्ञो मौनीध्यानपरायणः ।
गतकामभयद्वन्द्वो रागमात्सर्यवर्ज्जितः ॥
आत्मानं पूजयित्वा च सुगन्धसितवाससा ।
मुहूर्त्ते च यजेद्देवान् स्वकीयासनसंस्थितान् ॥"

आत्मानमिति चन्दनादि सितवस्त्रञ्च परिधायेत्यर्थः । स्वमुहूर्त्ते— विहितकाले । स्वकीयासनं यस्य देवस्य यद्वाहनम् ।

तथा—

"यश्च पूजयते देवान् ब्राह्मणो द्रव्यलोभतः ।
भृत्या भरतशार्दूल ! स याति नरकं ध्रुवम् ॥"

भृत्या—वेतनेन । अग्निपुराणे—

"विष्णुं प्रजापतिञ्चापि शिवं वा भास्करं तथा ।
तल्लिङ्गैः पूजयेन्मन्त्रैः सर्वदेवान् समाहितः ॥
नमस्कारेण पुष्पाणि विन्यसेत् पृथक् पृथक् ॥"

वराहपुराणे—"अभावे वेदमन्त्राणां पञ्चरात्रोदितो विधिः ॥"

पञ्चरात्रं—वशिष्ठाद्युक्तागमसंहिता ।

यमः—

"देवतापुष्पदानेन जायते श्रीसमन्वितः ।
ऊर्द्ध्वाङ्गतिमवाप्नोति यश्च धूपप्रदोनरः ॥
लोके प्रकाशो भवति चक्षुषा चैव दीपदः ॥"

विष्णुधर्मे—"फलानि दत्त्वा देवेभ्यः सफलां विन्दते श्रियम् ।
गीतवाद्यप्रदानेन सौख्यं प्राप्नोति उत्तमम् ॥
प्रोक्षणीयप्रदानेन रूपवानभिजायते ॥"

प्रोक्षणीयं—नृत्यगीतादि, देवसमीपे करणमात्रम् ।

तथा— "वस्त्रदानेन लोकेस्मिन् सुवेशस्त्वभिजायते ॥"

देवीपुराणे—

"रक्तबिल्वाक्षतैः पुष्पै र्दधिदूर्वाकुशैस्तिलैः ।
सामान्यः सर्वदेवानामर्घोयं परिकीर्त्तितः ॥
अभावे दधिदूर्वादे र्मानसं वा प्रकल्पयेत् ॥"

रक्तं—कुङ्कुमम्, अक्षताः—तण्डुलाः । सर्वदेवानां—सूर्यविष्णुशिवदुर्गाणाम्, इदन्तु सति सम्भवे ।

असति तु जलनियत एव, आगमे तु, गन्ध-पुष्पाक्षत-यव-कुशाग्र-तिल-सर्षप-दूर्वा अर्घद्रव्याणि, दूर्वाब्जि-विष्णुक्रान्ताः पाद्यद्रव्याणि, जाती-लवङ्ग-कक्कोलानि आचमनीयद्रव्याणि, शुद्धाभि रद्भिः पुनराचमनीयमित्युक्तम् ।

॥ अथ पञ्चोपचाराः ॥

तत्र "चन्दनागुरुकर्पूर कुङ्कुमान्यनुलेपने" ॥

पुष्पाणि तु – अवश्य गिरिस्वारामसम्भवानि विकसितानि केशकीटरहितानि अपर्युषितानि अच्छिद्राणि शुचीनि सुरभीणि प्रोक्षितानि विहितानि पत्राणि च प्रवदन्ति ।

"याचितं निःफलं पुष्पं क्रयक्रीतञ्चनिःफलम् ॥"

अभिवादनकालेऽभिवाद्याभिवादकान्यतरकरस्थं पुष्पं दुष्टमिति, अग्रभागत्यागात्, प्रोक्षणाच्चेदं कण्ठम्भवतीत्यन्ये । देवोपरि धृतं मस्तकोपरिधृतमन्तर्जलक्षालितम्, अधोवस्त्र धृतञ्च पुष्पं हरिभक्ति संज्ञके संग्रहे निषिद्धतया गणितम् ।

नित्यपूजायाञ्च चौर्यमप्यदोषः, देवतार्थञ्च कुसुमस्तेयं मनुरब्रवीत इत्यभिधानात् । तुलसीपत्र-विल्वपत्र-जलजानां पर्युषित दोषोनास्तीति प्रवादः । नारदीये—

"शुष्कैः पर्युषिते र्वापि विल्वपत्रै स्तु योनरः ।
पूजयेत्तु महादेवं मुच्यते सर्वपातकैः ॥"

अन्ये तु—"सर्वम्पर्युषितं वर्ज्यं पत्रं पुष्पं फलं जलम् ।
प्रशस्तं जाह्नवीतोयं प्रशस्तं तुलसीदलम् ॥"

इति सोढ़देवलिखित वाक्यं तुलसी प्राशस्त्ये मानमाहुः । पर्युषितेष्वपि मालाकारगृहस्थितेषु न दोष इति शैवागमः ।

हारीतः—

"स्नानं कृत्वा तु ये केचित् पुष्पं चित्वन्ति वै द्विजाः ।
देवतास्तत्र गृह्णन्ति भस्मीभवति काष्ठवत् ॥"

मध्याह्नस्नानविषय मेवैतत्, प्रातः स्नानानन्तरं द्वितीये दिनभागे पुष्पावचयस्य दक्षेण विहितत्वात्। कालिकानिषेधस्तु-यद्यपि सूर्य दुर्गा शिवानामेव श्रुते स्तथाप्याचारात्सर्व देवविषय ।

धूपे - गुग्गुलुः सघृतः केवलो वा कृष्णागुरुर्वा। दीपे—घृतं तिलतैलं वा। नैवेद्ये —भक्ष्यं भोज्यञ्च प्रशस्तम्। तथा—

"सपर्या विविधा प्रोक्ता तासामेकां समाश्रयेत् ॥"

तत्रैका—पञ्चोपचारा।

"गन्धादिका नैवेद्यान्ता पूजापञ्चोपचारिका ॥"

दशोपचाराच—

"अर्घपाद्याचमनीय मधुपर्काच मनानि च।
गन्धादि पञ्चकञ्चेति उपचारा दशोदिताः ॥"

षोड़शोपचारा च—

"आसनं स्वागतं नार्घपाद्ये चाचमनीयकम्।
मधुपर्काचमन स्नान वसना भरणानि च।
गन्धपुष्पे धूपदीपौ नैवेद्यं चन्दनन्तथा ॥"

अष्टादशोपचारा च—

"आसनावाहने चार्घम्पाद्यमाचमनन्तथा।
स्नानं वस्त्रोपवीतञ्च भूषणानि च सर्वतः ॥
गन्धं पुष्पं तथा धूपं दीपमन्नेन तर्पणम्।
माल्यानुलेपनञ्चैव नमस्कार विसर्ज्जने ॥"

षट्त्रिंशोपचारा च—

तत्र— "आसनाभ्यञ्जने तद्वदुद्वार्त्तन-निरुक्षणे ।
संमार्ज्जनं सर्पिरादि-स्नपनावाहने ततः ॥
पाद्यार्घाचमनीयञ्च स्नानीय-मधुपर्ककौ ।
पुनराचमनीयञ्च वस्त्रयज्ञोपवीतके ॥
अलङ्कारो गन्धपुष्पे धूपदीपौ तथैव च ।
ताम्बूलानि च नैवेद्यं पुष्पमाला तथैव च ॥
अनुलेपनञ्च शय्या च चामरं व्यजनं तथा ।
आदर्शदर्शनञ्चैव नमस्कारोथ नर्त्तनम् ॥
गीतवाद्येच दानानि स्तुतिहोम प्रदक्षिणम् ॥
दन्तकाष्ठ प्रदानञ्च ततो देव विसर्ज्जनम् ।
उपचारा इमेज्ञेयाः षट्त्रिंशत् सुरपूजने ॥"

काम्यपूजायामेते कल्पा यथाविभवं तत्रापि प्रथमो नियतः । नित्यायां तु सोपि नियतः । देवपूजा तु दक्षिण हस्तेनैव—

कर्मोपदिश्यते यत्र कर्त्तुरङ्गन्न चोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्मणाम्पारगः करः ॥"

इति छन्दोगपरिशिष्टात् । तत्रापि —देवतीर्थेन मार्जनार्चन-बलिकर्म-भोजनानि दैवेनेति हारीतवचनात् ।

एवञ्च—दक्षिणकर देवतीर्थेन देवार्चने स्मृतिसिद्धेऽञ्जलि पूजने यदि शिष्टाचारोपि, तथापि स न प्रमाणं श्रुतिस्मृति विहितो धर्म स्तदलाभे शिष्टाचारो वशिष्ठवचनात् । स्मृतिः—

"देवमुल्लुञ्चयेद्यस्तु तत्पुष्पस्य तु लोभतः ।
ब्रह्महत्यामवाप्यैव भोजको लोभ मोहितः ।
महारौरव मासाद्य पच्यते शाश्वतीः समाः ॥"

उल्लुञ्चयेत्—देवोपरि दत्तानि पुष्पाणि गृह्णीयादित्यर्थः ।

॥ अथ सूर्यपूजा ॥

भविष्ये –

"अग्निहोत्रादि वेदाश्च यज्ञाश्च बहुदक्षिणाः ।
सूर्यस्यार्चनस्यैते कोट्यंशेनापि नो समाः ॥
मेरुमन्दर तुल्योपि राशिः पापस्य कर्मणः ।
आसाद्य भास्करंमर्त्यस्तं नाशयति तत्क्षणात् ॥
मासार्द्धमपि योर्कं वै नैरन्तर्य्येण पूजयेत् ।
पुरुषोत्तमः स विज्ञेयो नैरन्तर्यं हि दुष्करम् ॥"

तथा—

"प्रदद्या द्वै गवां लक्षं दोग्ध्रीणां वेदपारगे ।
एकाहमर्चयेद्भानुं तस्य पुण्यं ततोधिकम् ॥
आपः क्षीरं कुशाग्राणि घृतं दधि तथा मधु ।
रक्तानि करवीराणि, तथा रक्तश्च चन्दनम् ।
अष्टाङ्ग एव अर्घो वै ब्राह्मणा परिकीर्त्तितः ॥

अत्र—पञ्चोपचाराः विहितगन्धाः । भविष्यपुराणे—

"चन्दनागुरु कर्पूर कुङ्कुमोशीर पद्मकैः ।
अनुलिप्तो नवैर्भक्त्या ददाति मनसेप्सितम् ॥"

पद्मकं—पद्मकाष्ठम् । अनुलिप्तो नवैर्भक्त्या ददाति मनसेप्सितम्
पद्मकं – पद्मकाष्ठम् । अनुलिप्तः सूर्यः प्रकरणात् ।

"कालेयकन्तुरुष्कश्च रक्तचन्दन मेव च ।
यान्यात्मनः सदेष्टानि तानि शस्तान्युपाकुरु ॥"

कालेयकं—कृष्णागुरु। कलियाकाष्ठमिति प्रदीपादयः। तुरुष्कं—सिल्हकम्।

॥ अथ पुष्पाणि ॥

"पुष्पैरारण्यचूतैश्च पत्रैर्वा गिरिसम्भवैः।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्ज्जन्तुवर्ज्जितैः॥
आत्मारामोद्भवैर्वापि भक्त्या सम्पूजयेद्रविम्।
पुष्पजातिविशेषेण लभेत्पुण्यन्ततोधिकम्॥"

ततः पुष्पपत्रसामान्यपूजनात्।

"दत्त्वा दश सुवर्णस्य निष्काणां लभते फलम्।
करवीरे नृपैकस्मिन्नर्कार्क विनिवेदयेत्।
लभते तत्फलंवीर यथाह भगवान्रविः॥
भक्त्या संपूजयेद् योर्कमर्कपुष्पैः समाहितः।
तेजसा सोर्कसङ्काशो ह्यर्कलोके महीयते॥
जवापुष्पसहस्रेभ्यः कुशपुष्पं विशिष्यते।
कुशपुष्पसहस्रेभ्यः पद्ममेकं विशिष्यते॥
वीरपद्मसहस्रेभ्यो बकपुष्पं विशिष्यते।
बकपुष्पसहस्रेभ्यः कुशपुष्पं विशिष्यते॥
कुशपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते।
सर्वाणां पुष्पजातीनां प्रवरं नीलमुत्तमम्॥
नीलोत्पलसहस्रेण नीलोत्पलशतेन च।
रक्तैश्च करवीरैश्च यस्तु पूजयते रविम्॥
कल्पकोटि सहस्राणि कल्पकोटि शतानि च।
वसेदर्क्कपुरे श्रीमान् सूर्यतुल्यपराक्रमः॥

शमीपुष्पं बृहत्याश्च कुसुमं तुल्यमेव च ।
करवीरसमा ज्ञेया जातीबकुलपाटलाः ॥
श्वेतमन्दारकुसुमं सितपद्मञ्च तत्समम् ।
नागचम्पकपुन्नाग-मुकुराश्च समाहिताः ॥
प्रहरं तिष्ठते जाती करवीरमहर्निशम् ।
केशकीटावपन्नानि जीर्णपर्युषितानि च ॥
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ।
मुकुलैर्नार्चयेद्भानुमपक्वं न निवेदयेत् ॥
फलानामप्यलाभे तु पत्राण्यपि निवेदयेत् ।
फलञ्च कृमिविद्धं यत् प्रयत्नात्तु विवर्जयेत् ॥
फलानामप्यलाभे तु तृणगुल्मौषधीरपि ।
औषधीनामलाभे तु भक्त्या भवति पूजितः ॥
प्रत्येकमुक्तपुष्पेषु दशसौवर्णिकं फलम् ।
स्रजोऽपि मुनि शार्दूल ! तदेव द्विगुणम्भवेत् ॥
मुकुराणि कदम्बानि रात्रौ देयानि भानवे ।
दिवाशेषाणि पुष्पाणि दिवारात्रौ च मल्लिका ॥
गन्धवन्त्यपवित्राणि कुसुमानि विवर्जयेत् ।
गन्धहीनमपिग्राह्यं पवित्रं यत्कुशादिकम् ॥
मल्लिका मालती चैव दूर्वा काशोतिमुक्तकः ।
पाटला करवीरश्च जया पावन्तिरेव च ।
कुब्जकं तगरश्चैव कर्णिकारः कुरुन्टकः ॥
चम्पको वातिकः कुन्दो वाणो बर्बरमल्लिका ।
अशोकस्तिलकोलोध्रस्तथा चैवाटरूषकः ॥

शतपत्राणि चान्यानि बकाकुश्च विशेषतः ।
अगस्त्यं किंशुकं तद्वत् पूजायाम्भास्करस्य तु ॥
बिल्वपत्रं शमीपत्रं पत्रं भृङ्गरजस्य तु ।
तमालपत्रञ्च हरेस्सदैव तपनप्रियम् ॥
तुलसी कालतुलसी तथा रक्तञ्च चन्दनम् ।
केतकी पत्रपुष्पञ्च सद्यस्तुष्टिकरं रवेः ॥

कृष्णलौन्मत्तकं काञ्ची तथा च गिरिकर्णिका ।
न कण्टकारिकापुष्पं तथान्यद्गन्धवर्जितम् ॥
न चाषातकजैः पुष्पैरर्चनीयो दिवाकरः ।
येषां न प्रतिषेधोस्ति गन्धवर्णान्वितानि च ।
तानि पुष्पाणि देयानि भानवे लोकभानवे ॥"

अरण्येत्यादि । एवञ्च—अरण्यारामभवयो विधानन्तदग्यारामभवानि पुष्पाणि निषिद्धानि । तदुक्तं नारदीये राक्षसी—शपथे—

"पारक्यारामजातैस्तु कुसुमैरर्चयेत्सुरान् ।
तेन पापेन लिप्येहं यद्येतदनृतं भवेत् ॥"

पद्मं—श्वेतेतरत् । श्वेतपद्मस्याग्रे करबीरसमत्वकथनात् । रक्तं-रिति रक्तमत्र कुङ्कुमपुष्पम् । बृहती—कण्टकारिका, निषेधश्च-बृहत्कण्ट-कारिकापुष्पविषयः । विधिनिषेधौ बृहतीपुष्पविषयावेवेत्यतस्तद्विहित-निषिद्ध-मिति केचित् । नागो नागकेशरः, पुन्नागः पुनानव इति प्रसिद्धः । मुकुरो-विचिक्रिलः । प्रहरमिति—अवचयोत्तरं जातीपुष्पं प्रहरपर्यन्तं पूजार्हमेवमग्रे-पीत्यर्थः । मुकुलं कलिकास्रजोभिरिति आर्षप्रयोगः, मुकुराणीति—मुकुर-कदम्बयो रात्रौ, मल्लिकायास्तूभयत्र दानं प्रशस्तमित्यर्थः । देयानि खण्डनं योनीति तु नार्थः—पूजाप्रकरणास्नानविरोधात् । अतिमुक्तकः माधवी, जया-जयन्ती, पावन्तिः—पुष्पविशेषः । तगरः—पिण्डीतगरः ।

"शिवे विसर्ज्जयेत् कुन्दमुन्मत्तञ्च हरेस्तथा।
देवीनामर्कमन्दारौ सूर्यस्य तगरन्तथा ॥"

इति शातातपीयो निषेधो वनतगरविषयः। सामान्यत एव तगरं विहितनिषिद्धमिति केचित्। कुरुण्टकः— पीताम्रालः। बर्बरमल्लिका— बर्बरीति प्रसिद्धा। आटरूषको वासकः, कृष्णला, गुञ्जा, उन्मत्तकं धूत्तूरक, काञ्ची वराहक्रान्ता, गिरिकर्णिका अपराजिता, आम्रातकम् अम्बाड़ इति-प्रसिद्धम्।

अत्र चादौ विहितम्. तदलाभे विहित निषिद्धं तदलाभेऽविहिताऽनिषिद्धमुपादेयं, निषिद्धन्तु सर्वथा नोपादेयमिति शास्त्रार्थः। तथा—

"त्रुटिमात्रन्तु योदद्याद्वाग्नेयकुसपङ्कजम्।
भास्करस्योत्तमाङ्गेतु तस्य पुण्यफलं शृणु।
इन्द्रस्यार्द्धासने तिष्ठेद्यावदिन्द्राश्चतुर्दश ॥"

त्रुटिः—त्रसरेणुः। आग्नेयं—सुवर्णम्।

॥ अथ धूपाः ॥

तत्र— सघृत-गुग्गुलुः। कुन्दुरु, कृष्णागुरु, सघृतमहिषाख्यगुग्गुलु, श्रीवास, सघृतबिल्व, देवदारु, सौगन्धिक, तुरुष्कागुरु, नमेरु, कस्तूरी, कर्पूर-युक्तागुरूणि। कुन्दुरुः शल्लकीरसः, श्रीवासः सरलद्रव, सौगन्धिकः सल्हिकः, नमेरुः छायाप्रधानो वृक्षविशेषः।

दीपाः

सघृताः, तदभावे सतैलाः। दीपाधिकारे भविष्यपुराणम्—

"तांश्चदत्त्वा न हिंसेत्तु न च तैल विवर्जितान् ॥
कुर्वीत दीपहस्ता च मूषकोन्धश्च जायते।"

॥ अथ नैवेद्यानि ॥

तत्र—संयाव-कृशरापूप-पायस-गुड़संयुक्त-मोदक-रसाला-शालि-तण्डुल-प्रस्थ-षष्ठिकौदन-यव-गोधूम-तिल-मुद्ग-माष-मांस-पक्वफल-पानकादीनि। सिद्धान्नन्तु-वैश्वदेवानन्तरपूजापक्षे देयम्। "पाकादग्रमुद्धृत्य जुहुयादि"ति वाक्येन पाकाग्रस्य वैश्वदेवहोमे विनियोगविधानात्।

रसाला तु दधिखण्डादि संयोगया। तदुक्तं सूपकार तन्त्रे—

"अर्द्धाढकं शुचिरपयुषितस्य दध्नः खण्डस्य षोड़शपलानि शशिप्रभस्य।
सर्पिःपलं मधुपलं मरिचद्विकर्षं शुण्ठ्याः पलार्द्धमपि चार्द्धपलं चतुर्णाम्॥
श्लक्ष्णे पटे ललनया मृदुपाणिघृष्टा, कर्पूरधूलिसुरभीकृतभाण्डसंस्था।
एषा वृकोदरकृता सरसा रसाला यास्वादिता भगवता मधुसूदनेन॥"

सूर्याधिकारे भविष्यपुराणे—

"प्रणम्य दण्डवद् भूमौ नमस्कारेण योर्चयेत्।
स याङ्गतिमवाप्नोति न तां क्रतुशतैरपि॥"

भविष्ये—

"यथा न लङ्घयेत्कश्चित् स्नपनं भास्करस्य तु।
तथा कार्यं प्रयत्नेन लङ्घितं ह्यशुभावहम्॥
तामिस्रं नरकं कर्त्ता, लङ्घयेद्यः स रौरवम्॥"

कर्त्ता प्रक्षेपस्य स्नपनस्य वा।

॥ अथ दुर्गापूजा ॥

अग्निहोत्राणि कर्माणि वेदयज्ञाः सदक्षिणाः।
चण्डिकार्चार्च्चनस्यैते लक्षांशेनापि नो समाः॥

यः सदा पूजयेद् दुर्गां प्रणमेद्वापि भारत ।
स योगी स मुनिर्द्धीमांस्तस्य मुक्तिः करे स्थिता ॥

तथा— अग्निहोत्रपरे विप्रे वेदवेदाङ्गपारगे ।
सुवर्णानां सुवर्णस्य शते दत्ते तु यत्फलम् ।
तत्फलं लभते राजन् ! पूजयित्वा तु चण्डिकाम् ॥

सुवर्णस्य—हेम्नः, सुवर्णानां तोलकानाम्। शूलेपि पूजा प्रशस्ता ।

तथा— आपः क्षीरं कुशाग्राणि अक्षता दधि तण्डुलाः ।
सहा सिद्धार्थका दूर्वा कुङ्कुमो रोचना मधु ।
अर्घोयं कुरुशार्दूल ! द्वादशाङ्ग उदाहृताः ॥

अक्षता—यवाः । सहा—सहदेवा ओषधी भटकोर इति प्रसिद्धा ।
तत्पूजायां गन्धाः चन्दनागुरुकर्पूरकुङ्कुमानि ।

अथ पुष्पाणि । देवीपुराणे—

ब्रह्मोवाच—शृणु शुक्र प्रवक्ष्यामि पुष्पाध्यायं समासतः ।
ऋतुकालोद्भवैः पुष्पैर्मल्लिकाजातिकुब्जकैः ॥
सितरक्तैश्च कुसुमैस्तथा पद्मैश्च पाण्डुरैः ।
किंशुकैस्तगरैश्चैव किंकिरातैः सचम्पकैः ॥
बकुलैश्चैव मन्दारैः कुन्दपुष्पैस्तिरीटकैः ।
करवीरार्कपुष्पैश्च शांशपैश्चापराजितैः ॥
सितै रक्तैस्तथा पीतैः कृष्णैश्चैव चतुर्विधैः ।
धत्तूरकातिमुक्तैश्च बन्धूकागस्तिसम्भवैः ॥
मदनैः सिन्दुवारैश्च सुरभीमरुकैस्तथा ।
लताभि र्ब्रह्मवृक्षस्य दूर्वाङ्कुरैश्च कोमलैः ॥

मञ्जरीभिः कुशानाञ्च विल्वपत्रैः सुशोभितैः ।
उक्तानुक्तैस्तथा सर्वैर्ज्जलजैः स्थलसम्भवैः ॥
पत्रैः पुष्पैर्यथालाभं सर्वौषधिमयैः शुभैः ।
धान्यानां सर्वपत्रैश्च पुष्पैश्चैव प्रपूजयेत् ॥
शुभं वाप्यशुभं वापि फलपुष्पनिवेदनम् ।
भक्त्या निवेदयेत्सर्वं नाशुभं किञ्चिदाप्नुयात् ॥

ऋतुकालोद्भवैरिति विशेषणमनावर्त्तिव-दोहदादि-जनित-पुष्पनिषेधार्थम् । सितरक्तनीलपाण्डुराणि पद्मविशेषणानि । मन्दारैरिति मन्दारार्कयो दुर्गापूजायां विधानाद्देवीनामर्कमन्दाराविति देवीपदं दुर्गेतरपरं, सामान्य-विशेषन्यायात् । दुर्गायां तौ विहितनिषिद्धाविति केचित् । तिरीटो—लोध्रः । सितरक्तपीतकृष्णानि अपराजितविशेषणानि । सुरभी—शल्लकी, तिरमीति प्रसिद्धा इत्यन्ये । लताभिर्माधवी प्रभृतिभिः । ब्रह्मवृक्षः—पलाशः । अनुरक्तैरनिषिद्धैः । धान्यानामिति सर्वधान्यानां पत्रैः पुष्पैश्च देवीं पूजयेदित्यर्थः ।

तथा— "पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः ।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः ॥
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेच्छिवाम् ।
पुष्पजाति विशेषेण भवेत्पुण्यं विशेषतः ॥
तपःशीलगुणोपेते पात्रे वेदस्य पारगे ।
दश दत्त्वा सुवर्णानि यत्फलं कुसुमेषु तत् ॥
मातृणाञ्च सकृद्दत्त्वा लभते नृपसत्तम ॥
तस्मात्पुष्पाणि वक्ष्यामि पत्राणि सुरभीणि च ।
केतकी चातिमुक्तश्च बन्धूकबकुलान्यपि ॥
कर्णिकारः कदम्बश्च सिन्दुवारः समृद्धये ।
पुन्नागश्चम्पकश्चैव यूथिका बकमल्लिका ॥

दमनो मरुपत्रश्च शतधा पुण्यवृद्धये ।
कदम्बैरर्चयेद्रात्रौ मल्लिकोभयतः शुभा ॥
दिवा शेषाणि पुष्पाणि यथालाभेन पूजयेत् ।
केशकीटापविद्धानि शीर्णपर्युषितानि च ॥
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ।
मुकुलैर्नार्च्चयेद्देवीमपक्वं न निवेदयेत् ॥
फलं कथितविद्धञ्च कालापक्वमपि त्यजेत् ॥

बकमल्लिकेति—बकसहिता मल्लिकेति विग्रहः । तेन—बकश्च मल्लिका चेत्यर्थः । सुरसा—तुलसी विशेषः । मरुपत्रो मरुबकः । कालापक्वमसमयपक्वम् । एतानि केतक्यादीनि मरुबकान्तानि पुष्पान्तरदानजन्यपुण्यशतगुणपुष्पजनकानि इति वाक्यार्थः ।

भविष्यपुराणे—

मल्लिकामुत्पलं पद्मं शमीपुन्नागचम्पकम् ।
अशोकं कर्णिकारञ्च द्रोणपुष्पं विशेषतः ॥
करवीरं शमीपुष्पं कुङ्कुमं नागकेशरम् ।
यः प्रयच्छति पुण्यार्थं पुष्पाण्येतानि भारत ॥
चण्डिकायै नरश्रेष्ठ ! भक्तिश्रद्धासमन्वितः ।
स कामानखिलान् प्राप्य चण्डिकानुचरो भवेत् ॥

धूपनैवेद्यानि प्रागुक्तानि । भविष्ये—

सर्वयज्ञोपवासेषु सर्वतीर्थेषु यत्फलम् ।
तत्फलं लभते वीर ! प्रणम्य शिरसा सतीम् ॥
सम्प्रसारितदेहो यो दण्डवत्प्रणतो भुवि ।
चण्डिकापुरतो वीर ! स याति परमाङ्गतिम् ॥

॥ अथ शिवपूजा ॥

भविष्ये—

लिङ्गे देवो महादेवः सर्वदेवव्यवस्थितः ।
अनुग्रहाय लोकानां तस्मान्नित्यं प्रपूजयेत् ॥
यो न पूजयते भक्त्या लिङ्गं त्रिभुवनेश्वरम् ।
न स स्वर्गस्य राज्यस्य न च मोक्षस्य भाजनम् ॥
यस्तु पूजयते नित्यं लिङ्गं त्रिभुवनेश्वरम् ।
स स्वर्गराज्यमोक्षाणां क्षिप्रमश्नाति भाजनम् ॥
तस्मात्सौम्यमना भूत्वा त्यक्तजीवप्रतिज्ञया ।
समभ्यर्चयेत्सदा देवमापन्नोपि महामुने ॥
वरं प्राणपरित्यागः शिरसोवापि कर्त्तनम् ।
न त्वसंपूज्य भुञ्जीत भगवन्तं त्रिलोचनम् ॥
स्फुटन्निर्वपते यस्तु यावज्जीवं शिवार्च्चनम् ।
मनुष्यचर्मणा नद्धः स रुद्रो नात्र संशयः ॥

शिवपूजनञ्च लिङ्गे प्रशस्तम् तथा—

न तुष्यास्यर्चिते भक्त्या तथा देवि नगात्मजे ।
लिङ्गेर्चिते यथात्यर्थं परितुष्यासि पार्वति ॥
सर्वेन्द्रियप्रसक्तोपि युक्तो वा सर्वपातकैः ।
स प्रयाति शिवं देवि लिङ्गे योर्च्चयतीह मे ॥

लिङ्गपुराणे—

अनेकजन्मसाहस्रं भ्राम्यमाणस्तु योनिषु ।
कः समाप्नोति वै मुक्तिं लिङ्गार्च्चनमृते नरः ॥

स्ववर्णधर्मपरित्यागिनश्च शिवपूजायामनधिकारः ।

तथा च स्कन्दपुराणे—

स्वधर्मं यः परित्यज्य परधर्मरुचिर्भवेत् ।
चकोरनयने चौरः स मूढश्चन्द्रसन्निभे ॥
तेनाहं पूज्यमानोपि गन्धं जिघ्रामि कौणपम् ॥

ब्राह्मणस्य तु स्वधर्मपरित्यागिनोप्यत्राधिकारः । तदुक्तं तत्रैव—

वेदमन्त्रधने विप्रैरहस्तुष्येषितस्तदा ।
न विप्राणाङ्करस्पर्शे उद्विजामि वरानने ॥
शूद्रकर्मरतेनापि स्पृश्यमानो द्विजन्मना ।
हृष्यामि तेन सुतरां पूज्यमानश्च सुन्दरि ॥

शिवार्च्चनं सदोदङ्मुखेन कार्यम्—

रात्रावुदङ्मुखः कुर्याद्देवकार्यं सदैव हि ।
शिवार्च्चनं सदाप्येवं शुचिः कुर्यादुदङ्मुखः ॥

इति गोभिलवचनात् । भविष्यपुराणे—

यः कृत्वा पार्थिवं लिङ्गं पूजयेच्छुभवेदिकम् ।
इहैव धनवान् श्रीमान् अन्तेरुद्रोभि जायते ॥

ब्रह्मपुराणे—

हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक् ।
पशुपतिः शिवश्चैव महादेवेति सर्वयेत् ॥
मृत्तिका ग्रहणेचैव घट्टने च प्रतिष्ठने ।
आवाहने स्नपने पूजने च विसर्जने ॥

राजकीय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक 1953

हरादीनि च नामानि महादेवान्तानि कीर्त्तयेत् ॥

अष्टमूर्त्ति पूजां प्रति भविष्यपुराणे विष्णुवाक्यम् —

साधु साधु द्विजश्रेष्ठ साधु पृष्टोस्मि सुव्रत ।
शृणुष्व गदतः सर्वं शिवमन्त्रगणं परम् ॥

ओं शर्वाय क्षितिमूर्त्तये नमः । ओं भवाय जलमूर्त्तये नमः ।
ओं रुद्रायाग्नि मूर्त्तये नमः । ओं उग्राय वायुमूर्त्तये नमः ।
ओं भीमायाकाशमूर्त्तये नमः । ओं पशुपतये यजमानमूर्त्तये नमः ।
ओं महादेवाय सोममूर्त्तये नमः । ओं ईशानाय सूर्यमूर्त्तये नमः ॥

मूर्त्तयोष्टौ शिवस्येताः पूर्वादिक्रमयोगतः ।
आग्नेय्यन्ताः प्रयोज्यास्तु वेद्यां लिङ्गे शिवं यजेत् ॥

शिवमिति—ओं नमः शिवायेति मन्त्रेण लिङ्गे शिवम्पूजयेत्ततो वामावर्त्तेन मूर्तीः अष्टावपि पूजयेदिति वाक्यार्थः । तथा—

तथामलकमात्रन्तु कृत्वा लिङ्गं हिरण्मयम् ।
अभिपूज्य रत्नघटितं शिवलोके महीयते ।
मृद्मरुपगोमकृत्पिष्टताम्रकांस्यमयन्तथा ।
कृत्वा लिङ्गं सत्कृपूज्य वसेत्कल्पयुतन्दिवि ॥

देवीपुराणे—

वार्त्तं वित्तप्रदं लिङ्गं स्फाटिकं सर्वकामदम् ।
नर्मदागिरिजं श्रेष्ठमन्यद्वापि हि लिङ्गवत् ॥
कृत्वा पूजय विप्रेन्द्र लप्स्यसे वेहितं फलम् ॥

लिङ्गवत्—लिङ्गाकारम् । अत्र—लिङ्गमतिकर्कशमतिक्षुद्रमतिस्थूलं चिपिटिकाकारं, पिण्डिकाहीनं पिण्डिकाविष्टमवर्णं व्यङ्गाग्रपिण्डिकं मानोन्मान-

हीनं मानोन्मानविण्डिकञ्च निषिद्धम्। वाणलिङ्गं कपिलमपि न निषिद्धम्। पक्वजम्बूफलाकारन्तु प्रशस्तम्।

अथात्र पञ्चोपचाराः। भविष्यपुराणे—

चन्दनाच्चागुरौ ज्ञेयं पुण्यमष्टगुणं नृप।
कृष्णागुरो विशेषेण द्विगुणं फलमादिशेत्॥
तस्माच्छतगुणं पुण्यं कुङ्कुमस्य विधीयते।
चन्दनागुरुकर्पूरैः श्लक्ष्णपिष्टैः सकुङ्कुमैः॥
शिवस्यार्च्चां समालभ्य कल्पकोटिं वसेद्दिवि॥

अर्च्चा—प्रतिमा। इयञ्च लिङ्गस्याप्युपलक्षणम्।

अथ—पुष्पाणि। शिवपुराणे—

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः।
अपर्युषित निश्छिद्रैः प्रोक्षितैर्जन्तुवर्जितैः॥
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेच्छिवम्।
तपःशीलगुणोपेते पात्रे वेदस्य पारगे॥
दत्त्वा शतं सुवर्णस्य तत्फलं कुसुमस्य च॥
अर्कपुष्पे तथैकस्मिन् शिवाय विनिवेदिते।
दश दत्त्वा सुवर्णस्य यत्फलं तदवाप्नुयात्॥
अर्कपुष्पसहस्रेभ्यः करवीरं विशिष्यते।
करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते॥
बिल्वपत्रसहस्रेभ्यो द्रोणपत्रं विशिष्यते।
द्रोणपुष्प सहस्रेभ्यो अपामार्गं विशिष्यते॥
अपामार्ग सहस्रेभ्यः कुशपुष्पं विशिष्यते।
कुशपुष्प सहस्रेभ्यः शमीपत्रं विशिष्यते॥

शमीपत्रसहस्रेभ्यः श्रीमन्नीलोत्पलं वरम् ।
पद्मपत्रसहस्रेभ्यो बकपुष्पं विशिष्यते ॥
बकपुष्पसहस्रेभ्य एकं धत्तूरकं वरम् ।
धत्तूरकसहस्रेभ्यः शमीपुष्पं विशिष्यते ॥

शतमिति, गुणादिमत्पात्राय सुवर्णस्य शत दत्त्वा यत्
फलविशेषस्य कुसुमस्य शतं दत्त्वा तदेवफलं लभ्यत इत्यर्थः
पुष्पमिह विवक्षितं तत्सम्बंधपातात् । पद्मेति, पत्रसहस्रं
मत्पद्मं, तेन—कमलमित्यर्थः । तथा—

करवीरसमा ज्ञेया, जातीबकुलपाटलाः ।
श्वेतमन्दारकुसुमं सितपद्मं च तत्समम् ॥
नागचम्पकपुन्नागा धत्तूरकसमाः स्मृताः ॥

तत्समं—करवीरसमम् । नागो—नागकेशरः । त

केतकी चातिमुक्तश्च कुन्दो यूथी मदन्तिका ।
शिरीषसर्ज्जबन्धूककुसुमानि विवर्ज्जयेत् ॥

कुन्दन्तु वर्षव्यापि शिवपूजायां व्रतरूपामामारब्धायां
तम् । अन्यथा तु माघेपि निषिद्धम् ।

तथा— गन्धवन्त्यपवित्राणि कुसुमानि विवर्जयेत् ।
गन्धहीनमपि ग्राह्यं पवित्रं यत्कुशादिकम् ॥
कनकानि कदम्बानि रात्रौ देयानि शङ्करे ।
दिवाशेषाणि पुष्पाणि दिवारात्रौ च मल्लि
प्रहरं तिष्ठते जाती, करवीरमहर्निशम् ॥
केशकीटोपविद्धानि शीर्णपर्युषितानि च ।
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥

हीनं मानोन्मानचिण्डिकञ्च निषिद्धम्। वाणलिङ्गं कपिलमपि न निषिद्धम्। पक्वजम्बूफलाकारन्तु प्रशस्तम्।

अथात्र पञ्चोपचाराः। भविष्यपुराणे—

चन्दनाच्चागुरौ ज्ञेयं पुण्यमष्टगुणं नृप।
कृष्णागुरौ विशेषेण द्विगुणं फलमादिशेत्॥
तस्माच्छतगुणं पुण्यं कुङ्कुमस्य विधीयते।
चन्दनागुरुकर्पूरैः श्लक्ष्णपिष्टैः सकुङ्कुमैः॥
शिवस्यार्च्चां समालभ्य कल्पकोटिं वसेद्दिवि॥

अर्च्चां—प्रतिमा। इयञ्च लिङ्गस्याप्युपलक्षणम्।

अथ—पुष्पाणि। शिवपुराणे—

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः।
अपर्युषित निश्छिद्रैः प्रोक्षितैर्ज्जन्तुवर्ज्जितैः॥
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेच्छिवम्।
तपःशीलगुणोपेते पात्रे वेदस्य पारगे॥
दत्त्वा शतं सुवर्णस्य तत्फलं कुसुमस्य च॥
अर्कपुष्पे तथैकस्मिन् शिवाय विनिवेदिते।
दश दत्त्वा सुवर्णस्य यत्फलं तदवाप्नुयात्॥
अर्कपुष्पसहस्रेभ्यः करवीरं विशिष्यते।
करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते॥
बिल्वपत्रसहस्रेभ्यो द्रोणपत्रं विशिष्यते।
द्रोणपुष्प सहस्रेभ्यो अपामार्गं विशिष्यते॥
अपामार्ग सहस्रेभ्यः कुशपुष्पं विशिष्यते।
कुशपुष्प सहस्रेभ्यः शमीपत्रं विशिष्यते॥

शमीपत्रसहस्रेभ्यः श्रीमन्नीलोत्पलं वरम् ।
पद्मपत्रसहस्रेभ्यो बकपुष्पं विशिष्यते ॥
बकपुष्पसहस्रेभ्य एकं धत्तूरकं वरम् ।
धत्तूरकसहस्रेभ्यः शमीपुष्पं विशिष्यते ॥

शतमिति, गुणादिमत्पात्राय सुवर्णस्य शतं दत्त्वा यत्फलं, शिवायोक्त-फलविशेषस्य कुसुमस्य शतं दत्त्वा तदेवफलं लभ्यत इत्यर्थः । अपामार्गमपि पुष्पमिह विवक्षितं तत्सन्दंशपातात् । पद्मेति, पत्रसहस्रं सहस्रपत्रमेतादृशं यत्पद्मं, तेन—कमलमित्यर्थः । तथा—

करवीरसमा ज्ञेया, जातीबकुलपाटलाः ।
श्वेतमन्दारकुसुमं सितपद्मं च तत्समम् ॥
नागचम्पकपुन्नागा धत्तूरकसमाः स्मृताः ॥

तत्समं—करवीरसमम् । नागो—नागकेशरः । तथा—

केतकी चातिमुक्तश्च कुन्दो यूथी मदन्तिका ।
शिरीषसर्ज्जबन्धूककुसुमानि विवर्ज्जयेत् ॥

कुन्दन्तु वर्षव्यापि शिवपूजायां व्रतरूपामामारब्धायां माघमासे विहितम् । अन्यथा तु माघेपि निषिद्धम् ।

तथा— गन्धवन्त्यपवित्राणि कुसुमानि विवर्जयेत् ।
गन्धहीनमपि ग्राह्यं पवित्रं यत्कुशादिकम् ॥
कनकानि कदम्बानि रात्रौ देयानि शङ्करे ।
दिवाशेषाणि पुष्पाणि दिवारात्रौ च मल्लिका ।
प्रहरं तिष्ठते जाती, करवीरमहर्निशम् ॥
केशकीटोपविद्धानि शीर्णपर्युषितानि च ।
स्वयं पतितपुष्पाणि त्यजेदुपहतानि च ॥

मुकुलैर्नार्च्चयेद्देवमपक्वं न निवेदयेत् ।
फलं क्वथितविद्धञ्च यत्नात्पक्वमपि त्यजेत् ॥
अलाभेन तु पुष्पाणां पत्राण्यपि निवेदयेत् ।
पत्राणामप्यलाभे तु फलान्यपि निवेदयेत् ॥
फलानामप्यलाभे तु तृणगुल्मौषधीरपि ।
ओषधीनामभावे तु भक्त्या भवति पूजितः ॥
प्रत्येकमुक्तपुष्पेषु दशसौवर्णिकं फलम् ।
संग्रथितेषु तेष्वेव द्विगुणं फलमिष्यते ॥
बिल्वपत्रैरखण्डैस्तु यो लिङ्गं पूजयेत्सकृत् ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥
धत्तूरकैश्च यो लिङ्गं सकृत्सम्पूजयेन्नरः ।
स गोलक्षफलं प्राप्य शिवलोके महीयते ॥
बृहती कुसुमैर्भक्त्या यो लिङ्गं सकृदर्च्चयेत् ।
गवामयुतदानस्य फलं प्राप्य शिवं व्रजेत् ॥

अपवित्राणि—कपित्थनील्यादीनि । कनकानीति—कनकं-धुत्तूरकं, कदम्बं कनकञ्च रात्रौ शिवपूजायामतिप्रशस्तम् ।

शेषाणि—दिवाऽतिप्रशस्तानि । मल्लिका तु उभयत्राप्यतिप्रशस्तेत्यर्थः । रात्रौ देयानि त्रोटनीयानीति दानसागरस्तन्न, पूजाप्रकरणास्नानविरोधात्, किञ्च, रात्राववन्नितस्य तदुत्तरमह्नि विनियोगे पर्युषिततया बाधसापेक्षविध्यापत्तेः । केशेति—केशसंयुक्तं कीटसंयुक्तं वेत्यर्थः । शीर्णं समयादन्यथाभूतसंस्थानम् । यत्नात्पक्वमग्न्यादिना पक्वम् । अखण्डैः—निश्छिद्रपत्रत्रयैः । गोलक्षफलम्—गवामयुतदानफलं, शक्रेण सह मोदनम् ।

तथा— अशोक-श्वेतमन्दारकर्णिकारवकानि च ।
करवीरार्कमन्दारशमीतगरकेशरम् ॥

पुष्पैरेतैर्यथालाभं यो नरः पूजयेच्छिवम् ।
स यत्फलमवाप्नोति तदेकाग्रमनाः शृणु ॥
सूर्यकोटिप्रतीकाशै र्विमानैः सर्वकामिकैः ।
दोधूयमानैश्चमरैः शिवलोके महीयते ॥
करवीरो बकश्चैव अर्क उन्मत्तकस्तथा ।
पाटला बृहती चैव तथा च गिरिकर्णिका ॥
तथा काशस्य पुष्पाणि मन्दारश्चापराजिता ।
शमी पुष्पाणि चान्यानि कुब्जकः शिखिनी तथा ।
अपामार्गस्तथा पद्मं जातीपुष्पं सरोकनम् ॥

तथा— चम्पकोशीरतगरं तथा वै नागकेशरम् ।
पुन्नागं किङ्किरातञ्च द्रोणपुष्पं तथा शुभम् ॥
शिंशपोदुम्बरश्चैव जया मल्ली तथैव च ।
पुष्पाणि यज्ञवृक्षस्य तथा बिल्वततीः शुभे ॥
कुसुम्भस्य च पुष्पाणि तथा वै कुङ्कुमस्य च ।
नीलञ्च कुमुदञ्चैव तथा रक्तोत्पलानि च ॥
सुरभीणि च सर्वाणि स्थलजान्यम्बुजानि च ।
गृह्णामि शिरसा देवि यो मे भक्त्या निवेदयेत् ॥

केसरो—बकुलः । उन्मत्तो—धुत्तूरकः । गिरिकर्णिका—कुटजम् । शिखिनी—चुड़िया इति प्रसिद्धम् । रोकनं—मोकन इति प्रसिद्धम् । उशीरं किङ्किरातं कुरुटक पुष्पम् । जया—जयन्ती । यज्ञवृक्षस्य-पलाशस्य । नीलं-नीलोत्पलम् । सर्वाणीति निषिद्धेतरविषयम् ।

मासपूजायां देवीपुराणे –

वैशाखे मासि कर्त्तव्या पूजा पाटलया सदा ।
सर्वान् कामानवाप्नोति ज्येष्ठे पद्मार्चनैः सदा ॥

आषाढ़े विल्वकह्लारै विहितं लभते फलम् ।
नवमालिकया पूजा नभोमासि महाफलम् ॥
कदम्बैश्चम्पकैरेवं नभस्ये सर्वकामदा ।
पूजा पङ्कजमालत्या इषेभ्युदयदायिनी ।
शतपत्रिकया पूजा कार्त्तिके सार्वकामिकी ।
मार्गे नीलोत्पलैः पूजाः पौषे तु कुब्जकैः सदा ॥
माघे तु कुन्दकुसुमै र्मरुवकेन च फाल्गुने ।
शतपत्रैस्तथा चैत्रे यः कुर्यात्सुरसत्तम ।
लभते सर्वयज्ञानां सर्वदानफलन्तथा ॥

सदेति—सर्वत्रान्वीयते । तेन मासं व्याप्य पूजा लभ्यते । नभः श्रावणः । नभस्यो भाद्रः, इष आश्विनः । मार्गे पूजेत्यत्रापि सार्वकालिकीत्यनुषज्यते, अग्रेतनेन या कुर्यादित्यनुवादेनात्रान्वयासम्भवात् । किन्तु पौष इत्यादिष्वेव पूजामध्याहृत्य तत्फलान्वयः ।

अथ धूपाः । शिवपुराणे—

गुग्गुलुं घृतसंयुक्तं शिवे यश्च निवेदयेत् ।
रुद्रलोकमवाप्नोति गाणपत्यञ्च विन्दति ॥

भविष्ये— दधित्थं घृतसंयुक्तं दग्ध्वा विल्वमथापि वा ।
अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥

दधित्थः—कपित्थः । विल्वं—विल्वफलम् ॥

अथ दीपः । भविष्ये—

घृतदीपप्रदानेन शिवाय शतयोजनम् ।
विमानं लभते दिव्यं सूर्यकोटिसमप्रभम्

अथ नैवेद्यम्—

गुड़खण्ड-घृतानाञ्च भक्ष्याणाञ्च निवेदने ।
घृतेन पाचितानाञ्च तेषां शतगुणंफलम् ॥

तथा— मातुलुङ्गफलाद्यानि सुपक्वानि निवेदयेत् ।
शिवाय तत्फलन्तस्य यद्भक्ष्याणान्निवेदने ॥
सर्वदानोपवासेषु सर्वयज्ञेषु यत्फलम् ॥

नमस्कृत्य महादेवमश्वमेधफलं लभेत् ॥
प्रणम्य दण्डवद् भूमौ नमस्कारेण योर्चयेत् ।
स याङ्गतिमवाप्नोति न तां क्रतुशतैरपि ॥

तथा— जानुभ्याञ्चैव पाणिभ्यां शिरसा च विचक्षणः ।
कृत्वा प्रणामं सर्वेशे सर्वान् कामानवाप्नुयात् ॥
तीर्थकोटिसहस्राणि तीर्थकोटिशतानि च ।
महादेवप्रणामस्य कलां नार्हन्ति षोड़शीम् ॥

तथा— कृत्वा प्रदक्षणं भक्त्या शिवस्यायतने नरः ।
अश्वमेधसहस्रस्य इष्टस्य लभते फलम् ॥

॥ विष्णुपूजा ॥

तत्र विष्णुपुराणे—

भौमान्मनोरथान् स्वर्गं स्वर्गिवन्द्यं तथा पदम् ।
प्राप्नोत्याराधिते विष्णौ निर्वाणमपि चोत्तमम् ॥

भौमान्—ऐहिकान् । स्वर्गिवन्द्यपदं—इन्द्रत्वम् ।

नरसिंहपुराणे—

यस्तु पूजयते नित्यं नरसिंहं नरेश्वरम् ।
स स्वर्गं मोक्ष भागी स्यान्नात्र कार्या विचारणा ॥

तस्मादेकमनो भूत्वा यावज्जीवप्रतिज्ञया ।
पूजनान्नरसिंहस्य संप्राप्नोत्यभिवाञ्छितम् ॥

नित्यमिति—सङ्कल्पकालादारभ्य । तथा—

तस्मात्तं मुनिशार्दूल ! भक्त्या संपूजयेत्सदा ।
नरसिंहं महावीर्यं सर्वकामफलप्रदम् ॥
विमुक्तः सर्वपापेभ्यो विष्णुलोके स गच्छति ।
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रान्त्यजातयः ॥
सम्पूज्य तं सुरश्रेष्ठम्भक्त्या सिंहवपुर्द्धरम् ।
मुच्यन्ते चाशुभै र्दुःखै र्जन्मकोटिसमुद्भवैः ॥
संपूज्य तं सुरश्रेष्ठं प्राप्नुवन्त्यभिवाञ्छितम् ॥

ब्रह्मपुराणे महेश्वरवाक्यम्—

ये पूजयन्ति तं देवं शङ्खचक्रगदाधरम् ।
वाङ्मनःकर्मभिः सम्यक् ते यान्ति परमं पदम् ॥

अग्निपुराणे—

येऽर्चयन्ति सदा विष्णुं निष्फलेनान्तरात्मना ।
न ते भूयोभिजायन्ते श्वेतद्वीपनिवासिनः ॥

भवन्तीति शेषः । नरसिंहपुराणे—

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट्सु तेषु मुनेः सम्यगर्च्चनं मुनिभिः स्मृतम् ॥

स्थण्डिलं—परिष्कृता भूः । वराहपुराणे—

कुड्ये लेख्ये च यः कश्चित् पटे कश्चित्तु मानवः ।
पूजयेद्यदि वा चक्रे ममतेजोंशसम्भवम् ॥

पद्मे संपूजनं शस्तं शस्तश्चैवाथ स्थण्डिले ॥

अथ शालग्रामप्रशंसा लिङ्गपुराणे –

"कामासक्तोपि यो नित्यं भक्तिभाव विवर्जितः ।
शालग्रामशिलापुत्रं पूजयेत्सोच्युतो भवेत् ॥
कामासक्तोपि कुप्तोपि शालग्रामशिलार्च्चनम् ।
भक्त्या वा यदि वाऽभक्त्या कृत्वा मुक्तिमवाप्नुयात् ॥
लिङ्गकोटिसहस्रैस्तु पूजितैर्यत्फलं लभेत् ।
तत्फलं कोटि गुणितं शालग्रामशिलार्च्चने ॥
द्वादशेह शिला यो वै शालग्रामसमुद्भवाः ।
अर्च्चयेद्वैष्णवो नित्यं तस्य पुण्यं निबोध मे ॥
कोटिलिङ्गसहस्रैस्तु पूजितैर्जाह्नवीतटे ।
काशीसमे युगान्यष्टौ दिनेनैकेन तद् भवेत् ॥
ततोपि बह्वीरर्च्चयेच्छालग्रामशिलास्तु यः ।
नहि ब्रह्मादयो देवाः संख्याञ्जानन्ति तत्फले ॥
शालग्रामशिलाग्रे तु ये कुर्वन्ति ममार्चनम् ।
तैरहं पूजितः स्कन्द युगानामेकविंशतिम् ॥
शालग्रामशिला यत्र तत्तीर्थं योजनत्रयम् ।
तत्र दानञ्च होमश्च सर्वकोटिगुणं भवेत् ॥
शालग्राम समीपे तु क्रोशमात्रे समन्ततः ।
कीकटेपि मृता याति वैकुण्ठभवनं नरः ॥
शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमम् ।
भूचक्रं तेन दत्तं स्यात्, सशैलवनकाननम् ॥
शालग्रामशिलाग्रे तु यच्छ्राद्धं क्रियते नृभिः ।
तस्य ब्रह्मान्तिकस्थानं तृप्ताश्च तृपितरो दिवि ॥

शालग्रामशिलाग्रे तु यच्छ्राद्धं प्राप्य सर्वदा ।
भवन्ति पितरस्तृप्ताः कालसंख्याग्र नैव हि ॥
शालग्रामनमस्कारः शाठ्येनापि द्विजैः कृतः ।
मद्भक्तो अपि तेनैव मां नमस्यन्तु वा न वा ॥
मद्भक्तिबलदर्पिष्ठा मत्प्रभुं न नमन्ति ये ।
वासुदेवं नमद्भक्त्या किन्तु ते स्वतिपापिनः ॥" इत्यादि ।

नरसिंहपुराणे—

दत्त्वासनं तथार्घञ्च पाद्यमाचमनीयकम् ।
देवदेवस्य विधिना सर्वपापैः प्रमुच्यते ॥
स्नाप्य तोयेन भक्त्या च नरसिंहं नराधिप ।
सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥

नारदीये यमं प्रति ब्रह्मवाक्यम्—

एकोपि कृष्णे विहितः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवा च ॥

॥ अथ पञ्चोपचाराः ॥

कुङ्कुमागुरुश्रीखण्डचन्दनैरच्युताङ्कितम् ।
आलिप्य भक्त्या राजेन्द्र ! कल्पकोटिं वसेद्दिवि ॥

अग्निपुराणे—

चन्दनागुरुकर्पूरकुङ्कुमोशीरपङ्कैः ।
अनुलिप्तो हरिर्भक्त्या वरान् भोगान् प्रयच्छति ॥
कालेयकन्तरुष्कञ्च रक्तचन्दनमेव च ।
नृणाम्भवन्ति दत्तानि पुण्यानि पुरुषोत्तमे ॥

अथ पुष्पाणि। नरसिंहपुराणे—

पुष्पैररण्यसम्भूतैः पत्रैर्वा गिरिसम्भवैः।
अपर्युषितनिश्छिद्रैः प्रोक्षितैर्ज्जन्तुवर्ज्जितैः॥
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेद्धरिम्।
पुष्पजातिविशेषेण भवेत्पुण्यं विशेषतः॥
तपःशीलगुणोपेते पात्रे वेदस्य पारगे।
दश दत्त्वा सुवर्णानि यत्फलं लभते नरः।
तत्सर्वं लभते मर्त्यो हरेः कुसुमदानतः॥
द्रोणपुष्पे तथैकस्मिन् माधवाय निवेदिते।
दश दत्त्वा सुवर्णानि यत्फलं तदवाप्नुयात्॥
एवं पुष्पविशेषेण फलन्तदधिकं नृप।
ज्ञेयं पुष्पान्तरङ्गेन यथा स्यात्तन्निबोध मे॥
द्रोणपुष्पसहस्रेभ्यः खादिरं वै विशिष्यते।
खदिरपुष्पसहस्रेभ्यः शमीपुष्पं विशिष्यते॥
शमीपुष्पसहस्रेभ्यो बिल्वपत्रं विशिष्यते।
बिल्वपत्रसहस्रेभ्यो बकपुष्पं विशिष्यते॥
बकपुष्पसहस्राद्धि नन्द्यावर्त्तं विशिष्यते।
नन्द्यावर्त्तसहस्राद्धि करवीरं विशिष्यते॥
करवीरस्य कुसुमात्श्वेतं तत्पुष्पमुत्तमम्।
करवीरश्वेतकुसुमात्पलाशपुष्पमुत्तमम्॥
पलाशपुष्पसहस्राद्धि कुशपुष्पं विशिष्यते।
कुशपुष्पसहस्राद्धि वनमाला विशिष्यते॥
वनमालासहस्राद्धि चम्पकन्तु विशिष्यते।
चम्पकस्य पुष्पशतादशोकं पुष्पमुत्तमम्॥

अशोकपुष्पसहस्राद्धि सेवन्तीपुष्पमुत्तमम् ।
सेवन्तीपुष्पसहस्राद्धि कुब्जकं पुष्पमुत्तमम् ॥
कुब्जपुष्पसहस्राद्धि मालतीपुष्पमुत्तमम् ।
मालतीपुष्पसहस्राद्धि त्रिसन्ध्यापुष्पमुत्तमम् ॥
त्रिसन्ध्यारक्तसहस्राद्धि त्रिसन्ध्याश्वेतमुत्तमम् ।
त्रिसन्ध्याश्वेतसहस्राद्धि कुन्दपुष्पं विशिष्यते ॥
कुन्दपुष्पसहस्राद्धि शतपत्रं विशिष्यते ।
शतपत्रसहस्राद्धि मल्लिकापुष्पमुत्तमम् ॥
मल्लिकापुष्पसहस्राद्धि जातीपुष्प विशिष्यते ।
सर्वासां पुष्पजातीनां जातीपुष्पमिहोत्तमम् ॥
जातीपुष्पसहस्रेण यच्छेन्मालां सुशोभनाम् ।
विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेद्विष्णुपुरे श्रीमान् विष्णुतुल्यपराक्रमः ॥
शेषाणां पुष्पजातीनां यत्फलं विधिदर्शितम् ।
तत्फलस्यानुसारेण विष्णुलोके महीयते ॥
पुष्पाण्यपि च पत्राणि हरिप्रीतिकराणि च ।
प्रवक्ष्यामि नरश्रेष्ठ शृणुष्व गदतो मम ॥
अपामार्गं पत्रपुष्पं तस्माद्दूर्वमेव च ।
तस्माच्च खादिरं श्रेष्ठं ततश्च शमिपत्रकम् ॥
पूर्वापत्रं ततः श्रेष्ठं ततोऽपि कुशपत्रकम् ।
तस्माद्दमनकं श्रेष्ठं ततो बिल्वस्य पत्रकम् ॥
बिल्वपत्रादपि हरेस्तुलसीपत्रमुत्तमम् ।
एतेषान्तु यथालाभं पत्रैश्चैवार्चयेद्धरिम् ॥

सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥

तथा—

मल्लिका-मालती-जाती-केतकाशोक-चम्पकैः ।
पुन्नाग-नाग-बकुलैः पद्मैरुत्पलजातिभिः ॥
एतैरन्यैश्च कुसुमैः प्रशस्तैरच्युतं नरः ।
अर्चन्दशसुवर्णस्य प्रत्येकं फलमाप्नुयात् ॥
एवं हि राजन्नरसिंहमूर्त्तेः प्रियाणि पुष्पाणि तवेरितानि ।
एतैश्च नित्यं हरिमर्च्य भक्त्या नरो विशुद्धो हरिमेव याति ॥

नन्द्यावर्त्तं—पिण्डीतगरम् । वनमाला—कण्ठतः पादपर्यन्तम् । मालती-पीतजाती, गोलुम्बी पुष्पं वा । नागो—नागकेशरः । एते मल्लिकादिभिः, उपलक्षणमिदं, तेनैतेषां मध्ये यान्यनुक्तधिककफलानि, तन्मात्रपरमेतत् । अन्यथा मल्लिकादौ फलाधिक्योक्तिविरोधः स्यात् । अन्यैरुक्तान्यैरनिषिद्धैः ।

अग्निपुराणे—

मालती मल्लिका चैव यूथिका चातिमुक्तकः ।
पाटला करवीरश्च जया जायन्ति रेव च ॥
कुब्जकं तगरश्चैव कर्णिकारः कुरुण्टकः ।
चम्पको वातकः कुन्दो वाणो बर्बर मल्लिका ॥
अशोकस्तिलकश्चैव तथा चैवाटरूपकः ।
अमी पुष्पप्रकारास्तु शस्ताः केशवपूजने ॥
बिल्वपत्रं शमीपत्रं पत्रं भृङ्गरजस्य च ।
तमालपत्रञ्चहरेः सद्यस्तुष्टि करं परम् ॥
केतकीपत्रपुष्पञ्च भृङ्गराजस्य पत्रकम् ।
तुलसी कृष्णतुलसी सद्यस्तुष्टिकरी हरेः ॥

पद्मान्यम्बुसमुत्थानि रक्तनीले तथोत्पले ।
सितोत्पलञ्च कृष्णस्य दयितानि सदा नृप ॥
तानि पुष्पाणि देयानि विष्णवे प्रभविष्णवे ॥

कुरुण्टकः—पीतबाणः । वातको बीर इति प्रसिद्धः । चम्पः—चम्पक-पुष्पम् । वामनपुराणे—बलिम्प्रति प्रह्लादवाक्यम्—

तान्येव च प्रशस्तानि कुसुमानि महासुर ।
यानि स्युर्वर्णयुक्तानि रसगन्धयुतानि च ॥
जाती शतालका सुमना कुन्दं चारुपुटस्तथा ।
बाणश्च चम्पकाशोकं करवीरश्च यूथिका ॥
पारिभद्रं पाटला च बकुलं गिरिशालिनी ।
तिलकं जम्बुबनजं पीतकं तगरन्त्वपि ॥
एतानि हि प्रशस्तानि कुसुमान्यच्युतार्चने ।
सुरभीणि तथान्यानि वर्जयित्वा तु केतकीम् ॥
बिल्वपत्रं शमीपत्रं पत्रं भृङ्गरसस्य च ।
तमालामलकीपत्रं शस्तं केशवपूजने ॥
येषां हि सन्ति पुष्पाणि प्रशस्तान्युभयं विभोः ।
पल्लवान्यपि तेषां स्युः पत्राण्यर्चाविधौ हरेः ॥
धीरुवान्तु प्रवालेन बर्हिषा चार्च्चयेत्सदा ।
नानारूपैश्चाम्बुभवैः कमलेन्दीवरादिभिः ॥
प्रवालैः शुचिभिः श्लक्ष्णैर्जलप्रक्षालितैर्बले ।
वनस्पतीनामर्चेत तथा दूर्वाप्रपल्लवैः ॥

यानीति—निषिद्धान्यानीतिशेषः । जाती - सुवर्णजाती । सुमना—धवलजाती । चारुपुटः—कर्णिकारः । पारिभद्रं—फरहदइति । गिरि-

शाल्मिनी— अपराजिता। जम्बूवनजं—जवाकुसुमम्। पीलकं—पिपरीति प्रसिद्धम्। वर्जयित्वेति-केतकीकुसुमनिषेधो नरसिंह मूर्त्ति विहायेति रत्नाकरः। विहितनिषिद्धमिदमित्यन्ये। कूष्माण्डपुष्पमप्यत्रागमे विहितं, शंखपुष्पञ्च बन्धूक पुष्पञ्च, बन्धूके दुर्दिबन्धुः स्यात् इति हरिभक्तिलिखनात्।

विष्णुः—"नोग्रगन्धिकुसुमं न कण्टकिजं, नागन्धि, कण्टकिनमपि सुगन्धि, शुक्लं यत्तद्दद्यात्, न रक्तं दद्यात्। रक्तमपि जलजं, त्रिसन्ध्यां कुङ्कुमञ्च दद्यात्"।

अथ-धूपाः। तत्र विष्णुः—

"न धूपार्थं जीवजातं", कस्तूरिकादिधूपो न देय इत्यर्थः।

वामनपुराणे—

"रुहिकाभ्यां रुणां दारुं सिल्हकं सागुरुं सितम्।
शङ्खं जातीफलं श्रीशे धूपानि स्युः प्रियाणि वै॥

रुहिका—मांसी। रुणा—गुग्गुलुविशेष। शंखो—नखी। श्रीशे—विष्णौ।

नरसिंहपुराणे—

महिषाभ्यां गुग्गुलुं य आज्ययुक्तं सशर्करम्।
धूपान्ददाति राजेन्द्र नरसिंहाय भक्तिमान्॥
स धूपितः सर्वदिक्षु सर्वपापविवर्जितः।
अप्सरोगणयुक्तेन विमानेन विराजितः।
वायुलोकं समासाद्य विष्णुलोके महीयते॥

अथ दीपाः। नरसिंहपुराणे:—

घृतेन वाथ तैलेन दीपं यो ज्वालयेन्नरः।
विष्णवे विधिवद् भक्त्या तस्य पुण्यफलं शृणु॥

विहाय सकलं पापं सहस्रादित्यसन्निभः ।
ज्योतिष्मता विमानेन विष्णुलोके महीयते ॥

तैलं—तिलस्नेहः । घृतं तिलतैलं वा किञ्चन दीपार्थं दद्यादितिशेषः ।

अथ नैवेद्यम् । तत्र विष्णुः—

"नाभक्ष्यं नैवेद्यार्थे भक्ष्यैष्वन्यजा—महिषीक्षीरे । पञ्चनख-मत्स्य—वराहमांसानि", दद्यादिति शेषः । मेषी—महिषी—छागीनां दुग्ध-दधि-घृतान्य-देयानि ।

तदुक्तं वराहपुराणे—

ये मयैवोपयोज्या हि गव्यं दधि पयो घृतम् ।
माहिषं चाजिकं छागं अयज्ञियमुदाहृतम् ॥

अयज्ञियमवैष्णवम् । माहिषम् चाजिकं छागमिति दुग्धदधिघृत-विशेषणम् । पञ्चनखेष्वपि शल्यमांसं देयम् ।

मार्गं मांसं तथा छागं शाल्यं समनुमुञ्चते ।
एतानि मे प्रियाणि स्युः प्रयोज्यानि वसुन्धरे ॥

इति वराहपुराणात् ।

विष्णुः—"वासो न नीलरक्तम्" दद्यादित्यनुषज्यते । तेन नीलं लोहितं वा वासो न दद्यादित्यर्थः ॥

अग्निपुराणे—

दुकूलपट्टकौशेयवाङ्कार्पासिकादिभिः ।
वासोभिः पूजयेद्देवं सुशुभरात्मनः प्रियैः ॥
भक्ष्याणि यानि पेयानि भोज्यान्यभिमतानि च ।
फलञ्च मूलमं यच्च तच्च देयं जनार्दने ।

सुवर्णमणिमुक्तादि यथान्यदपि वल्लभम् ।
तत्तु देवाधिदेवाय केशवाय निवेदयेत् ॥
नरः समृद्धिं सम्प्राप्य गोविन्दासक्तमानसः ।
पूजयेदच्युतं देवं सततं स न सीदति ॥

नरसिंहपुराणे—आराधने नियोज्याथ यत्किञ्चिद्द्रव्यमुत्तमम् ।
तद्दत्वा नरसिंहाय विष्णुलोके महीयते ॥

॥ अथाष्टाक्षरपूजा ॥

नरसिंहपुराणे—मार्कण्डेय उवाच—

अर्च्चनं संप्रवक्ष्यामि देवदेवस्य चक्रिणः ।
यत्कृत्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥
अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट्स्थेतेषु मुने ! सम्यक् अर्च्चनं मुनिभिः स्मृतम् ॥"

मुने विष्णोः, सम्यगिति षट् प्रशंसा वचनादाधारान्तरेषि, शिष्टपरिगृहीते शालग्रामादौ विष्णुपूजा न विरुद्ध्यते । तत्र सा प्रशस्तेवेति दर्शितं प्राक् ।

ध्यानमाह—

ध्येयः सदा सवितृमण्डलमध्यवर्त्ती नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ॥

मकरकुण्डलवान् इति क्वचित्पाठः । शंखेत्यादुपलक्षणम् । तेन शङ्खं चक्रं दक्षिणकरद्वये पद्मशङ्खौ, वामकरद्वये गदाचक्रे, इति छन्दोगाह्निकम् ।

पूजामाह—

आनुष्टुभस्य सूक्तस्य त्रिष्टुभन्तस्य देवता ।
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥

आद्ययावाहयेद्देवमृचा तु पुरुषोत्तमम् ।
द्वितीययासनं दद्यात् पाद्यं चैव तृतीयया ॥
चतुर्थ्यार्घ्यं प्रदातव्यं पञ्चम्याचमनीयकम् ।
षष्ठ्या स्नानं प्रकुर्वीत सप्तम्या वस्त्रमेव हि ॥
यज्ञोपवीतमष्टम्या नवम्या गन्धमेव च ।
दशम्या पुष्पदानं स्याद् एकादश्या तु धूपकम् ॥
द्वादश्या दीपकं दद्यात् त्रयोदश्या चरुस्तथा ।
चतुर्दश्याञ्जलिं कुर्यात् पञ्चदश्या प्रदक्षिणम् ॥
षोडश्योद्वासनं कुर्याच्छेषकर्माणि पूर्ववत् ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥
षण्मासात्सिद्धिमाप्नोति देवदेवं समर्च्चयन् ।
दद्यात्पुरुषसूक्तेन यः पुष्पाण्यपि एव च ।
अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् ॥
एतत्पठन् केवलमेव सूत्रं दिने दिने भावितविष्णुबुद्धिः ।
स सर्वदुःखानि विहाय वैष्णवं पदं प्रयात्यच्युत तुष्टिकिङ्करः ॥
पत्रेषु पुष्पेषु फलेषु तोयेष्वक्रीतलभ्येषु सदैव सत्सु ।
भक्त्यैकलभ्ये पुरुषे पुराणे मुक्त्यै किमर्थं क्रियते न यत्नः ॥
इत्येष सूक्तः पुरुषस्य विष्णोरर्चाविधिस्तेद्य मया नृपेन्द्र ।
अनेन नित्यं कुरु विष्णुपूजां प्राप्तुं तवेष्टं यदि वैष्णवं पदम् ॥

यत्र च प्रतिमादौ स्थिर एव पुरुषसन्निधिः तत्र नावाहनोद्वासने, आवाहनाद्युद्वासनान्तं विष्णवर्चनमभिधाय प्रतिमास्थानेष्वप्सु चावाहन-विसर्जनवर्ज्जमिति बौधायनसूत्रात् ।

स्नानवस्त्रे इति । स्नानदानानन्तरमाचमनीयदानमेवं वस्त्रनैवेद्ययो-

रपि। एतच्च पञ्चम्या ऋचेति। शेषकर्माणीति। प्रयातु भगवान् पुनरागमनाय पुनः सन्दर्शनायेति वाच्यमित्यर्थः।

तत्रैव जप्यमाह व्यासः—

अष्टाक्षरं प्रवक्ष्यामि मन्त्राणां मन्त्रमुत्तमम्।
यं जपन्मुच्यते मर्त्यो जन्मसंसारबन्धनात्॥
हृत्पुण्डरीकमध्यस्थं शंखचक्रगदाधरम्।
एकाग्रमनसा ध्यात्वा विष्णुं कुर्याज्जपं द्विज॥
एकान्ते विजनस्थाने विष्णवग्रे वा जलान्तिके।
जपेदष्टाक्षरं मन्त्रं चित्ते विष्णुं निधाय वै॥
अष्टाक्षरस्य मन्त्रस्य ऋषिर्नारायणः स्वयम्।
छन्दश्च देवी गायत्री परमात्मा च देवता॥
शुक्लवर्णश्च ओंकारं नकारं रक्तमुच्यते।
मोकारं वर्णतः कृष्णं नाकारं रक्तमुच्यते॥
राकारं कुङ्कुमाभश्च यकारं पीतमुच्यते।
णाकारं कज्जलाभश्च यकारं बहुवर्णकम्॥
नमो नारायणायेति मन्त्रः सर्वार्थसाधकः।
भक्तानां जपतां तात स्वर्गमोक्षफलप्रदः॥
स्नातः शुचिर्जपेद्यस्तु नमोनारायणं शतम्।
स गच्छेत्परमं देवं नारायणमनामयम्॥
कृत्वोर्द्ध्वबाहुरप्यत्र सत्यपूर्वं ब्रवीमि वः।
हे पुत्र शिष्याः शृणुत मन्त्रोऽष्टाक्षरः परः॥
सत्यं सत्यं पुनः सत्यमुत्क्षिप्य भुजमुच्यते।
नास्ति वेदात्परं शास्त्रं न देवः केशवात्परः॥

आलोच्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः परः ॥

अत्र चायमनुष्ठानक्रमः —

पूजोपयुक्तवस्तूनि सन्निधाप्याभिषिच्य, अस्यानुष्टुभस्य सूक्तस्य त्रिष्टुप् छन्दो जगद्बीजं पुरुषो देवता नारायणऋषि विष्णुयागे विनियोग इति ऋष्यादिकं स्मृत्वा— ओं सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिग्वं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् , ओंविष्णो इहागच्छ ॥ ओं पुरुष एवेदग्वं सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति, इदमासनमत्र तिष्ठ ॥ ओं एतावानस्य महिमातो ज्यायांश्च पूरुषः, पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि, इदं पाद्यं ओं विष्णवे नमः ॥ ओं त्रिपादूर्द्ध्व उदैत् पुरुषः पादोस्येहाभवत्पुनः, ततो विष्वङ् व्यक्रामत्साशनानशने अभि, एषोर्घः ओं विष्णवे नमः ॥ ओं ततो विराडजायत विराजो अधिपूरुषः, स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः इदमाचमनीयं ओं विष्णवे नमः ॥ ओं तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम् , पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये, इदं स्नानीयं ओं विष्णवे नमः ॥ अथ पूर्ववदाचमनीयदानम् ॥ ओं तस्माद्यज्ञात्सर्वहुत ऋचः सामानि यज्ञिरे, छन्दाग्वंसि यज्ञिरे तस्माद्यजुस्तस्मादजायत, इदं वस्त्रं ओं विष्णवे नमः ॥ अत्रापि पूर्ववदाचमनीयदानम् ॥ ओं तस्मादश्वा अजायन्त ये के चोभयादतः, गावो ह यज्ञिरे तस्मात्तस्माज्जाता अजावयः इदं यज्ञोपवीतं ओं विष्णवे नमः ॥ ओं तं यज्ञं बर्हिषि प्रौक्षन् पुरुषञ्जातमग्रतः । तेन देवा अयजन्त साध्या ऋषयश्च ये । एष गन्धः ओं विष्णवे नमः ॥ ओं यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् , मुखं किमस्यासीत् किम्बाहू किमूरू पादा उच्येते, इदं पुष्पं ओं विष्णवे नमः, इति त्रिः पूजयेत् । ओं ब्राह्मणोस्य मुखमासीद् बाहू राजन्यः कृतः । ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत । एष धूपः ओं विष्णवे नमः ॥ ओं चन्द्रमा मनसो जातश्चक्षोः

सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत। एष दीपः ओं विष्णवे नमः॥ ओं नाभ्या आसीदन्तरिक्षग्वं शीर्ष्णो द्यौः समवर्त्तत, पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ ३ अकल्पयन्। एष चरुः ओं विष्णवे नमः। अत्रापि पूर्ववदाचमनीयदानम्॥ ओं यत्पुरुषेण हविषा देवा यज्ञमतन्वत। वसन्तोस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः। इति पठित्वाऽञ्जलिङ्कुर्यात्। ओं सप्तास्यासन् परिधयस्त्रिः सप्त समिधः कृताः। देवा यद्यज्ञन्तन्वाना अबध्नन् पुरुषम्पशुम्। इति पठित्वा प्रदक्षिणङ्कुर्यात्॥ ओं यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्, तेह् नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः। ओं विष्णो क्षमस्वेति विसर्ज्जयेत्।

सूर्याय दत्तं मगेभ्यः शिवाय दत्तं भस्माङ्गेभ्यो, दुर्गायै दत्तं स्त्रीभ्यो, विष्णवे दत्तं सात्वतेभ्यो ब्राह्मणेभ्यो वा दद्यात्। सात्वतस्तु :—

पञ्चमः सात्वतो नाम विष्णोरायतनान्यपि।
पूजयत्याज्ञया राज्ञो यदि स्यात्संयतेन्द्रियः॥

इति ब्रह्मपुराणे परिभाषितः।

॥ अथ—विष्णोरपराधाः ॥

धरणीप्रश्ने वराह उवाच—

यस्तु भुञ्जीत राजान्नं क्षुधार्त्तोथ भयेन वा।
भुङ्क्ते त्वापद्गतश्चापि राजान्नञ्च वसुन्धरे।
दशवर्षं सहस्राणि पच्यते नरकेऽवनि! ॥
दन्तकाष्ठमखादित्वा यस्तु मामुपसर्पति।
सर्वकालकृतं कर्म तेन चैकेन नश्यति॥

दन्तकाष्ठमनिषिद्धदिने ।

गत्वा तु मैथुनं भद्रे योऽस्नातो मामुपस्पृशेत् ।
रेतः पिबति वर्षाणां सहस्राणि चतुर्दश ॥
दृष्ट्वा तु मृतकं भद्रे नरम्पश्चत्वमागतम् ।
मम शास्त्रं बहिः कृत्वा अस्माकं यः प्रपद्यते ॥
पितरस्तस्य सुश्रोणि ! तथैव च पितामहाः ।
श्मशाने जम्बुका भूत्वा भक्षयन्ति शवन्तथा ॥

बहिःकृत्य – अनादृत्य । अस्माकमिति अस्मानित्यर्थः ।

नारीं रजस्वलां स्पृष्ट्वा यो मां स्पृशति निर्भयः ।
रागमोहसमायुक्तः कामेन च वशीकृतः ॥
वर्षाणां स सहस्रैकं रजः पिबति निर्घृणः ।
अथवा जायते भूमि दरिद्रो मूर्ख एव च ॥
स्पृष्ट्वा तु मृतकं भूमि ! यो मे क्षेत्रेषु तिष्ठति ।
शतवर्षसहस्राणि गर्भेषु परिवर्त्तते ॥
दशवर्षसहस्राणि चाण्डालो जायते नरः ॥

तिष्ठतीत्यत्र स्नानमकृत्वेति शेषः । परिवर्त्तते --पुनः पुनः प्रविशति ।

स्पृशन्मामत्र यो भूमि ! वातकर्म प्रमुञ्चति ।
वातं पुरीषसंयुक्तं स पिबेत्त न संशयः ॥
मक्षिका पञ्चवर्षाणि सप्तवर्षाणि मूषकः ।
श्वा चैव त्रीणि वर्षाणि नववर्षाणि कच्छपः ॥
पुरीषं यः प्रमुञ्चेत्तु ममकर्म समाचरन् ।
दिव्यवर्षसहस्राणि रौरवे नरके वसेत् ॥

पुरीषं भक्षयेत्तत्र अपराधात्तु नित्यशः ।
त्यक्त्वा तु मम शास्त्राणि वाक्यमन्यत्प्रभाषते ।
कृमिर्भवति सुश्रोणि ! जातीः सप्त च सप्त च ॥

त्यक्त्वा – अनादृत्य । प्रभाषते प्रमाणयति । जातीर्जन्मानि । सप्तसप्त – चतुर्दश ।

भूषितो नीलवस्त्रेण यस्तु मां प्रतिपद्यते ।
शतानि पञ्चवर्षाणां कृमिर्भूत्वा स तिष्ठति ॥

नीलमत्यन्तमलिनम् ।

अविधानेन वा स्पृश्य यस्तु मामुपसर्पति ।
स मूर्खः पापकर्मा वै मम विप्रियकारकः ॥
तेन दत्तं वरारोहे गन्धमाल्यं सुगन्ध्यपि ।
प्राषणञ्च न गृह्णामि मिष्टञ्चापि कथञ्चन ॥

स्पृश्य—आचम्य । प्राषणं—नैवेद्यम् ।

व्यभिचारञ्च मे कृत्वा यो हि मामुपसर्पति ।
दशवर्षसहस्राणि दशवर्षशतानि च ।
कृमि भूत्वा यथान्यायं तिष्ठते पुरुषाधमः ॥

व्यभिचारोऽत्रापराधः ।

यश्च क्रोधसमायुक्तो मम कर्मपरायणः ।
स्पृशेत्तु ममगात्राणि चित्तं कृत्वा चलाचलम् ॥
न चाहं योगमिच्छामि क्रुद्धस्य च वशम्विनि ।
इच्छामि शान्त दान्तं वै भूमि ! भागवतं शुचिम् ॥
अन्यच्च ते प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ।

योनि-दोषांश्च लभते क्रुद्धो भागवतोऽशुचिः ॥
मूषकोऽब्दशतं यावत्सर्पो वर्षशतं पुनः ।
त्रिंशद्वर्षाणि मण्डूकः शृगालो जायते पुनः ॥
अकर्मण्येन पुष्पेण यो मामर्च्चयते नरः ।
पतनन्तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ॥
नाहं तत्प्रतिगृह्णामि न चैते च मम प्रियाः ।
पतन्ति नरके घोरे रौरवे तदनन्तरम् ॥

अकर्मण्यं—विष्णुपूजानिषिद्धम् ।

रक्तवस्त्रेण संयुक्तो यस्तु मामुपसर्पति ।
तस्यापि शृणु सुश्रोणि कर्मसङ्करमीषणम् ॥
रजस्वलासु नारीषु रजो यत्र प्रवर्त्तते ।
तेनासौ रजसा स्पृष्टः कर्मदोषेण जायते ॥

रजसेति—रजस्वलायामाधानेन जायत इत्यर्थः ।

यस्तु मामन्धकारे तु विना दीपेन सुन्दरि ।
स्पृशते च विनामन्त्रैरवशो रागमोहितः ॥
पतनन्तस्य वक्ष्यामि तच्छृणुष्व वसुन्धरे ।
याम्यक्लेशं समासाद्य क्लिश्यते च नराधमः ॥
अन्धो भूत्वा महाभागे जन्मैकं स तु तिष्ठति ।
सर्वाशी सर्वभक्ष्यो वै मानवश्चैव जायते ॥
यस्तु कृष्णेन वस्त्रेण मम कर्मपरायणः ।
भूमि ! कर्माणि कुर्वीत तस्य वै पतनं शृणु ॥
घुणश्च पञ्चवर्षाणि काष्ठभक्षः स जायते ॥

कृष्णं—कज्जलाभम् ।

वायसोद्धृतवस्त्रेण यो मे कर्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम कर्मानुसारतः ॥
सोऽस्मिन् पतति संसारे वायसोच्छिष्टहारकः ॥

कारयेत्--करोतीत्यर्थः ।

शुनोच्छिष्टन्तु यो दद्यान्मम कर्मपरायणः ।
श्वा चैव सप्तवर्षाणि शशः पञ्च च जायते ॥

दद्यान्मह्यमितिशेषः ।

भुक्त्वा वराहमांसन्तु यस्तु मामुपसर्पति ।
वराहो दशवर्षाणि भुक्त्वा वै चरते वने ॥
जालपादं भक्षयित्वा यस्तु मामुपसर्पति ।
जालपादस्ततो भूत्वा वर्षाणि दश पञ्च च ॥
कुम्भीरो दशवर्षाणि शतं वर्षाणि कच्छपः ॥

जालपादः शरालिः ।

स्पृष्ट्वा तु दीपकं सुभ्रु यस्तु मां स्पृशते नरः ।
अप्रक्षाल्यैव हस्तौ च मम कर्मपरायणः ॥
जायते षष्टिवर्षाणि कुष्ठी गात्रपरिप्लुतः ।
चाण्डालस्य गृहे तत्र एवमेतन्न संशयः ॥

गात्रपरिप्लुतो—गलन्मदः ।

श्मशानं यो नरो गत्वाऽस्नात्वा मामुपसर्पति ।
जम्बूको जायते भूमि ! वर्षाणि नव पञ्च च ॥

गृध्रश्च सप्तवर्षाणि जायते खेचरस्तथा ।
पिण्याकं भक्षयित्वा तु यस्तु मामुपसर्पति ॥
उलूको दशवर्षाणि बकश्चैव स मानवः ।
जायते पुरुषस्तत्र मम कर्मपरायणः ॥

पिण्याकः—तिलखलिः ।

यो वै वराहमांसेन मम कुर्वीत प्रापणम् ।
तस्माद्दोषात्प्रपद्येत संसारश्च वसुन्धरे ॥
यावन्मात्राणि वाराहगात्ररोमाणि सन्ति वै ।
तावद्वर्षसहस्राणि पतते नरके शुभे ! ॥
यावन्ति तत्र सिक्तानि भाजनेषु स्थितानि वै ।
तावद्वर्षसहस्राणि शौकरीं योनिमाप्नुयात् ॥

प्रापणं—नैवेद्यम् । सिक्तानि—मांसप्रलेहबिन्दवः ।

मद्यं वस्तु समासाद्य प्रविशेद् भवनं मम ।
दशवर्षसहस्राणि दरिद्रो जायते नरः ॥
यस्तु भागवतो भूत्वा कामरागेण पीडितः ।
दीक्षितो वा पिबेन्मद्यं प्रायश्चित्तन्न तस्य वै ॥

समासाद्य—गृहीत्वा, पीत्वा, स्पृष्ट्वा वा ।

यः पारक्येण वस्त्रेण अवधूतेन चावनि ।
प्रावारयेत्तु मां मूर्खो ममकर्मपरायणः ।
मृगो जायेत सुभ्रोणि वर्षाणि त्रीणि सप्त च ॥

पारक्येण—परकीयेण । अवधूतेन—अशुचिना ।

अदत्त्वा यो नवान्नानि मम कर्मपरायणः ।
भुंक्ते भूमि ! नवान्नानि परदत्तानि कानिचित् ॥
पितरस्तस्य नोश्नन्ति दशवर्षाणि पञ्च च ।
अदत्त्वा गन्धमाल्यानि यो मे धूपं प्रयच्छति ॥
मृतोसौ जायते भूमि ! यातुधानो न संशयः ।
उपानद्गूढपादन्तु मम स्थानं विशेत् यः ॥
चर्मकारस्तु जायेत स वर्षाणि त्रयोदश ।
तत्रोजन्मपरिभ्रष्टः शूकरो जायते नरः ॥
भेरीशब्दमकृत्वा तु यस्तु मां प्रतिबोधयेत् ।
बधिरो जायते भूमि ! एकं जन्म न संशयः ॥
प्रभूतमन्नं भुक्त्वा वै अजीर्णेन परिप्लुतः ।
उद्गारेण समायुक्तो यस्तु मामुपसर्पति ॥
जन्मैकन्तु भवेच्छ्वा वै जन्म चैकन्तु वानरः ॥

नरसिंहनिर्माल्यलंघनाद्भग्नदिव्यरथारोहणशक्ति शान्तनुं प्रति नारदवाक्यम्—

अतः परन्तु निर्माल्यं न लंघय महीपते ।
नरसिंहस्य देवस्य तथान्येषां दिवौकसाम् ॥

॥ अथ पञ्च महायज्ञाः ॥

तत्र दक्षः—

पञ्चमे च तथा भागे संविभागो यथार्हतः ।
पितृदेवमनुष्याणां कीटानाञ्चोपदिश्यते ॥

संविभज्यतेऽस्मिन्निति संविभागः । संविभज्य प्रतिपादनम् । यथार्हतः—यथायोग्यम् । कीटपदमत्र भूतोपलक्षणम् । मनुः—

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः ।
कण्डनी चोदकुम्भश्च वध्यते यास्तु वाहयन् ॥

कीटादीनां धमापनेन चुल्ली । पेषणेन—पतितप्राणिवधादिना पेषणी । क्षेपणादिना—मार्ज्जनी । अवहननेन कण्डनी सकीटजलाहरणेनोदकुम्भश्च । एते पञ्च— गृहस्थस्य सूनाः सूनासदृशाः बधजन्यदोषहेतुत्वात् । अत एतान् वाहयन्— व्यापारयन् बध्यते सूनादोषैः सम्बध्यत इत्यर्थः । पञ्चमहायज्ञान् व्याकुर्वन्नेव सूनादोषापनोदकत्वमाह स एव—

स्वाध्यायेनार्चयेदृषीन् होमैर्देवान् यथाविधि ।
पितॄन् श्राद्धै र्नृनन्नै र्भूतानि बलिकर्मणा ॥
पञ्चैतान् यो महायज्ञान्न हापयति शक्तितः ।
स गृहेपि वसन्नित्यं सूनादोषैर्न लिप्यते ॥

एवञ्च—पापक्षयकामस्याप्राधिकार उक्तः । शंखलिखितौ—"अहरहः पञ्चयज्ञान्निर्वपेदापन्नश्चाकोदकेभ्यः" । एषु पञ्चमहायज्ञेषु जीवितोऽधिकार उक्तः । छन्दोगपरिशिष्टम्—

देवभूतपितृब्रह्ममनुष्याणामनुक्रमात् ।
महासत्त्राणि जानीयात् त एव हि महामखाः ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलि र्भौतो नृयज्ञोऽतिथिपूजनम् ॥
श्राद्धं वा पितृयज्ञः स्यात् पित्र्यो बलिरथापि वा ॥

अनुक्रमादिति—प्रकृतक्रमविधिः । तेनाचानुष्ठानोपाधिकः क्रमः । पित्र्यबलिश्राद्धतर्पणानाञ्च पितृयज्ञत्वं, नित्यश्राद्धानन्तरन्तु मनुष्ययज्ञ इतीयं व्यवस्था नित्यश्राद्धाधिकारिविषया । यत्तु—कृत्वैतद्बलिकर्मैवमतिथिं

पूर्वमाशयेत्, इति मनुवचनं, तद्वत्यधिकारि-श्राद्धानधिकारि-विभक्त-जीवत्पितृकपरमतो न विरोधः।

व्यासः—

वैश्वदेवन्तु कुर्वीत स्वशाखाविहितन्तु यत्।
संस्कृतान्नैर्हविष्यैश्च हविष्यव्यञ्जनान्वितैः॥
तैरेवान्नैर्बलिन्दद्याच्छेषमाप्लाव्य वारिणा।
कृतापसव्यः स्वधया सर्वं दक्षिणतो भवेत्॥

आपस्तम्बः—"न स्त्री जुहुयान्नानुपेतः"। अनुपेतोऽनुपनीतः। तथा न क्षारलवणहोमो विद्यते, तथा—परान्न संस्पृष्टस्याहविष्यस्य च। अहविष्यं माषादि। हविष्याणि तु—'हैमन्तिकं सितास्विन्नम्' इत्यादि परिभाषितानि। अत्र छन्दोगपरिशिष्टम्—

हविष्येषु यवा मुख्यास्तदनु व्रीहयोमताः।
माषकोद्रवगौरादीन् सर्वालाभेपि वर्ज्जयेत्॥

व्रीहयः— कलमादयः। गौरोत्र—सितसर्षपः। कोद्रव—चीण क-चणक-माष-मसूर- कुलत्थोद्दानवर्ज्जन्निर्वपनीयमिति शंखवचनादादिपदग्राह्यानि चणकादीनि। उद्दानो - 'बहुआर' इति प्रसिद्धः।

वशिष्ठः—

सायं च प्रातर्गृह्येग्नौ, जुहुयाद् गृहदेवता॥

एभ्यो बलिं हरेत् सायमिति पुनः पाकान्नेन।

पुनः पाकमुपादाय सायमप्यवनीपते॥
वैश्वदेवनिमित्तन्तु पत्न्या सार्द्धं बलिं हरेत्॥

तत्रापि स्वपचादिभ्यस्तथैवान्नापवर्जनमिति विष्णुपुराणवचनात्। गृह्ये आवसथ्याग्नौ इति तु साग्निविषयम्।

अङ्गिराः—

शालाग्नौ वा पचेदन्नं लौकिके वापि नित्यशः।
यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते॥

शालाग्नौ गृह्ये। शुचयो द्विजातयो वैश्वदेवार्थं पाचका इत्याह आपस्तम्बः—"आर्याः प्रयताः वैश्वदेवेन्नसंस्कारकाः"। अदन्नसंमुखश्च वचनोत्काशच्छिक्कादि न कार्यमित्याहुः। भाषणं काशं क्षुवथुमित्यभिमुखोन्नं वर्जयेत्। स्थानान्तरमप्याह शातातपः—

लौकिके वैदिके वापि हुतोच्छिष्टे जले चितौ।
वैश्वदेवन्तु कुर्वीत पञ्चसूनापनुत्तये॥
वैश्वदेवेन ये हीना आतिथ्येन विवर्जिता।
सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः॥

लौकिके—पाकसाधने। वैदिके—आवसथ्याग्नौ। वैदिके इति साग्निपरम्। शेषं—निरग्नेः। हुतोच्छिष्टे—अन्येन हुत्वा त्यक्ते। इदं त्वनश्नतापि गृहस्थेनातिथ्यानुरोधेन द्वि.पाकतापक्षे द्विरवश्यं कार्यम्।

सायं प्रात वैश्वदेवः कर्त्तव्यो बलिकर्म च।
अनश्नतापि सततमन्यथा किञ्चिपी भवेत्॥

इति छन्दोगपरिशिष्टात्। पाकश्च—पत्न्या शुचिः। पत्न्यभावे स्वयङ्कार्यः।

अत ऊर्द्ध्वं देवयज इत्युपक्रम्य आह शंखः—"तण्डुलान् प्रातः पत्न्यै दद्यात्, स्वयं वा विश्रपेत्"। आपस्तम्बः—"गृहे मेधिनो यदशनीयं तस्य होमाबलयश्च स्वर्गं पुष्टेः संक्रमाः"। पुष्टिः—कर्मफलम्।

बोधायनः—

भोजनं हवनं दानमुपहारः प्रतिग्रहः ।
बहिर्ज्जानुमत्कार्याणि तद्वदाचमनं स्मृतम् ॥

वायुपुराणे—

दानं प्रतिग्रहो होमो भोजनं बलिरेव च ।
साङ्गुष्ठेन सदा कार्यमसुरेभ्योन्यथा भवेत् ॥
वैश्वदेवाहुतिस्तु द्वादशपर्वप्रपूरिका ॥

पाण्याहुति द्वादशपर्वपूरिकेति छन्दोगपरिशिष्टात् । बलिप्रमाणमपि तत्रैव— "न चावराद्धर्या बलयो भवन्ति" महामार्जारश्रवणप्रमाणादिति । अवराद्धर्या - ऊनपरिमाणाः । असम्भवे स्वशुष्कामलकमाना अपि कार्याः ।

आर्द्रामलकमानेन कुर्याद्धोमहविर्बलीन् ।
प्राणाहुतिं बलिश्चैव मृदं गात्रविशोधनीम् ॥

इति छन्दोगपरिशिष्टटीकालिखितवचनात् ।

आपस्तम्बः—बलीनान्तस्य देशस्य संस्कारो दक्षिणेन प्रमृज्यावेक्ष्य स्थूप्य पश्चात्परिषेचनम् । तस्य—तस्येति वीप्सातः प्रत्येकं मार्ज्जनादि, आवेक्ष्य सिक्त्वा, स्थूप्य बलिन्दत्त्वा । परिषेचनं बलेरुपरि सेकः ।

छन्दोगपरिशिष्टे—

अमुष्मै नम इत्येवं बलिदानं विधीयते ॥

तथाच पर्जन्याय नम इत्यादि रूपेण बलिदानम् । पित्र्ये बली तु तत्रैव—

स्वधाकारेण निर्वपेत्पित्र्यं बलिमतः सदा ।
तमप्येके नमस्कारैः कुर्वते न तु गोतमः ॥

एके वाजसनेयिनः । तथा च स्वधा नम इति पत्र्यबलिदानम् । न तु गोतम इति, छन्दोगानभिप्रेत्य तत्रैव 'पिण्डवच्च पश्चिमाप्रतिपत्तिः', यथा पिण्डप्रतिपत्तिर्विप्रगवादिषु तथा बलीनामपि चरमाप्रतिपत्तिरित्यर्थः । अत्र च होमात्प्रागग्निः पूज्यः, "पूजयेच्च ततो वह्निन्दद्याच्चाहुतयः क्रमात्" इति-मार्कण्डेयपुराणात् । अत्र च भ्रात्रादीनामविभक्तानां संसृष्टानामेकपाकत्वे ज्येष्ठेनैव तत्कार्यम् ।

एकपाकेन वसतां पितृदेवद्विजार्च्चनम् ।
एकं भवेद्विभक्तानां तदेव स्याद् गृहे गृहे ॥

इतिवचनात् । देवार्चनं—वैश्वदेवः । अमीषाञ्च भिन्नपाकत्वेपि, मुख्यपाकादेव । "यद्येकस्मिन् कुले बहुधान्नं पच्यते गृहपतिमहानसादेवैतद्बलितन्त्रं कुर्वीत" इति गोभिलगृह्यात् । अमीषां मध्येऽमुष्यस्यादौ पाके, तेन तूष्णीमेवाग्नौ किञ्चित प्रक्षिप्य किञ्चिद् ब्राह्मणाय दत्त्वा भोक्तव्यम् । यस्य त्वेषामग्रतोऽन्न सिद्धयेत स निहुतमेवाग्नौ हुत्वाग्रं ब्राह्मणाय दत्त्वा भुञ्जीतेत्यपृथग्बलाधिकारे गोभिलगृह्यात् । यदि चैषामेव मुख्येन कृते वैश्वदेवेऽमुख्यस्य पश्चादन्नसिद्धिः । तदा न किञ्चिदमुख्येन कर्त्तव्यं, मानाभावात्, किन्तु भोक्तव्यमेव बहुप्रकारम् । यदि दिवैव सायमेव वा बहुधाऽन्नं पच्यते । तदापि सकृदेव वैश्वदेवादिकम् । यद्येकस्मिन् काले व्रीहियवौ प्रक्रियेतामन्यतरस्य हुत्वा कृतं मन्येत, यद्येकस्मिन् काले पुनः पुनरन्नं पच्यते, सकृदेवैतद्बलितन्त्रं कुर्वीतेति गोभिलगृह्यात्, व्रीहियवाविति नानाजातीयान्नोपलक्षणम् । अथ वाजसनेयिगृह्यपारस्करः— "वैश्वदेवान्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयात् । ब्रह्मणे प्रजापतये गृह्याभ्यः कश्यपायानुमतये" इति भूतगृह्येभ्यो मणिके त्रीन्, पर्जन्यायादृभ्यः पृथिव्यै धात्रे विधात्रे च द्वारयोः, प्रतिदिशं वायवे, दिशाञ्च मध्ये त्रीन् ब्रह्मणेऽन्तरिक्षाय सूर्याय विश्वेभ्यो देवेभ्यो विश्वेभ्यो भूतेभ्यस्तेषामुत्तरत उषसे भूतानां पतये, परं पितृभ्यः स्वधा नम

इतिदक्षिणतः पात्रं निर्णिज्योत्तराधरस्यां दिशि निलयेद्यक्ष्मैलक्त इति ।

वैश्वदेवादित्यादि । विश्वेदेव-देवताकरण्यर्थं साधितात् । प्रधानेन चायं व्यपदेशः । तदन्नस्य वल्यन्तरे भक्षणेपि च विनियोगात् । तथा च— गृह्याग्नौ लौकिकाग्नौ वा यथाधिकारं यदन्नं पच्यते । तद्वैश्वदेवमन्नं, तस्मादुद्धृत्यैवि शेषः । पर्युक्ष्य-वारिधारयावेष्ट्य, अग्निमिति शेषः । तथा— अग्निपर्युक्ष्य—पाकाग्रमुद्धृत्य जुहुयादिति विष्णुवचनात् यद्यपि पर्युक्षण-स्वाहाकारौ होमसामान्यधर्मत एव प्राप्तौ, तथापि वयोरुपादानं होमेतिकर्त्तव्यतान्तरस्य एष एव विधिर्यत्र क्वचिद्धोम इत्यतिदेशागतस्य निषेधाय, तेनार्थात् त्यागोपि निवर्त्तते । जलादौ तु होमपक्षे पर्युक्षणमपि नास्ति । अनुमतय इतीतिकारो होमसमाप्तिज्ञापकः । एवञ्चानुमत्यन्ताः पञ्चाहुति गृह्याग्नौ, तदभावे पाकाग्नौ, जले, क्षितौ वा जुहुयात । अत्र—वासुदेव-हरिहरपद्धत्यादौ त्यागोपि लिखितः । तत्र चोक्तं दिक्पवञ्च लञ्चदिशामिति सूत्रदर्शनाद्युक्तं, वीहारे यथाश्रुतीत्यापस्तम्बवचनात् । श्रीदत्ताह्निकाद्यनुमतास्तु न तथाचरन्ति ।

इदन्तु प्राक्संस्थमुदक्संस्थं वा देयम् । ततो द्वारस्य दक्षिणपार्श्वे धात्रे वामपार्श्वे विधात्रे हरिहरश्रीदत्ताह्निकोप्येवम् । प्रतिदिशं वायवे दिशाञ्च, चकारात्प्रतिदिशमिति सम्बद्धयते । इदञ्च प्राच्यादितो देयम् । वायवे प्रतिदिशस्थश्च दिग्भ्यः प्राच्यादितः क्रमादिति मार्कण्डेयपुराणात् । मध्ये गृहस्यैव ब्रह्मणेऽन्तरिक्षाय सूर्याय च बलित्रयं प्राक्संस्थम् । तत एषामुत्तरतो विश्वेभ्यो देवेभ्यो विश्वेभ्यो भूतेभ्य इति बलिद्वयं प्राकसंस्थम् । ततोऽनयोरुत्तरतः प्राक्संस्थं, उपसे भूतानाम्पशवे च बलिद्वयमिति कर्कहरिहरवासुदेवादयः । यद्युत्तरचतुष्कस्य ब्रह्मादिभिरोक्तत्वं विवक्ष्येत तदा सूर्यायेत्यनन्तरमेवोत्तरत इति विधीयेत । न तु भूतेभ्य इत्यनन्तरमतो विद्मा ब्रह्मादित्र्युत्तरं द्वयोस्तदुत्तरञ्च शेषयोस्तेषामिति चादौ ब्रह्मादिपरम् । ततस्तयोरिति विपरिणतं सद्विश्वेदेवादिद्वयम्, अन्यथा अनन्वयात् । ननु,

ब्रह्मणे चान्तरिक्षाय यमाय च यथाक्रमम् ।
विश्वेभ्यश्चैव देवेभ्यो विश्वभूतेभ्य एव च ॥
उषसे भूतपतये दद्याच्चोत्तरतस्ततः ॥

इति मार्कण्डेयपुराणाच्च । चतुर्णामविशेषेण ब्रह्मादिबलिश्चिकोत्तरत्वमिति न उक्तव्याख्यानेनापि उत्तरत्वक्षतेः । अनासक्तेश्चाप्रतिकार्यत्वादिति कर्कादयाशयः ।

श्रीदत्ताह्निकादौ तु चतुष्टयमुत्तरोत्तरं विभक्तिविपरिणामापेक्षया व्यवहितान्वयस्यैव लाघवेनाश्रयणादित्युक्तम् । ततो ब्रह्मबलेर्दक्षिणतः । पित्रीतिकर्त्तव्यतया पितृभ्य एकं बलिम्, उत्तरापरा वायवी तेनान्नपात्रप्रक्षालनजलमवशिष्टान्नसहितब्रह्मबलेर्वायव्यां दिशि यक्ष्मणे दद्यात्, "अन्नावशेषमित्रं वैतोयं दद्याद्यथाविधि" इति मार्कण्डेयपुराणवचनात् । अत्र केचिदाहुः— अश्रं विधिः साग्नेरेव ।

अग्न्यादि गोतमेनोक्तो होमः शाकल एव च ।
अनाहिताग्नेरप्येष युज्यते बलिभिः सह ॥

इति छन्दोगपरिशिष्टवाक्येन निरग्नेः प्रकाशान्तरविधानात् । न च छन्दोगपरिशिष्टमेव निरग्निछन्दोगपरमिदं, सर्वशाखाप्रत्ययमेकं कर्मेतिन्यायेनास्य सर्वार्थत्वात् । तथाहि—अग्न्यादिः अग्निर्द्धन्वन्तरि विश्वदेवा प्रजापतिः । स्विष्टकृदितिगोतमेनोक्तः । होमः शाकलः । काष्ठ सकल साध्योज्योतिष्टोमे होमः । देवकृतस्यैनसो यजनमसीत्यादि मन्त्रकः अनाहिताग्नेः—श्रौतस्मार्ताग्निरहितस्य अयं विधि बलिसहितो युज्यत इति तन्न । निरग्निवाजसनेयिनी वैश्वदेवान्तराभावात् । "वैश्वदेवन्तु कुर्वीत स्वशाखाविहितन्तु यत् ।" इति व्यासवचनेन स्वगृह्यस्योक्तस्यैव तस्यादर्तुमुचितत्वात् । अगत्याह्नि पारक्याचरणम् । न च मणिकवाधात्तद्बाधः । मणिकस्य लौकिकतया निर-

ग्नेरपि तत्सम्भवात्। तदसम्भवे वा उदकुम्भ एव तत्स्थानीयोस्तु। अद्भ्य उदकुम्भ इति गोतमवचनेन पर्यन्यादिबलावुदकुम्भविधानात्। मणिकपर्दं वा उदपात्र मात्रोपलक्षकमस्तु, उदपात्रसन्निधानित्यापस्तम्बवचनात्।

न च वैश्वदेवपदस्य निरग्निवाजसनेये प्राप्तभावः। सामान्यविधिनैव प्राप्तत्वात्। तथा चोद्वाहनानन्तरं संवर्त्तः—

"ततः पञ्चमहायज्ञान् कुर्यादहरहर्द्विजः।
न हापयेत्तु तान् प्राज्ञः श्रूयन्ते हि श्रुताविति॥"

तस्मान्निरग्नि वाजसनेयिनापि स्वगृह्यानुसारेणैव वैश्वदेवकर्म कार्यम्। पर्यन्यादिबलयस्तूदपात्रं प्रतिष्ठाय तत्सन्निधौ देया इति परमार्थः।

तदयं प्रयोगः। समिद्धे पर्युक्षिते संपूजितेऽग्नौ तदभावेऽप्सु क्षितौ वा पाकादग्रमुद्धृत्य हविष्यान्नेन पाकाभावे फलमूलादिना वा प्रोक्षितेन साङ्गुष्ठमबहिर्जानु द्वादशपर्वपूरिकाः पञ्चाहुतीर्जुहुयात्। ओं ब्रह्मणे स्वाहा इदं ब्रह्मण इति त्यागोपि वा।

एवमग्रेपि—ओं प्रजापतये स्वाहा इतिमनसा, प्रजापतिं ध्यात्वा तूष्णीं होमेषु सर्वत्रेत्याश्वलायनवचनात्, ओं मृह्याभ्यः स्वाहाः, ओं कश्यपाय स्वाहा, ओं अनुमतये स्वाहा। ततो हुतशेषान्नेन साङ्गुष्ठमबहिर्जानु महाविड़ाल-श्वगप्रमाणबलिदानम्। तत्रोदपात्रसन्निधाने भूमौ ओंपर्ज्जन्याय नमः। ओं अद्भ्यो नमः, ओं पृथिव्यै नमः

ततः प्राग्निनाग्निशालायां निरग्निना तामालिख्य तस्याः पूर्वद्वारि दक्षिणभागे ओं धात्रे नमः। वामभागे—ओं विधात्रे नमः। पूर्वस्यां—ओं वायवे नमः। एवमेव दक्षिणस्यां, पश्चिमायामुत्तरस्याञ्च दद्यात्। ततः पूर्वस्यां ओं प्राच्यै दिशे नमः। ओं अप्राच्यै दिशे नमः। दक्षिणायै दिशे नमः। दक्षिणायै दिशे स्वाहेतिश्रुतिदर्शनादिति हरिहरः। पश्चिमायां—ओं प्रतीच्यै

दिशे नमः। उत्तरस्यां—ओं उदीच्यै दिशे नमः। ततो गृहमध्ये—ओं ब्रह्मणे नमः। ओं अन्तरिक्षाय नमः। ओं सूर्याय नमः इति यथापूर्वम्। तत एषामुत्तरत— ओं विश्वेभ्यो देवेभ्यो नमः ओं विश्वेभ्यो भूतेभ्यो नमः। ओं उषसे नमः। ओं भूतानां पतये नमः। इति एतच्चतुष्टयं यथोत्तरब्रह्मादित्रिकोत्तरं द्वयं तद्द्वयोत्तरं द्वयमिति वा। ततः प्राचीनावीती दक्षिणामुखः पातितवामजानुः पितृतीर्थेन ब्रह्मादिबले दक्षिणस्यां ओं पितृभ्यः स्वधा नम इति पितृबलिं दद्यात्।

ततो बलिशेषान्नलिप्तंपात्रं प्रक्षाल्य ब्रह्मादिबले वायव्यां, ओं यक्ष्मयै तत्त्वा निर्णेजनं नम इति बलिशेषान्नसहितजलमुपवीती दद्यात्। तदनन्तरं विष्णुपुराणे :—

ततोऽन्यदन्नमादाय भूमिभागे शुचौ पुनः।
दद्यादशेषभूतेभ्यः स्वेच्छया सुसमाहितः॥
देवा मनुष्याः पशवो वयांसि सिद्धाः सयक्षोरगदैत्यसंघाः।
प्रेताः पिशाचाः तरवः समस्ता ये चान्नमिच्छन्ति मयाप्रदत्तम्॥
पिपीलिकाकीटपतङ्गकाद्या बुभुक्षिताः कर्मनिबन्धबन्धाः।
प्रयान्तु ते तृप्तिमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु॥
येषां न माता न पिता न बन्धु र्नैवान्नसिद्धिर्न तथान्नमस्ति।
तत्तृप्तयेऽन्नं भुवि दत्तमेतत्तेषान्तु तृप्तिं मुदिता भवन्तु॥
भूतानि सर्वाणि तथान्नमेतदहञ्च विष्णुर्न यतोन्यदस्ति।
तस्मादहं भूतगणाय भूतमन्नं प्रयच्छामि भवाय तेषाम्॥
चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिल भूतसंघाः।
तृप्त्यर्थमन्नं हि मयाविसृष्टं तेषामिदं ते मुदिता भवन्तु॥

इत्युच्चार्य नरो दद्यादन्नं श्राद्धा समन्वितः ।
भुवि भूतोपकाराय गृही सर्वाश्रयो यतः ॥
श्वपाण्डालविहङ्गानां भुवि दद्यात्ततो नरः ॥

इदञ्च काम्यं, स्वेच्छयेति श्रवणात् सर्व शाखिसाधारणञ्च, सङ्कोचे मा॰ साभावात् । अत्र च दद्यादिति विद्धयनन्तरमित्युच्चार्य दद्यादिति गुणविधिना । पञ्चश्लोक पाठानन्तरं बलिदानस्य स्फुटमुपस्थापनात् इतिना चैकैकश्लोकस्य वा प्रत्यवमर्षे उच्चार्य दद्यादिति पदयोरावृत्तिकल्पने वाक्यभेदापत्तेः । न चैतत्पूर्वमेव दत्तं प्रयच्छामीत्यादिनिर्द्देशात् पूर्वमेव दानमिति वाच्यम्, इत्युच्चार्य दद्यादिति प्रधानवाक्यानुरोधेन अप्रधानस्य दत्तमित्यादिपदस्य तथाभिसन्धिपरत्वात्, पदार्थकल्पनायां वाक्यार्थानुरोधित्वात्, अन्यथा लक्षणाद्युच्छेदात् । तस्मात्पञ्चापि श्लोकान् पठित्वा एक एव बलि र्द्देयः । विधेयगतत्वेनैकत्वसंख्याया विवक्षितत्वादिति । एवमेव श्रीदत्ताह्निकादयोपि । अतएव पञ्चभिः श्लोकैरेक एव बलिर्देय इति प्रदीपोपि ।

मनुः— शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम् ।
वायसानां कृमीणाञ्च शनकैर्निःक्षिपेद् भुवि ॥

व्यासः— ऐन्द्रवारुणवायव्या याम्या वै नैर्ऋतास्तथा ।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम् ॥
श्वानौ द्वौ श्यावशबलौ भवस्वतकुलोद्भवौ ।
ताभ्यां पिण्डं प्रयच्छामि स्यातामेतावहिंसकौ ॥
दत्त्वानेन विधानेन बलिम्पश्चादुपस्पृशेत् ॥

तदयं क्रमः—यक्षमबल्यनन्तरं देवा मनुष्या इत्यादि पञ्चश्लोक्या पठितया एको बलिर्द्देयः । तत-ओं देवेभ्यो नमः । ओं चाण्डालेभ्यो नमः । ओं विहङ्गेभ्यो नमः । ओं पतितेभ्यो नमः । ओं श्वपद्भ्यो नमः । ओं

पापरोगिभ्यो नमः। ओं वायसेभ्यो नमः। ओं कृमिभ्यो नमः।

ततः ऐन्द्रेत्यादिश्लोकेनैकं, श्वानावित्यादिना चापरं बलिं दद्यात्। ततः सर्वान् बलीनुपस्पृशेत्। ततो बलीन् जलादौ क्षिपेत्। चाण्डालश्वपचोर्भेदो मनौ व्यक्तः। छन्दोगाह्निके तु देवा मनुष्या इत्यादि पञ्चश्लोकेन एक, ऐन्द्रवारुणेत्यादिनापरः, श्वानावित्यादिना च तृतीयो बलिः। तत आचमनं, ततः पतितचाण्डालपापरोगिकृमीणामुपकाराय भूमावन्नप्रक्षेप इति लिखितम्। श्वकाकबलयश्च तदुपयोगयोग्यस्थाने देया इति प्राञ्चः।

पितृबलिदानानन्तरं वशिष्ठः—

श्रोत्रियायाग्रं दत्त्वा ब्रह्मचारिणे चानन्तरं पितृभ्यो दद्यात्। इदानीमनयोरुपस्थितावेवम्। अनुपस्थितौ तु बल्यनन्तरमेव नित्यश्राद्धङ्कार्यम्। अत्र चाहुतयो देवयज्ञो, बलयो भूतयज्ञः। "श्राद्धं वा पितृयज्ञः स्यात् पित्र्यो बलिरथापि वा" इति कात्यायनवचनात्। श्रुतिपाठो ब्रह्मयज्ञः। आतिथ्यं सनकाद्यन्नं वा मनुष्ययज्ञः।

॥ अथ मनुष्ययज्ञः ॥

तत्र यक्ष्मबल्यनन्तरं पारस्करः—

"उद्धृताग्रं ब्राह्मणायावनेज्य दद्याद्धन्तत" इति। अवनेज्य प्रोक्ष्य। इदन्तु यक्ष्मबल्यनन्तरं श्रुतमपि काम्यबलिदानानन्तरं देयम्। नैकस्मिन् कर्मणि तत्तो कर्माण्यन्तराय ते यत्र इतिछन्दोगपरिशिष्टात्, पञ्चानामपि यज्ञानां भेदात्, इदानीमपि यद्देवतकरणं तच्छ्राद्धानधिकारिवैश्वदेवाधिकारिविषयम्। श्राद्धाधिकारिणा तु श्राद्धानन्तरं मनुष्ययज्ञः कार्यः। पितृभ्यो मनुष्येभ्य इत्येतद्वचनात्, हन्तकारस्त्वतिथेरनावश्यकतया ब्राह्मणायान्तरापि प्रदेयः।

बौधायनः—अहरहः ब्राह्मणेभ्योन्न दद्यात्। आमूलफलशाकेभ्योथैनं मनुष्ययज्ञं समाप्नोतीति।

शातातपः—

भिक्षां वा पुष्कलं वापि हन्तकारमथापि वा ।
असम्भवे सदा दद्यादुदपात्रमथापि वा ॥

मार्कण्डेपुराणे—

"ग्रासप्रमाणा भिक्षा स्यादग्रं ग्रासचतुष्टयम् ।
अग्रं चतुर्गुणं प्राहु र्हन्तकारं द्विजोत्तमाः ॥
भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्त्वा तु न भोक्तव्यं यथाविभवमात्मनः ।

अग्रं— पुष्कलसंज्ञकमपि । एवञ्च कुशत्रयतिलजलैरिदमन्नं मनुष्या हन्तत इति प्राजापत्यतीर्थेन भोजनं हन्तकारमग्रं भिक्षां वा यथाविभवं दद्यात् ।

अथ यतिने, ब्रह्मचारिणे चान्नार्थमुपतिष्ठते स्वस्तीति वाचयित्वा उदकपूर्वाग्निरामिषयथासम्भवव्यञ्जनसहितं ग्रासमात्रमपि भिक्षान्दद्यात् ।

दद्याच्च भिक्षात्रितयं परिव्राड् ब्रह्मचारिणाम् ।
स्वेच्छया च बुधो दद्याद्विभवे सत्यवारितम् ॥

इति विष्णुपुराणात् । स्वस्तिवाच्य च भिक्षादानमिति गौतमवचनात् ।

यमः—

सत्कृत्य भिक्षवे भिक्षां यः प्रयच्छति मानवः ।
गोप्रदानसमं पुण्यं तस्याह भगवान् यमः ॥

पात्रपूरणे तु फलाधिक्यम् ।

यः पात्रपूरणीं भिक्षां यतिभ्यः संप्रयच्छति ।
विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयात् ॥

इति पद्मपुराणवचनात्। पठन्ति च—

यतिहस्ते जलन्दद्याद्भैक्षं दद्यात्पुनर्ज्जलम्।
तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम्॥

इदञ्च भिक्षादानमन्ने सिद्धे, यदैव यति-ब्रह्मचारिणोरुपस्थितिस्तदैव कर्त्तव्यम्। न तत्र कालनियमः। वैश्वदेवात्प्राक् तयोरुपस्थितौ वैश्वदेवार्थमग्रभागमुद्धृत्य भागान्तरेण भिक्षान्दद्यादिति विशेषः।

अकृते वैश्वदेवे तु भिक्षौ च गृहमागते।
उद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्ज्जयेत्॥

इति नरसिंहपुराणात्। पाखण्डानामपि दयावर्गाद्भिक्षा देया। तथा च— पाखण्डानुपक्रम्य ब्रह्मपुराणे— "तेभ्यो देयं गृहाद्बहिः"। विष्णुः— "भिक्षुकाभावे चाग्रं गोभ्यो दद्यादग्नौ वा क्षिपेत्। भुक्तेऽप्यन्ने विद्यमाने भिक्षुकं न प्रत्याचक्षीत"।

यमः— हस्तदत्ता तु या भिक्षा व्यञ्जनं सलिलानि च।
भोक्ता त्वशुचितां याति दाता स्वर्गञ्च गच्छति॥

देवलः— सायं प्रातर्गृहद्वारं भिक्षार्थं मावघट्टयेत्॥

अवघट्टयेत्— अवरुन्ध्यात्। शूद्र इत्यनुवृत्तौ याज्ञवल्क्यः—

भार्यारतिशुचि र्भृत्यभर्त्ता श्राद्धक्रियापरः।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्॥

भार्यारतिः— स्वभार्यामात्ररतः। श्राद्धक्रिया— श्राद्धकरणं, तत्परः, अयञ्च नमो मन्त्रेण चतुर्थ्यन्तदेवतानामान्वितेन वैश्वदेवादिकं कुर्यात्। तथा च स्वाहास्वाधास्थानेष्वनेन नमस्कार एव प्रयोज्य इति।

॥ अथ नित्यश्राद्धम् ॥

तत्र मनुः—

दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन् ॥

भविष्ये— नित्यश्राद्धमदैवं स्यादक्षिणा पिण्डवर्ज्जितम् ।

दक्षिणापिण्डाभ्यां वर्ज्जितमित्यर्थः । न तु दक्षिणा दातव्येति विभिद्याम्वयोऽध्याहारापत्तेः । पिण्डनिषेधादेवावाहनाग्नौ करणादिनिवृत्तिरपि ।

काशीखण्डे—नित्यश्राद्धमदैवं स्यादर्घपिण्डविवर्ज्जितम् ।
दक्षिणारहितं त्वेतद्दातृभोक्तृव्रतोज्झितम् ॥

श्राद्धपल्लवे— नित्यश्राद्धं कृत्वा नित्यदेवपूजादि न कार्यम् । श्राद्धान्तानि कर्माणीति वचनात् । एवं काम्यं कार्यमेवेति ।

मत्स्यपुराणे — नित्यं तावत्प्रवक्ष्यामि अर्घावाहनवर्ज्जितम् ॥
लघुहारीतः— नित्यश्राद्धमदैवं स्यादर्घपिण्डविवर्ज्जितम् ॥

छन्दोगपरिपरिशिष्टम्—

अप्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये ।
अप्युद्धृत्य यथाशक्ति किञ्चिदन्नं यथाविधि ॥
पितृभ्योथ मनुष्येभ्यो दद्यादहरहर्द्विजः ॥

अत्र - षड्ब्राह्मणतर्पकान्नदानं मुख्यः कल्पः । एकब्राह्मणतर्पकान्नदानन्तु मध्यमः । किञ्चिदन्नदानन्तु कनिष्ठः । अत्र च मिलितदेवतात्वशङ्काऽन्यत्रैव विस्तरेण निषिद्धेति । अत्र च—एकसङ्कल्पजपासनतिलक्षेपान्नोत्सर्गजपा आवश्यकाः । पुष्पचन्दनादिदानं काम्यम् ।

इतरत्तु नास्त्येव, प्रयोगः स्पष्ट एव। महाभारते—

ग्रासमुष्टिं परगवे सान्नं दद्यात्तु यः सदा।
अकृत्वा स्वयमाहारं स्वर्गलोकं स गच्छति॥

दानमन्त्रस्तु—

"सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः।
प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः॥
दद्यादनेन मन्त्रेण गवां ग्रासं सदैव हि॥

अत्र च 'सदा' श्रवणात् फलश्रवणाच्च नित्यकाम्यमिति छन्दोगाह्निकादयः, अन्ये तु विधिरेवायं न तु कालविधिरपि, वाक्यभेदापत्तेः। सदेति तु—अर्थवादमात्रमित्याहुः।

नन्दिपुराणे -

यो गवां रुद्रदत्तानां किञ्चिद्दद्याद् गवाह्निकम्।
स गच्छेद्रुद्रभवनं कुलद्वयसमन्वितः॥

तथा— योऽन्यासामपि गवां दद्यान्मर्त्यो गवाह्निकम्।
सोऽपि गच्छेन्नरः स्वर्गं दिव्यमेव न संशयः॥

अन्यासां रुद्रदत्तातिरिक्तानां, आह्निकं दिवसाहारम्।

भविष्ये— तृणोदकेन संयुक्तं यः प्रदद्याद् गवाह्निकम्।
कपिलाशतदानस्य फलं विन्द्यान्न संशयः॥

दानमन्त्रोऽपि तत्रैव -

पञ्चभूते शिवे पुण्ये पवित्रे सूर्यसम्भवे।
प्रतीच्छेमं मया दत्तं सौरभेयि नमोस्तु ते॥

इतिबलिदानानन्तरं विष्णुपुराणे—

ततो गोदोहमात्रन्तु कालं तिष्ठेद् गृहाङ्गणे ।
अतिथिग्रहणार्थाय तदूर्द्ध्वं वा यथेच्छया ।
अतिथिन्तत्र सम्प्राप्तं पूजयेत्स्वागतादिना ।
हिरण्यगर्भबुद्ध्या तं मन्येताभ्यागतं गृही ॥

पूजयेत् श्रेयांसं श्रेयांसमानुपूर्वेण । एवञ्च वैश्वदेवातुरं संप्राप्तोऽतिथिः, तेनाधिक्यार्थं तदैव पूज्यः । अन्यदोपस्थितस्तु नित्यश्राद्धानन्तरमित्यविरोधः ।

॥ अथातिथिपूजा ॥

तत्र मनुः—

संप्राप्ताय त्वतिथये प्रदद्यादासनोदके ।
अन्नञ्चैव यथाशक्ति सत्कृत्य विधिपूर्वकम् ॥
अग्निं हुत्वा विधानेन यत्पुण्यफलमाप्यते ।
तेन तुभ्यं विशिष्टं च ब्राह्मणे तर्पिते फलम् ॥
शिलानप्युञ्छतो नित्यं पञ्चाग्नीन् अपि जुह्वतः ।
सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो वसन् ॥
तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥

शिलाम्—लूनशस्यशेषान्, क्षेत्रपतितान् उञ्छतः उच्छिन्वतः । तेन दरिद्रेणाप्यतिथिपूजो कार्येत्युक्तम् । सूनृता प्रियसत्या । विष्णुपुराणे—

धाता प्रजापतिः शक्रो वह्नि र्वसुगणोर्यमा ।
प्रविश्यातिथिमेवैते भुञ्जतेथ नरेश्वर ॥

तस्मादतिथिपूजायां यतेत सततं नरः ।
स केवलमघं भुंक्ते यो भुंक्ते त्वतिथिं विना ॥

शातातपः—

प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा ।
वैश्वदेवे तु सम्प्राप्ते सोतिथिः स्वर्गसंक्रमः ॥

विष्णुः—स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा ।
नैवाप्नोति गृही लोकान् यथात्वतिथिपूजनात् ॥

यमः— न पृच्छेद्गोत्रचरणं देशन्नाम कुलं श्रुतम् ।
अध्वनोभ्यागतं विप्रं भोजनार्थमुपस्थितम् ॥
देशन्नाम कुलं विद्यां पृष्ट्वा योन्नं प्रयच्छति ।
न स तत्फलमाप्नोति दत्त्वा स्वर्गं न गच्छति ॥
अतिथिं पूजयेद्यस्तु श्रान्तं चाहष्टपूर्वकम् ।
स वृषं गोशतं तेन दत्तं स्यादिति मे मति ॥
देशं नाम कुलं विद्यामन्नार्थं यो निवेदयेत् ।
वैवस्वतेषु धर्मेषु वान्ताशी स निरुच्यते ॥

बृहस्पतिः—

आगतस्यासनं दद्यात् श्रान्तस्य शयनन्तथा ।
तृषितस्य तु पानीयं क्षुधितस्य च भोजनम् ॥
चक्षुर्द्द्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ।
एवं साधारणो धर्मश्चातुर्वर्ण्योऽब्रवीन्मनुः ॥
प्रीयते स्वागतेनाग्निरासनेन शतक्रतुः ।
पितरः पादशौचेन भोजनेन प्रजापतिः ॥

विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी ।
तावत्पुष्करपत्रेण पिबन्ति पितरो जलम् ॥

विष्णुः—

प्रतिश्रयं तथा शय्यां पादाभ्यङ्गं सदीपकम् ।
प्रत्येकदानेनाप्नोति गोप्रदानसमं फलम् ॥

प्रतिश्रयो— वासगृहम् ।

शंखः—"वयोवर्णविद्यातपःसम्पन्नाय पाद्यमर्घ्यमनौयमन्नविशेषांश्च तस्मै शक्तितो दद्यात्, सहासीत प्रदोषेऽनुज्ञाप्य शयीत । पूर्वं प्रतिबुद्धयेत प्रस्थितमनुव्रजेत । समेत्याग्रतो निवर्त्तेत । वैद्यादीनामाराम-लता-प्रपातड़ाग-देवगृह-महाद्रुम-नदीनामन्यतमस्मिन् प्रदक्षिणं कुर्यात, वाचमुत्सृज्य पुनर्दर्शनायेति" ।

यमः—

येषामनश्नन्नतिथि र्विप्राणां प्रव्रजेद्गृहात् ।
ते वै खरत्वमुष्ट्रत्वमश्वत्वमुदपेदिरे ॥
यस्य चैवं वसेद्विप्रो गृहे कश्चिदभोजितः ।
न तस्य देवाः पितरो हव्यं कव्यञ्च भुञ्जते ॥
अतिथि र्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते ।
सुकृतं तस्य यत्किञ्चित्सर्वमादाय गच्छति ॥
अतिथि र्यस्य वै ग्रासं भिक्षमाणः प्रयत्नतः ।
शेते निरशनस्तत्र ब्रह्महत्या विधीयते ॥
अपि शाकं पचानस्य शिलोञ्छेनापि जीवतः ।
स्वदेशे वा विदेशे वा नातिथि र्विमना भवेत् ॥

अग्नयोतिथिमिच्छन्ति सोतिथिः स्वर्गमिच्छति ।
स्वर्गोपीच्छति दातारं सम्यग्धर्मस्य कारिणम् ॥

पराशरः—

अतिथि र्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते ।
न तस्य पितरोश्नन्ति दशवर्षाणि पञ्च च ॥

विष्णुपुराणे—

दिवातिथौ तु विमुखे गते यत्पातकं नृणाम् ।
तदेवाष्टगुणं पुंसां सूर्योढ़े विमुखे गते ॥

सूर्योढ़ः—सायं समयः । याज्ञवल्क्यः—

अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः ।
मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः ॥

अध्वनीनः—सततमध्वगामी । श्रोत्रिय एकशाखाध्यायी । एकां शाखामधीत्य श्रोत्रियो भवतीति बौधायनवचनात् । मनुः—

एकरात्रन्तु निवसन्नतिथि र्ब्राह्मणो भवेत् ।
अनित्ये हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥

अधिकदिनवासे च फलाधिक्यमाह – आपस्तम्बः—

"एकां रात्रिञ्चेदतिथि वासयेद्भूमाँल्लोकान् जयति । द्वितीयामान्तरिक्षान्, तृतीयां दिव्यान् चतुर्थो परतो लोकान् अपरिमिताभिरपरिमितान् जयतीति विज्ञायते" ।

देवलः— अघृतं भोजयेद्यस्तु स्वगृहे सति सर्पिषि ।
परत्र निरयं घोरं गृहस्थः प्रतिपद्यते ॥

मिष्टमन्नं स्वयं भुक्त्वा पश्चात्कदशनं लघु ।
ब्राह्मणां भोजयेन्मूर्खो निरये चिरमाविशेत् ॥

मनुः— न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् ।
धन्यं यशस्यमायुष्यं स्वर्ग्यञ्चातिथिभोजनम् ॥

दक्षः— आश्रमे तु यति यस्य विश्राम्यति मुहूर्त्तकम् ।
किन्तस्यान्येन धर्मेण कृतकृत्यो हि स स्मृतः ॥
जन्मप्रभृति यत्पापं गृहस्थेन कृतं बहु ।
निर्मार्ज्जयति तत्सर्वमेकरात्रोषितो यतिः ॥

भ्रष्टाचारश्च भिक्षुर्न वासयितव्य इत्यत्र दक्षः—

वसन्नावसथे भिक्षुः मैथुनं यदि सेवते ।
तस्यावसथनाथस्य मूलान्यपि निकृन्तति ॥

मनुः— ब्राह्मणस्य त्वनतिथि गृहे राजन्य उच्यते ।
वैश्य-शूद्रौ सखा चैव ज्ञातयो गुरुरेव च ॥
यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् ।
भक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् ॥
वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथि धर्मिणौ ।
भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रयोजयन् ॥
इतरानपि सर्वादीन् संभृत्या गृहमागतान् ॥

कुटुम्बे गृहे ब्राह्मणस्यायातौ वैश्यशूद्रौ करुणया भोजयितव्यौ इत्यर्थः । यत्र भार्या विद्यते, यत्राग्नयो वा । तत्र य उपस्थितिः । तेन तस्यापि पूजना॰ पूजकयोः पुण्यपापोदय इत्याह मनुः –

नैकग्रामीणमतिथिं विप्रं सोङ्गतिकन्तथा ।
उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोपि वा ॥

दक्षः— देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते ।
गृहस्थः प्रत्यहं यस्मात्तस्माज्ज्येष्ठाश्रमो गृही ॥
अस्नात्वा चाप्यहुत्वा च अदत्त्वा ये च भुञ्जते ।
देवादीनामृणी भूत्वा निरयन्ते व्रजन्त्यधः ॥

यमः— "अकृत्वा वैश्वदेवन्तु भुञ्जते ये द्विजोत्तमः ।
वृथा तेनान्नपाकेन काकयोनिं व्रजन्ति ते ॥

पञ्चयज्ञानाञ्चाशक्तौ स्नात्वा तर्पणब्रह्मयज्ञमात्रमपि कर्त्तव्यम् । तथाहि गोतमो-देव-पितृ-मनुष्य-भूतर्षिपूजक इति पञ्चयज्ञानुक्त्वा पुनराह—नित्यं-स्वाध्यायः पितृभ्यश्चोदकदानं यथोत्साहमन्यदिति । याज्ञवल्क्यः—

भोजयेत्त्वागतान् काले सखिसम्बन्धिबान्धवान् ।
अहः शेषं सहासीत शिष्टैरिष्टैश्च बन्धुभिः ॥
बालः सुवासिनी वृद्धगर्भिण्यातुरकन्यकाः ।
संभोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम् ॥

सुवासिनी—ऊढ़ा पितृगृहस्था । अत्र यद्बालादेः पूर्वभोजनं तदसामर्थ्ये । तत्सामर्थ्ये त्वतिथिभोजनमेव । तदाह—बोधायनः—

भोजयेदतिथीन् पूर्वमन्तर्वत्नीरनन्तरम् ।
बालान् वृद्धांस्तथा दीनान् व्यथितांश्च विशेषतः ॥

॥ अथ भोजनम् ॥

तत्र दक्षः—

संविभागन्ततः कृत्वा गृहस्थः शेषभुग्भवेत् ॥

संविभागो—देवपित्रादिभ्यो विभज्य दानम् ।

तदाह मनुः—

देवानृषीन्मनुष्यांश्च पितॄन् गृह्याश्च देवताः ।
पूजयित्वा ततः पश्चाद् गृहस्थः शेषभुग्भवेत् ॥

देवलः—

प्राङ्मुखोन्नानि भुञ्जीत शुचिः पीठमवस्थितः ॥

बौधायनः— "प्रक्षालितपाणिपादोष आचम्य शुचौ संवृते देशेऽन्नमुपहृतमुपसंगृह्य कामक्रोधलोभमोहानपहृत्य सर्वाङ्गुलीभिः शब्दमकुर्वन् प्राश्नीयान्न पिण्डशेषं पात्र्यामुत्सृजेत । मांस-मत्स्य-तिल-मधु-संसृष्टं प्राश्याप उपस्पृश्याग्निमुपस्पृशेत्" । उपहृतमुपनीतम् । उपसंगृह्य—आदरेण स्वीकृत्य । शब्दं—सीत्कारादिकम् । पिण्डशेषं—कवलशेषम् । मध्वादिभक्षणानन्तरं आचान्तस्याप्यग्निस्पर्शः शुद्ध्यर्थमेव । ब्रह्मपुराणे—

आसनस्थस्तु यो दर्पात्पंक्तिमध्य उपस्पृशेत् ।
विशेद्भोजनभूमिञ्च अप्रक्षालितपाणिमान् ॥
स सर्वेषान्तु यत्पापं तद्गृह्णाति नराधमः ।
तस्माद्बहिरुपस्पृश्य आचान्तः प्रविशेद् गृहम् ॥

तथा— अन्नं दृष्ट्वा प्रणम्यादौ प्राञ्जलिः प्रार्थयेत्ततः ।
अस्माकं नित्यमस्त्वेतदिति भक्त्या च वन्दयेत् ॥

तथा— पात्रेष्वन्नानुरूपेषु पुत्रभृत्यानुजैः सह ।
भूम्यां पात्रं प्रतिष्ठाप्य मौनेनान्नं तु भक्षयेत् ॥
पवित्रपाणिः पुण्यं च लभेतात्राघमर्षणम् ॥

कुशपत्रद्वयपाणे मौनिना भोजनेनाघमर्षणजन्यपुण्यं भवतीत्यर्थः । तथा च अश्वमौनश्चावश्यकं "स्नातस्य वरुणस्तेजो जुह्वतोऽग्निः श्रियं हरेत् । भुञ्जानस्य यमस्तस्माद्व्याहरेत्त्रिष्विति" ॥ बदकरणेऽनिष्टश्रवणात् ।

मनुः –

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥

इच्छन्निति शेषः । ऋतं सत्यम् । दक्षिणामुखभोजनं प्रमीतमातृकविषयम् । दक्षिणामुखो भुञ्जीतानायुष्यं त्वेवं मुखस्य भोजनं मातुरित्युपविशन्ति इत्यापस्तम्बवचनात् । न च प्रतीचीमभिभोजनीयमिति वायुपुराणीयो निषेधः निष्कामविषयः, मनुना तु—अकामस्य तद्विधानात् ।

यमः —

प्राङ्मुखोऽन्नानि भुञ्जीत पश्चार्द्रो वाग्यतः शुचिः ।
आर्द्रपादस्तु भुञ्जानश्शतं वर्षाणि जीवति ॥

पश्चार्द्रश्चरणयोः करयोर्मुखे चार्द्रः, पुनरार्द्रपादोपादानं फलार्थम् । तथा—

अप्येकपङ्क्त्या नाश्नीयात् संवृतः स्वजनैरपि ।
को हि जानाति किं कस्य प्रच्छन्नं पातकं महत् ॥
भस्म-स्तम्भजलद्वारमार्गैः पङ्क्तिश्च भेदयेत् ॥

ब्रह्मपुराणे—चतुरस्रं त्रिकोणञ्च वर्त्तुलञ्चार्द्धचन्द्रकम् ।
कर्त्तव्यमानुपूर्व्येण ब्राह्मणादिषु मण्डलम् ॥
ब्रह्मरुद्रेन्द्रचन्द्रार्कर्वसवो मण्डलान्तराद् ।
निवेदितं नरैरन्नं यस्माद् हृष्यन्ति नान्यथा ॥

एवञ्च ब्रह्मादिबल्यनुरोधेनापि मण्डलमावश्यकम् ।

शङ्खः— चतुष्कोणं द्विजाग्रस्य त्रिकोणं क्षत्रियस्य च ।
मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम् ॥

अत्र तु विकल्पः विष्णुपुराणे-"प्रशस्तरत्नपाणिः भुञ्जीत प्रयतो गृही"। प्रशस्तं—गारुड्यादिः। वशिष्ठः- प्राङ्मुखोन्नानि भुञ्जीत तूष्णीं साङ्गुष्ठं कृत्स्नं ग्रासं ग्रसेन्न मुखशब्दं कुर्यात्। अन्नानीत्यभिधानान्न ताम्बूलादौ दिङ्नियमः। साङ्गुष्ठं, तेन सर्वाङ्गुलीभिरित्यर्थः। कृत्स्नं, न तु कवलार्द्धं भुक्त्वा कवलार्द्धं त्यजेदित्यर्थः। मनुः—

पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन्।
दृष्ट्वा हृष्येत् प्रसीदेच्च प्रणमेच्चैव सर्वदा॥

ब्रह्मपुराणेः—

वामेन पाणिना पात्रं गृहीत्वा भुवि संस्थितम्।
तेजोसीति जपन्नन्नं प्रणमेदमृतञ्च तत्॥

विष्णुपुराणे—'अन्नं प्रशस्तं पथ्यञ्च प्रोक्षितं प्रोक्षणोदकैः"। भुञ्जीतेति शेषः। वृद्धशातातपः—

परिधानमपोशानं पूर्वमाच्छादनं परम्।
भवत्यन्नमनग्नं हि सोत्तरीयं तथामृतम्॥

पूर्वमपोशानं परिधानं, तेनान्नमनग्नं, परमपोशानमाच्छादनं, तेन सोत्तरीयम्, उभाभ्याममृतं भवतीत्यर्थः। ब्रह्मपुराणे—

"अपोशानञ्च गृह्णीयात्सर्वतीर्थमयञ्च तत्।
अमृतोपस्तरणमसीति विष्णोरन्नमयस्य च"॥
"अथोपस्तरणार्थन्तु प्राश्य तोयामृतं सकृत्।
अमृतोपस्तरणमसि स्वाहेत्यन्तेन तत्त्ववित्"॥

इतिसंन्यासपद्धतिलिखितं वचनं प्रमाणयन्तः स्वाहाकारमन्ते कुर्वन्ति।

हस्तेन लङ्घयेन्नान्नं सोदकेन कदाचन ।
दम्भाद् यो लङ्घयेद् भुञ्जँस्तेनान्नं निहितं भवेत् ।
हतश्चान्नमभक्ष्यत्वं तस्य याति दुरात्मनः ॥

तथा— "प्राणेभ्यस्त्वथ पञ्चभ्यः स्वाहाप्रणवसंयुताः ।
पञ्चाहुतिस्तु जुहुयात् प्रलयाग्निनिमेषु च ॥

प्राणेभ्यः—प्राणादिभ्यः । तदुक्तन्तत्रैव—

प्राणे तृप्ते तु तृप्यन्ते नित्यं भूतार्कचक्षुषः ।
व्याने तृप्ते तु तृप्यन्ते श्रोत्रेन्दुककुभस्तथा ॥
अपाने तृप्ते तृप्यन्ते वह्निवाग्भूतपस्तथा ।
समाने तृप्ते तृप्यन्ते मनःपर्ज्जन्य-विद्युतः ॥
उदाने तृप्ते तृप्यन्ते वाय्वाकाशौ च सर्वदा ।
तृप्तेष्वेतेषु तृप्तं स्याज्जगत्सदसदात्मकम् ॥

अत्र—प्राणापानव्यानोदानसमानक्रमेणाहुतयः कार्याः । प्राणाय स्वाहाऽपानाय स्वाहा, व्यानाय स्वाहा, उदानाय स्वाहा, समनायंस्वाहा, इति पञ्चान्नेन पञ्चाहुती र्हुत्वा तूष्णीम्भूयो वर्त्तयेदिति बौधायन वचनात् ।

विष्णुपुराणे—

पञ्चग्रासान्महामौनं प्राणोद्व्याप्यायनाय तु ॥

महामौनमिति सर्वथा ध्वनिनिवृत्तित्वम् । आहुतयश्च न दन्तेनाच्छाद्याः, "ताः नमस्य निगिरेदिति" हारीतवचनात् ।

विष्णुपुराणे—

अश्नीयात्तन्मना भूत्वा पूर्वन्तु मधुरं रसम् ।
लवणाम्लौ तथा मध्ये कटुतिक्तादिकास्ततः ॥

प्राग्द्रवं पुरुषोऽश्नन्वै मध्ये च कठिनाशनः ।
अन्ते पुन र्द्रवाशी च बलारोग्ये न मुञ्चति ॥

मधुरं—घृतादिः । मनुः—

सायं प्रात र्मनुष्याणामशनन्देवनिर्मितम् ।
नान्तरा भोजनं कुर्यादग्निहोत्रसमो विधिः ॥

अग्निहोत्रेत्याहि तु स्तुतिः । न त्वत एव काम्यता । न तृतीयमथाश्नीयादिति मनुनैव अशनान्तरनिषेधात् । अन्तरा भोजननिषेधोयं फलमूलादन्यत्र तथाप्यापस्तम्बः— "दिवा च न भुञ्जीतान्यत्र फलमूलेभ्यः" । चकारः पुनरर्थे ।

छन्दोगपरिशिष्टे – "मुनिभिर्द्विरशनमुक्तं विप्राणां मर्त्यवासिनां सततम् ।
अहनि च तथा तमस्विन्यां सार्द्धं प्रहरयामान्तश्च" ॥
रात्रौ प्रथमसार्द्धं प्रहरयामाभ्यन्तरे द्वितीयमशनमित्यर्थः ।

मनुः— "न भिन्नभाण्डे भुञ्जीत, न भावदूषिते ।" हारीतः— "न कार्ष्णायसे, न मृत्पात्रे, न भिन्नावकीर्णे ।" कार्ष्णायसे—लौहपात्रे । भिन्ने—स्फुटिते । अवकार्णे—शूद्रभोजनादिनाऽपवित्रीकृते । वैठीनसिः—"ताम्र-रजत-सुवर्ण-मुक्ताश्म-स्फटिकानां न" भिन्नदोष इति शेषः । विष्णुपुराणे— "नासन्दीसंस्थिते ।" आसन्दी—मञ्चिका ।

विष्णुः— नाश्नीयादजीर्णे, नार्द्धरात्रे, न मध्याह्ने, न सन्ध्ययो, र्न्नार्द्रवासा नैकवासा, न नग्नो, नोत्कटको, न भिन्नासनगतो, न भिन्नभाजने, नोत्सङ्गे, न भुवि, न पाणौ । पाणिना लवणं यद्द्यान्न तदश्नीयान्न बालं निर्भर्त्सयन्नेको मिष्टं, नोद्धृतस्नेहं, न दिवा भाना, न रात्रौ तिलसम्बन्धं, न दधिसक्तून्, कोविदार-वट-पिप्पल-शशशाकं नादत्वा, नाहुत्वा, नानार्द्रकरमुखोच्छिष्टो घृतमादद्यात् । न चन्द्रार्कतारका निरीक्षेत, न मूर्द्धानं स्पृशेन्न

ब्रह्म कीर्त्तयेत्। उत्कटत्व उत्कटासनः। दधिसक्तूनित्यत्रापि रात्रावित्यन्वयः। वशिष्ठः—

"भार्यया सह नाश्नीयादवीर्यवदपत्या भवतीति"।

अङ्गिराः— ब्राह्मण्या सह योश्नीयादुच्छिष्टं वा कदाचन।
न तस्य दोषं मन्यन्ते नित्यमेव मनीषिणः॥
उच्छिष्टमितरस्त्रीणां योश्नीयाद् ब्राह्मणः क्वचित्।
प्रायश्चित्ती स विज्ञेयः सङ्कीर्णो मूढचेतनः॥

ब्राह्मणीह पतिसवर्णा इतरा पत्यसवर्णा। तथा च कदाचित्सवर्णायाः पत्न्याः सह भोजने च न दोषः।

ब्रह्मपुराणे—

"ब्राह्मण्या भार्यया सार्द्धं क्वचिद् भुञ्जीत चाध्वनि।
असवर्णास्त्रिया सार्द्धं भुक्त्वा पतति तत्क्षणात्॥

ब्राह्मणीपदं—सवर्णोपलक्षणम्। अग्रे—असवर्णेत्यभिधानात्।

मनुः— न भार्यादर्शनेऽश्नीयान्नैनामीक्षेत चाध्वनि॥

देवलः—न भुञ्जीतावृतन्नित्यं गृहस्थो भोजनद्वयम्।
पवित्रमथ हृद्यञ्च सर्पिराहुरघापहम्॥

ब्रह्मपुराणे—यस्तु पाणितले भुंक्ते यस्तु फूत्कार संयुतम्।
प्रसृताङ्गुलिभिर्यस्तु तस्य गोमांसवच्च तत्॥

पुलस्त्यः—करेण तु पिबेत्तोयं यावन्मांसं न भक्षयेत्।
मांसलिप्तकरेतोयं तुल्यं गोमांसभक्षणम्॥

दक्षः— वामहस्तस्थिते दर्भे दक्षिणेनोदकं पिबेत्।
रक्तपानं भवेत्तस्य पीत्वा चान्द्रायणञ्चरेत्॥

ब्रह्मपुराणे—नाजीर्णे भोजनं कुर्यात् स्याच्च नातिबुभुक्षितः ।
हस्त्यश्वरथयानोष्ट्रप्रसादस्थो न भक्षयेत् ॥
न श्मशानान्तरगतो देवालयगतोपि वा ।
शयनस्थो न भुञ्जीत न पाणिस्थं न चासने ॥
सन्ध्ययोर्न्न च मध्याह्ने नाद्धरात्रे कदाचन ।
नार्द्रवासा नार्द्रशिरा न चायज्ञोपवीतवान् ॥
न प्रसारितपादस्तु पादारोपितपाणिमान् ।
नावसाक्तिकसंस्थश्च न च पर्यङ्किकास्थितः ॥
न वेष्टितशिराश्चापि नोत्सङ्गकृतभाजनः ।
नैकवस्त्रो दुष्टमध्ये सोपानत्कः सपादुकः ॥
न चर्मोपरि संस्थश्च चर्मवेष्टितपार्श्ववान् ।
अन्नस्य जन्मकालुष्यं दुष्पक्तिञ्च न कुत्सयेत् ॥
ग्रासशेषन्तु नाश्नीयात् पीतशेषं पिबेन्न तु ।
शाकमूलफलेक्षवादि दन्तच्छेदैर्न्न भक्षयेत् ॥
सञ्चयेन्नाञ्जमन्नेन विक्षिप्तं पात्रसंस्थितम् ।
बहूनां भुञ्जतां मध्ये न चाश्नीयात्परान्वितः ॥
वृथा न विकिरेदन्नं नोच्छिष्टः कुत्रचिद् व्रजेत् ।
न स्पृशेत्तु शिरोविप्रः सोच्छिष्टेनैव पाणिना ॥
तिलकल्कं जलं क्षीरं दधिक्षौद्रघृतानि च ।
न त्यजेदर्द्धजग्धानि सक्तूंश्चैव कदाचन ॥

प्रसृताङ्गुलिभिः— विस्तृताङ्गुलिभिः । यानं—नौकादि । चर्मवेष्टितपार्श्ववान्—सन्नाहादिवेष्टितगात्रः, जन्म—निन्दितदेशोत्पत्तिः । कालु-

ष्यं - मलसम्बन्धः। दुष्पक्ति— दुष्टपाकः। दन्तच्छेदो- बहिर्दन्तच्छेदः। मुखाभ्यन्तरे तद्विधानात्। मार्कण्डेयपुराणे— उपघातादृते दोषं नान्नस्योदीरयेद्बुधः॥ उपघातः—अशौचम्। विष्णुः—

"न निःशेषभुक् स्यादन्यत्र दधिमधुसर्पिःपयःशाकेभ्यः"। लघुहारीतः—

पयः पानं पुनर्द्दानं मांसेन पयसा निशि।
दन्तच्छेदनमुष्णञ्च सप्त सक्तुषु वर्ज्जयेत्॥

मांसेन पयसा वा सहाशनमित्यर्थः। यमः—

आश्नाति यो भृत्यजनस्य मध्ये मिष्टान्नमेको रसगन्धगृध्नुः।
दीनैः कटाक्षैरभिवीक्ष्यमाणो व्यक्तं विषं हालहलं स भुंक्ते॥

विष्णु— "न गोब्राह्मणोपबोधेऽश्नीयान्नराज्यव्यसने"।

मनुः— न भुञ्जीत ऋतस्नेहं नातिसौहित्यमाचरेत्।
नातिप्रगे नातिसायं न साय प्रातराशितः॥

उद्धृतस्नेह - खल्यादि। प्रागे—प्रातःकाले। तथा—

नाहारमुपभुञ्जीत तिष्ठन् गच्छन् हसन्नपि।
सुग्रामतो ग्रामतो वा सन्निकृष्टे मृते सति॥

ग्रामत इति सप्तमी। बृहस्पतिः—

न स्पृशेद्वामहस्तेन भुञ्जानोन्नं कदाचन।
न पादौ न शिरोवस्थि न पदा भाजनं स्पृशेत्॥

वस्तिर्नाभ्यधोदेशः, शिरोवस्तीति समाहारः।

ब्रह्मपुराणे—"कुर्यात् क्षीरान्तमाहारं न च पश्चात्पिबेदधि"॥

अधि—अधिकम्। तेन क्षीरमाहारान्त एव पेयम्। किन्त्वल्पमित्यर्थः।

जठरं पूरयेदर्द्धमन्नैर्भागं जलेन च ।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥
विद्यमानेन हस्तेन ब्राह्मणो ज्ञानदुर्बलः ।
तोयं पिबति वक्त्रेण श्वासौ जायेत नान्यथा ॥

वक्त्रेणेति हस्तेनानुताल्येत्यर्थः । तथा –

उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः ।
सुरापानेन तत्तुल्यं मनुराह प्रजापतिः ॥

बौधायनः—भुञ्जानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत् ।
भोजने विघ्नकर्तासौ ब्रह्महा च तथोच्यते ॥

ब्रह्मपुराणे—भुक्त्वाऽमृतापिधानार्थं पिबेत्तोयं सकृत् सकृत् ।
येनानग्नं भवेदन्नं जीवभूतं जगत्त्रये ॥

अत्रैकं सकृत्पदमलवादि सत्तायविशेषणम् । तथा—

हस्तं प्रक्षाल्य गण्डूषं यः पिबेद्विचक्षणः ।
स देवांश्चपितॄँश्चैव आत्मानं चैव घातयेत् ॥

तेनहस्तमप्रक्षाल्यैव प्रत्यपोशनं ग्राह्यमित्यर्थः ।

बृद्धशातातपः—

दधि-क्षीर-घृतैर्वापि प्रभूतैर्व्यञ्जनैस्तथा ।
उष्णोदकैर्द्धान्यचूर्णैः करौ श्मश्रूणि शोधयेत् ॥

देवलः— भुक्त्वा चान्नं यथोक्तेन विधानेन समाहितः ।
शोधयेन्मुख-हस्तौ च मृदद्भिर्घर्षणेन तु ॥

तथा— भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत् ।
दन्तलग्नमसंहार्थं लेपं मन्येत दन्तवत् ॥
न तत्र कुर्याद्बहुशो यत्नमुद्धरणे पुनः ।
भवेदशौचमत्यर्थं तृणवेधाद् व्रणे कृते ॥

विष्णुपुराणे—भुक्त्वा चैव तथा सम्यक् प्राङ्मुखोदङ्मुखोपि वा ।
आचान्तः पुनराचामेत् पाणी प्रक्षाल्य मूलतः ॥

बोधायनः— "आचान्तः पुनराचम्य दक्षिणपदाङ्गुष्ठे स्रावयति ।
अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठश्च समाश्रितः ।
ईशः सर्वस्य जगतः प्रभुः प्रोणातु विश्वभुक् ॥

इति मन्त्रेण । तथा—मांस मत्स्य बिल्वमधु संसृष्टं प्राश्याप उपस्पृश्याग्निमुपस्पृशेत् ।

ब्रह्मपुराणे - सम्मार्ज्य बाहू जानू च गोप्रदानफलं लभेत् ।

तथा— "आचान्तोप्यशुचिस्तावद्यावन्नोन्मृज्यते मही" ।

बोधायन — "यत्र भुज्यते तत्परिसमुह्य निर्हृत्यावेक्ष्य तं देशमसतेभ्यो लेपान् सहृत्याद्भिः संस्कृत्यात्तरतः शुचौ देशे रुद्राय निनयेदेवं वास्तु शिवं भवति" ।

समुह्य हस्तादिना संशोध्य । निर्हृत्य सकलमुच्छिष्टमपनीय । अवेक्ष्य तद्देशं गोमयोदकेनोपलिप्य अमन्त्रं पात्र स्थाल्यादि तेभ्यः पांशुप्रभृतिलेपानपनीय अद्भिः संस्कृत्य कांस्यादि क्षारादि वह्निना प्रक्षाल्य उत्तरतः वास्त्वपेक्षया रुद्राय निनयेत् पूर्वोपनीतमेवोच्छिष्टं शुचौ देशे रुद्रमुद्दिश्य त्यजेत् । एवं वास्तु शिवं भवति एवं कृते गृहे कल्याणहेतुर्भवति ।

विष्णुपुराणे —

स्वस्थः प्रशान्तचित्तस्तु कृतासनपरिग्रहः ।
अभीष्टदेवतानाञ्च कुर्वीत स्मरणन्ततः ॥

अग्निराप्यायतां धातून् पार्थिवान् पवनेरितः ।
दत्तावकाशो नभसा जरयत्वष्ट मे मुखम् ॥
अन्नं बलाय मे भूमेरप मग्न्यनिलस्य च ।
भवत्वेतत्परिणतं मम स्त्व व्य.हतंमुखम् ॥
प्राणोपानसमानानामुदानव्यानयोस्तथा ।
अन्नं प्रीतिकरं चास्तु ममास्त्वव्याहतं मुखम् ।
अगस्तिरग्निर्वडवानलश्च भुक्तं मयान्नं जरयत्वशेषम् ।
मुखं ममैतत्परिणामसम्भवं यच्छत्वरोगो मम चास्तु देहः ॥
विष्णुः समस्तेन्द्रियदेहदेहिप्रधानभूतो भगवान्यथैकः ।
सत्येन तेनान्नमशेषमेतदारोग्यदं मे परिणाममेतु ॥
विष्णुवत्ता यथैवान्नं परिणामश्च वे यथा ।
सत्यन तेन सद्भुक्तं जीर्यत्वन्नमिदन्तथा ॥
इत्युच्चार्य स्वहस्तेन परिमृज्यात्तथोदरम् ।
अनायासप्रदायीनि कुर्यात्कर्माण्यतन्द्रितः ॥

व्यवहितेन चाहिताग्निना यदाग्निहवनं युक्तया निश्रीयते, तदुत्तरं भोक्तव्यम् । प्रवासिवश्चाग्निहोत्री यदाग्निहोमं मन्येत तदाश्नीयादिति विष्णुवचनात् । एवं पतिव्रतया पतिव्यवधाने तद्भोजनकालमवधार्य्य तदुत्तरं भोक्तव्यम् । अत एव भारते—नलव्यवधानेपि दमयन्त्यास्तथैव भोजनमुक्तम् । यद्यपि—दक्षेण पञ्चमभागे भोजनमुक्त, तथापि तददृष्टार्थं, तेनानिषिद्धकाले वैश्वकर्म कृत्वा पूर्वाह्णादावपि तत्कार्यम् । एवं श्रोदत्ताह्निकादयोपीति ।

★★

॥ अथ भोज्याभोज्यानि ॥

तत्र यमः—

अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतम् ।
वैश्यस्यान्नं त्वन्नमेव शूद्रस्य रुधिरं स्मृतम् ॥

मनुः— आददीतान्नमेवास्मादवृत्तावैकरात्रिकम् ॥

अस्मात्—शूद्रात् । अवृत्तौ—अन्नान्तरालाभे । ऐकरात्रिकम्—एकाहभक्ष्यम् । शूद्रस्यापि कानिचित् पक्वान्नानि ग्राह्याण्याह अङ्गिराः—

गोरसं चैव सक्तूंश्च तैलं पिण्याकमेव च ।
अपूपान्भक्षयेच्छूद्राद् यच्चान्यत् पयसा कृतम् ॥

पिण्याकस्तिलखलिः, पयसा दुग्धेन । भोज्यमपि परान्नं भुक्त्वा दारोपगमे दोषमाह यमः—

यस्यान्नेन तु भुक्तेन भार्यां समधिगच्छति ।
यस्यान्नन्तस्य ते पुत्रा अन्नाद्रेतः प्रवर्त्तते ॥

उदरस्थब्राह्मणेतरान्नमरणे दोषमाह स एव—

ब्राह्मणान्नं क्षत्रियान्नं वैश्यान्नं शौद्रमेव च ।
तां तां योनिं व्रजेद्विप्रो भुक्त्वान्नं यस्य वै मृतः ॥

हारीतः—

शूद्रान्नेन तु भुक्तेन जठरस्थेन यो मृतः ।
स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चापगच्छति ॥

ब्राह्मणस्य यान्यन्नानि धर्मशास्त्रेषु भोज्यतया निषिद्धानि तानि दर्श्यन्ते ।

त्रयाहि – अश्रोत्रियान्नं, ग्रामयाजकान्नं, बहुतरोषनतान्नं, स्त्रैणान्नं, नपुंसकान्नं, स्वतन्त्रनानास्वामिकान्नं, पुंश्चल्यन्नं, चौरान्नं, तक्षवृत्यन्नं, वार्द्धुषिकान्नं, दीक्षितान्नं, बद्धान्नं, कदर्यान्नम्, अभिशस्तान्नं, चिकित्सकान्नं, दाम्भिकान्नं, आखेटक्यन्नं, क्रूरान्नमुच्छिष्टभोज्यन्नं, दारुणकर्मकार्यन्नं, सूतक्यन्नं, सूतिकान्नं, निष्पत्रिपुत्रस्त्र्यन्नं, नगरम्बाम्यन्नं, पिशुनान्नम्, अन्यतोषजीव्यन्नं, क्रतुविक्रय्यन्नं, कृतघ्नान्नं, नृशंसान्नं, व्यभिचारिपत्नीकान्नं, स्त्रीजितान्नं, पतितान्नं, भूपालान्नं, सोमलताविक्रय्यन्नं, पौनर्भवान्नं, भ्रूणहान्नं, शूकरपोष्ट्रन्नं, यत्यन्नं, ब्रह्मचार्यन्नं, वृषलीपत्यन्नं, निग्रहनियुक्तान्नं, कापालिकान्नं, विश्वदन्नं, रुददन्नं, साद्यदन्नमुन्माद्यदन्नं, पुराहितान्नं, द्वेषशीलान्नं, प्रेतश्राद्धान्नं, शस्त्रोपजीव्यन्नं बन्धकाजीव्यन्नं, समर्घक्रयमहार्घविक्रयोपजीव्यन्नम्, अक्रातसोमलताकान्नं, अग्नित्याग्यन्नं, अधीतविस्मृतवेदकान्नं, ग्रामोपवेशनोद्देश्यान्नम्, असांक्रेयान्न्य, ज्योतिषिकान्नं अपुत्रान्नं, अप्रसूतस्त्र्यन्नम्, अवैश्वदेविकपाकान्नं, शस्त्रविक्रय्यन्नं, कापटिकान्नं, परिवेत्तान्नं, परिवित्त्यन्नं, छिन्नाग्रमेहनान्नं, ब्राह्मविवाहजामात्रन्नं, यत्र सोदरायाः कनिष्ठाया आदौ ज्येष्ठायाश्चानन्तर विवाहस्तत्पत्योरन्नं, अन्यदपि शूद्रामन्त्रितं केशकीटादिजुष्टं भावदुष्टं अवलेपदत्तम्, उद्बुध्यदत्तं भक्तं पर्युषितञ्च। पर्युषितं त्वापदि स्नेहाक्तं भोक्तव्यं, भक्ष्यमपि परान्नम्। दर्शे न भोज्यमित्याह शातातपः—

वनस्पतिगते सोमे परान्नं ये तु भुञ्जते।
तेषां मासकृतो होमो दातारमधिगच्छति॥

होम इति स्वकृतमात्रोपलक्षणम्। दातार –अमावास्यायामाहारदातारम्। यमः—

उपाश्नते ये गृहस्थाः परपाकमबुद्धयः।
तेन ते पशुतां प्रेत्य व्रजन्त्यन्नाद्यदायिनम्॥

प्रेत्य — मृत्या ते परपाकभुजः तेन कर्मणा अन्नाद्यदायिनां सिद्धान्न-प्रदायिनां पशुतां व्रजन्ति—पशवो भवन्ति। यमः —

स्वपाके वर्त्तमाने यः परपाकं निषेवते।
सोश्वत्वं शूकरत्वञ्च गर्द्दभत्वञ्च गच्छति॥
परपाकेन पुष्टस्य द्विजस्य गृहमेधिनः।
इष्टं दत्तं तपोधीतं यस्यान्नं तस्य तद्भवेत्॥

हारीतजमदग्नी —

ब्राह्मणान्नेन दारिद्र्यं क्षत्रियान्नेन प्रैष्यता।
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नै र्नरकं व्रजेत्॥

॥ अथाभक्ष्याणि ॥

लशुनं गृञ्जनञ्चैव पलाण्डुं कवकानि च।
अभक्ष्याणि द्विजातीनामभेध्यप्रभवाणि च॥
लोहितान् वृक्षनिर्ज्जासान् व्रश्चनप्रभवांस्तथा।
शेणु गव्यञ्च पेयूषं यत्नेन परिवर्ज्जयेत्॥

गृञ्जनं—गाजर इति प्रसिद्धं, पलाण्डुं पयाज इति प्रसिद्धं, कवकं—काष्ठच्छत्रिका। अभेध्यप्रभवाणि साक्षाद्विष्ठाजातानि—वृन्ताकीयकादीनि, विज्ञानि परिवर्ज्जयेदिति याज्ञवल्क्यवचनात्। लोहितानित्यादि निर्ज्जासो लसा इति प्रसिद्धः स च स्वयं वृक्षाद्बहिर्भूतो लोहितो निषिद्धो वृक्षच्छेदनेन तु बहिःकारितोऽनुबर्णोपितिषिद्धः व्रश्चनेति पुनरुपादानात्। लोहितग्रहणेन च कर्पूरादौ न दोषः।

शेणु तु बहुआर इति प्रसिद्धः। पेयूषं—नवप्रसूतायाः क्षीरं, यदग्निसंयोगात्कठि-

नम्भवति तच्चेद् गव्यं तदा निषिद्धं महिष्यास्तु निर्द्दगाद्दायास्त्वभ्याद्यमेवेत्यर्थः। देवलः—

श्लेष्मातकञ्च कौसुम्भं नालं मस्तकमेव च।
गृञ्जन चेति शाकानामभक्ष्याणि प्रचक्षते॥
पलाण्डुं लशुनं भक्तं निर्यासश्चेति सर्वतः॥

कुम्भचुन्द्र – श्वेतवृन्ताक श्वेतभन्टाकी। निर्यासो लोहित एव। लोहितान् वृक्षनिर्जासानितिवचनात्। निर्जासः— कुलत्थ इति हलायुधः। कुम्भाद्यं—कुम्भानु इति प्रसिद्धं फलम्। तथा विलयं सुमुखन्तथा। विलयो घृतमलत्वं, सुमुखः सर्पविशेषः। तदुक्तं विश्वकोषे – 'सुमुखस्तार्क्ष्यतनये फलिभेदे च पण्डिते'। एतौ वर्जयेदित्यर्थः। अभक्ष्यमित्यनुवृत्तौ गौतमः – 'किसलयः कियाकु'। किसलयः नवपल्लवः। कियाकु अहिच्छत्राकम्। अभक्ष्यप्रकरणे आपस्तम्बः – "कौलालौषधीनाञ्च कलञ्ज—पलाण्डु पवारिका यच्चान्यत्पश्चिचक्षते"। कौलालं – सुरा, तदर्थं स्थापिता या ओषधयो व्रीह्यादयः ताः कौलालौषधयः तासां विकार इति शेषः। कलञ्जो लशुनविशेषः। पलाण्डुस्तु दशधा—

रसोनो दीर्घपत्रश्च पूतिगन्धो महौषधम्।
हिरण्यश्च पलाण्डुश्च नवतर्कः पवारिका॥
गृञ्जनो यवनेष्टश्च पलाण्डु र्द्दशजातयः॥

इति स्मृतमञ्जरीकारलिखितायुर्वेदश्लोकात्। यदिति यच्चाप्येवंविधङ्कोविदारादिशिष्यः परिचक्षते, परिवर्जयन्ति तदपि न भोज्यमितिशेषः।

"न प्लक्षादुम्बरदधित्थनापमातुलुङ्गानि भक्षयेत्"। दधित्थः—कपित्थः। नीपः—कदम्बः। मातुलुङ्गो बीजपूरः। भृगुः—

भक्षयेद्यदि नीलीन्तु प्रमादाद् ब्राह्मणः क्वचित्।
चान्द्रायणेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः॥

यमः—

"ऋजीषपक्वमांसञ्च मत्स्यानप्यनुपाकृतान् ।"

ऋजीषपक्वं भौमोष्मपक्वम् । अनुपाकृतान्—असंस्कृतान् । आत्तवीर्याणि नाश्नीयात । आत्तवीर्यमुद्धृतसारम् ।

ब्रह्मपुराणे—

राजमाषाः स्थूलमुद्गस्तथा वृषकदूषकौ ।
मसूराः शतपुष्पाश्च कुसुम्भं श्रीनिकेतनम् ॥
सस्यान्येतान्यभक्ष्याणि न च देयानि कस्यचित् ॥

राजमाषो बलीटीति प्रसिद्धः । स्थूलमुद्गो—मेथीतिप्रसिद्धः, शतपुष्पा—सोफ इति प्रसिद्धा । श्रीनिकेतनम् ओषधिविशेषः ।

वर्जयेदित्यनुवृत्तावापस्तम्बः— "कृष्णधान्य शूद्रान्नं ये चान्येऽनाद्यसम्मिताः" । कृष्णधान्य—कवहलादिः । अनाद्यसम्मिताः अभक्ष्यतुल्यतया स्फुरिताः । भावदुष्टं न भक्षयेदिति विश्वामित्रवचनात् । मनुः—

मत्तक्रुद्धातुरागान्नं न भुञ्जीत कदाचन ।
केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः ॥
भ्रूणहावेक्षितञ्चैव स्पृष्टञ्चापि पतत्रिणा ॥

कामत इत्यभिधानात् । प्रमादात्पादस्पृष्टमपि अदुष्टम् । याज्ञवल्क्यः—

भुक्तं पर्युषितोच्छिष्टं श्वास्पृष्टं पतितेक्षितम् ।
उदकेन स्पृष्टसंघुष्टं पर्यायान्नं च वर्जयेत् ॥

संघुष्टमुद्घुष्य दत्तं पर्यायान्नमन्यसम्बन्धि यदन्यव्यपदेशेन दीयते ।

तथा— ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् ।
उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं चरेत् ॥

देवलः— न बीजान्युपभुञ्जीत रोगापत्तिमृते बुधः ।
फलान्येषामनन्तानि बीजानन्तु विनाशयेत् ॥
नाश्नीयात्पयसा नक्तं भक्तश्चेन्न स्वपेन्निशि ।
न क्षीरमुत्सृजेत्प्राप्तं पवित्रं हि पयः स्मृतम् ॥

बीजानि—कूष्माण्डादिबीजानि, पयसा दुग्धेन ।

यमः—

भिन्नभाण्डे न भुञ्जीत न रात्रौ दधिसक्तुकान् ॥

रात्रौ दधि निषिद्धं, सक्तवश्च । तथा—

काक-कुक्कुट-सस्पृष्टं भक्तं वा कृमिसंयुतम् ।
अभोज्यं तद्विजानीयाद्धर्मराजवचो यथा ॥

शंखलिखितौ—

"भक्ष्याण्यपि वर्जयेदमेध्य-पतित-चाण्डाल-पुष्कश-रजस्वला-कुणप-कुष्ठिस्पृष्टानि" । अमेध्यं—विण्मूत्रादि । पुष्कशः—शबरः ।

अश्नीयादित्यनुवृत्तौ हारीतः—

"न रजस्वलया दत्तं, न पुंश्चल्या, न क्रुद्धया, न मलवद्वाससा, नापरया द्वारापन्न, न द्विष्टकं, न भुक्तं, न पर्युषितम् अन्यत्र गुडपिण्डसक्तुस्नेहगोरस-तैलादिषु पक्वान्न, न तक्रं दध्यनुपानं, नावक्षतान्न जुगुप्सितम् ।" मलवद्वाससा श्लेष्मादिलिप्तवस्त्रया, नापरया द्वारा, रजस्वलया दत्तं दाप्यमानं वा न भोज्यमित्यर्थः । पर्युषितमिति पक्वान्नमित्यन्तेन प्रतिप्रसौति । अत्र च तैलादिष्विति सप्तम्या अलुक् छान्दसत्वात् । आदिपदाद् घृतादिपरिग्रहः । न तैलं दध्यनुपानम् आहारशेषदुग्धपानस्य शेषतैलं दधि वा नाश्नीयादित्यर्थः । अवक्षतम् उपरिकृतच्छिक्काकं, जुगुप्सितं—निन्दितम् । एतच्च द्वयमभोज्यमित्यर्थः ।

शङ्खः – "न पर्युषितमश्नीयादन्यत्र राग-चुक्र-खाड़व-दधि-गुड़-गोधूम-यव-पिष्टक-विकारेभ्यः"। रागो—मांसादिप्रलेहः। चुक्रं—चूकइति प्रसिद्धम्। खाड़वाः—कट्वम्लस्वादाः। प्रलेहभेदा रसालादयः। स्वभावान्मधुरं कालवशादम्लतां गतं यत्तच्छुक्रम्। तच्च यन्न मत्तताजनकं तत्केवलं सद्भक्ष्यम्, द्रव्यान्तरसंसृष्टन्तु भक्ष्यमेव। भक्तन्तु केवलमिति गौतमवचनात्। दध्यादितु केवलमपि भक्ष्यमाह— बृहस्पतिः— "दधिभक्ष्यञ्च शुक्तेषु यच्चैव दधिसम्भवम्।" यत्तु—मदकारि तद्द्रव्यान्तरसंसृष्टमप्यभक्ष्यमित्याह स एव—

कन्दमूलफलैः पुष्पैः शस्त्रैः शुक्तासवन्तु यत्।
अविकारे भवेद्भक्ष्यमभक्ष्यं तद्विकारकृत्॥

विकारो—मत्तता। यदपि—पर्युषितत्वे नाभोज्यमोदनादि तदपि स्नेहाक्तं सदपि भोज्यमेव।

देवीपुराणे—कृशराणि च पूपानि पायसं मधुसर्पिषी।
घृथा मांसञ्च नाश्नीयात्पितृदेवविवर्जितम्॥

ब्रह्मपुराणे—दुष्टं वा केशकीटाक्तं मृद्भस्मकनकाम्बुभिः। शुद्धमद्यात्।

एकेन पाणिना दत्तं न कदाचन भक्षयेत्।
घृतं तैलं च लवणं पानीयं पायसन्तथा॥
भिक्षा तु हस्तदत्ता या सा न ग्राह्या कदाचन।
शूद्रभक्तावशिष्टन्तु नाद्याद् भाण्डस्थितं त्वपि॥

मार्कण्डेयपुराणे—"मुखवातोपशामितम्"। न भक्ष्यमितिशेषः।

भविष्यपुराणे— आयसेन तु पात्रेण यदन्नमुपनीयते।
भोक्ता विष्ठासमं भुंक्ते दाता च नरकं व्रजेत्॥
अङ्गुल्या दन्तकाष्ठञ्च प्रत्यक्षलवणञ्च यत्।
मृत्तिका भक्षणञ्चैव तुल्यं गोमांस भक्षणम्॥

अवतारणानन्तरं प्रक्षिप्तं यत् तत् प्रत्यक्षलवणम् । तादृशमपि सामुद्रम् । सैन्धवञ्चानिषिद्धम ।

सैन्धवं लवणन्तद्वत् तथा मानससम्भवम् ।

पवित्रे परमेह्येते प्रत्यक्षे अपि नित्यशः ॥ इति वचनात् ।

॥ अथ दुग्धानि ॥

तत्र शंखः—

माहिषं गव्यमाजञ्च भक्ष्यं क्षीरेषु निर्दिशेत् ॥

निर्द्दशसप्तमीवलादन्यान्यभक्ष्याणीत्याहुः । अभक्ष्यदुग्धानां दधिघृताद्यप्यभक्ष्यम् ।

क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः ।

सप्तरात्रव्रतं कुर्याद्येषु यत्परिकीर्त्तितम् ॥

इति भवदेववचनात् ।

भक्ष्येपि विशेषमाह—गौतमः— "गोः क्षीरमनिर्द्दशाहायाः सूतकेऽजामहिष्योश्च" । सूतकञ्च दशाहं तदुक्तम्—

अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका ।

दशरात्रेण शुद्ध्यन्ति भूमिष्ठं च नवोदकम् ॥

दशाहानन्तरमपि केषाञ्चिद् गवादीनां दुग्धमपेयमाह—"स्यन्दनीयमसू-सन्धिनीनाञ्च" स्यन्दिनी वत्सं विनैव प्रस्रवणशीला, यमसूः-यमजप्रसोत्री,—रिरसाकुला, गर्भिणीति भवदेवः ।

बृहद्वशिष्ठः—"स्यन्दिनी-सन्धिनी-विवत्साक्षीरममेध्यभुजश्च ।" अमेध्यभुजो-विष्ठामद्यादिभुजः । बौधायन —"विवत्सान्यवत्सयोश्च ।" मृतवत्साया अन्यवत्सेन वा प्रस्रवन्त्या दुग्धमपेयमित्यर्थः ।

भविष्यपुराणे—

कापिलं यः पिबेच्छूद्रो नरके स विपच्यते ।
हुतशेषं पिबेद्विप्रो विप्रः स्यादन्यथा पशुः ॥

आपस्तम्बः—"अपेयं तथैडिकं पयः ।" एडकारण्यच्छागी ।

॥ अथ पक्षिणः ॥

अथ पक्षिणः—तित्तिरश्च मयूरश्च नावकश्च कपिञ्जलम्, वार्द्धीणसं वर्त्तकश्च भक्ष्यानाह यमः । मयूरः तृणमयूरः । "पक्षिणः तित्तिरि-कपोत-कपिञ्जल-नावक-तृणमयूरा" इति बौधायनवचनात् । कपोतोत्र-वनकपोतः । "पारावत-कपोतौ च अभक्ष्याः पक्षिणः स्मृता" इति याज्ञवल्क्येन ग्राम्यकपोत-निषेधात् । कपिञ्जलो-गौरतित्तिरिः । वार्द्धीणसः,

कृष्णग्रीवा रक्तशिराः श्वेतपक्षो विहङ्गमः ।
स वै वार्द्धीणसः प्रोक्त इत्येषा नैगमी श्रुतिः ॥

इति मनुना लक्षितः । वर्त्तको-वटयो इति प्रसिद्धः । एवं—"घृत-कुम्भसमास्तत्र शरालो भक्षयिष्यथ" इति रामायणेन रामचन्द्रोपदेशाच्छल्लि-रपि भक्ष्येति केचित् । शल्लस्यपि भक्ष्या रामायण एव तथाभिधानात् । एत-दष्टकातिरिक्तास्तु सर्व एव चटका अभक्ष्या इति ।

॥ अथ पशवः ॥

तत्र हारीतः—

"ग्राम्यारण्यानां पशूनामश्नन्ति । तथा—अज-मेष-महिष-हरिण-खड्ग-रुरु-पृषतन्यङ्कु-रुष्यमहारण्यवासिनश्च वराहांस्तथा"। रुरुर्बहुशाखशृङ्गो मृगः । पृषतो—बिन्दुचित्रितो मृगः । रुष्यो रोझ इति प्रसिद्धो हरिणविशेषः । एकशफवराहश्च भक्ष्यः । शशकोपि भक्ष्यः, शशकः शल्लकीत्यादि रामायण-

वचनात्। वशिष्ठः—"खड्गिनि षिवदन्त्यग्रामशूकरे च।" खड्गिनि एकशफ-शूकरे च भक्ष्याभक्ष्यतया विवाद इत्यर्थः। तत्र च श्राद्धादिविनियुक्ताविनि-युक्ततया व्यवस्थितो विकल्पः। द्विशफस्त्वभक्ष्य एव।

ब्रह्मपुराणे—

पशोश्च मार्यमाणस्य न मांसं ग्राहयेद् द्विजः।
पृष्ठमांसं गर्भशय्याः शुष्कमांसमथापि वा॥
भूमेरन्तरितं कृत्वा मृद्भिश्चाच्छादितञ्च यत्।
पक्वमांसमृजीषन्तु प्रज्ञानात्तन्न भक्षयेत्॥

शुष्कमांसस्याभक्ष्यत्वात्कस्तूर्यप्यभक्ष्येति द्रष्टव्यम्। न भक्षयेदित्यनु-वृत्तौ गौतमः—"अपतदवसन्नवृथामांसानि।" यावत् स्वाभावतो न क्षीरदन्ताः पतन्ति तावद् भक्ष्योपि पशुरभक्ष्यः। अवसन्नो व्याधिम्लानः। वृथामांसं—अदेवपितृशेषम्।

तदयं संक्षेपः—महिषस्याभक्षणं शिष्टविगानात्। छाग-मेष-हरिण-शशकानामनवसन्नानामक्षीरमुखानामविवादं भक्षणम्। खड्ग्यैकशफशूकरयोस्तु श्राद्धादिशिष्टयो र्भक्षणम्, अन्यथा त्वभक्षणम्। भक्ष्याणामपि पशूनां पृष्ठ-मांसं मार्यमाणतादशायामाहृतञ्च मांसमभक्ष्यमिति।

॥ अथ मत्स्याः ॥

तत्र शंखः—

राजीवाः सिंहतुण्डाश्च सशल्काश्च तथैव च।
पाठीन-रोहितौ चापि भक्ष्या मत्स्येषु कीर्त्तिताः॥

सिंहतुण्डा अलिप्रभृतयः। सशल्काः—शफरादयः। भक्ष्या इत्य-नुवृत्तौ बोधायनः—"मत्स्याः सहस्रजग्धिलवण-वर्मि-वृहच्छिरसश्चिलिचिम-शफर-रोहित-राजीवाः।" सहस्रजग्धिलवणः पाठीनः, वर्मी राघव इति प्रसिद्धः, चिलिचिमः—स्थलचरो रोहितसदृशः।

मत्स्याँश्चाशल्कान् सर्वान् वेदाध्यायी विवर्जयेत् ॥

वेदाध्यायी त्रैवर्णिकः। अशल्कान्—सिंहतुण्डपाठीमातिरिक्तान्। मत्स्यकण्टकमभक्ष्यम्—

मत्स्यकण्टक-शम्बूक-शंस-शुक्ति-कपर्दकान्।
पीत्वा नवोदकं चैव पञ्चगव्येन शुद्ध्यति ॥

आपस्तम्बः— "अभक्ष्या मत्स्यानां सर्पशीर्षा मृद्गवः क्रव्यादा ये चान्ये विकृतास्या ह्यमनुष्यशिरसः।" सर्पशीर्षः—सर्पतुल्यमस्तको वामीनादिः। मृद्गो मकरः। क्रव्यादा नक्रादयः। यमः— "अभक्ष्या मकर-सर्प-सरीसृप-मद्गु-मयूर-चर्मिक-नक्र-कर्कट-शिशुमारा ये चान्ये ह्यकर्णिका, ये चान्ये अशल्का उभयकाम्याः।" सार्पा डुण्डुभाः, सरीसृपोत्र जलौकाः। मद्गुः जलकाकः। मयूरो जलचरः, मयूरसदृशः पक्षी कएव इति प्रसिद्धः। चर्मिकः—सर्पसदृशो मत्स्यविशेषः। उभयकाम्या—उभयतोमुखाः। भक्ष्या अपि श्राद्धादिशेषाः सन्तः खाद्या इत्याह मनुः—

पाठीन-रोहितावाद्यौ नियुक्तौ हव्यकव्ययोः।
राजीवाः सिंहतुण्डाश्च सशल्काश्चैव सर्वशः ॥

पाठीन-रोहितौ हव्यकव्ययो र्नियुक्तौ सन्तावाद्यौ भक्षणीयावेवं राजीवादयोपीत्यर्थः। गोधाकूर्मौ भक्ष्यौ।

पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्रेषु राघव।
शशकः शल्लकी गोधा कूर्मः खड्गी च पञ्चमः ॥

इति रामायणीपरिसंख्यानेन पञ्चानामपिभक्ष्यत्वावसायादिति।

॥ अथ मांसभक्षणवर्जनयो र्विधिः ॥

प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया ।
देवान् पितॄंश्चार्च्चयित्वा खादन् मांसं न दोषभाक् ॥
भक्षयंश्चापि मांसानि शेषभोजी न लिप्यते ।
औषधार्थमशक्तौ वा नियोगाद्यङ्गकारणात् ॥

प्राणात्यये—मांसभक्षणं विना मरणे सम्भाव्यमाने । श्राद्धे ऋत्विग्विधया दैवे नियुक्तः श्राद्धे वेति यमवचनात् । प्रोक्षितं यज्ञार्थं मन्त्रैः संस्कृतं, मन्त्रैस्तु संस्कृतानद्यादिति मनुवचनात् । द्विजकाम्यया अप्रत्याख्येयब्राह्मणानुरोधेन । इदञ्च सकृदेव, सकृद् ब्राह्मणकाम्ययेति यमवचनात् । देवान् पितृनिति वैश्वदेवशेषं श्राद्धशेषञ्च मांसं खाद्यम् । इदमेवानुवदति—भक्षयंश्चापीति । औषधार्थम्—औषधत्वेन अशक्तौ वेति । यत्र मांसभक्षणं विनाऽतीवसामर्थ्यहानिस्तत्र तद्भक्षणीम् । श्राद्धे तु यावत्पशुमांसं स्वधाकृतं, दैवे वा यावद्दत्तं तावत्सर्वमेव श्राद्धिना ऋत्विजा च सत्यां शक्तौ भोक्तव्यम् । तदाह यमः—

आमन्त्रितस्तु यः श्राद्धे दैवे वा मांसमुत्सृजेत् ।
यावन्ति पशुरोमाणि तावन्नरकमृच्छति ॥

मनुरप्याह—नियुक्तस्तु यथान्यायं यो मांसं नात्ति मानवः ।
स प्रेत्य पशुतां याति सम्भवानेकविंशतिम् ॥

सम्भवो—जन्म । अविधिभक्षणे दोषमाह मनुः—

नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः ।
जग्ध्वाह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः ॥
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः ।
यादृशं प्रेत्य भवति वृथा मांसानि खादितुः ॥

स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ।
यत्र तत्राभिजायेत स भवेद् व्याधिपीड़ितः ॥
भुक्त्वा तु मोहान्मांसानि नरः पुष्ट्यर्थमात्मनः ।
अकृत्वा ह्यात्मनः शुद्धिन्तिर्यग्योनिषु जायते ॥

तथा— यस्तु भोजयते मांसं विधिं हित्वा पिशाचवत् ।
स लोकाप्रियतां याति व्याधिभिश्चैव पीड्यते ॥

तथा— यस्तु खादति मांसानि ब्राह्मणो वेदवित्तथा ।
स पच्यते निरालम्बे नरके तेन कर्मणा ॥

न चैवं ब्राह्मणस्य मांसभक्षणनिषेधे सिद्धे द्विजत्वपुरस्कारेणापि यत्सविधिमांसभक्षणं तदपि क्षत्रियादिपरमेव । सामान्यविशेषन्यायादिति वाच्यम्,

असंस्कृतान् पशून् मन्त्रैर्नाद्याद्विप्रः कथञ्चन ।
मन्त्रैस्तु संस्कृतानद्यात् शाश्वतं विधिमास्थितः ॥

इत्यादिमनुवचनेन ब्राह्मणस्यापि सविधिमांसभक्षणविधानात् । तस्मात् प्रतिषेधवचनान्यविधिमांसभक्षणविषयाणीति बोद्धव्यम् ।

तथा च—चातुर्वर्ण्यस्यैव मांसभक्षणे प्रवृत्ते निवृत्तावपि चतुर्वर्णानामधिकारः प्रवृत्तिमात्रान्निवृत्तिनियागेऽधिकारात् । नन्दिपुराणे—

यदि वा न समर्थः स्यात्सदा मांसविवर्ज्जने ।
वर्ज्जयेदयने मुख्ये कृतस्वगमतिर्न्नरः ।
चतुर्थी चाष्टमी चैव द्वादशी च चतुर्दशी ॥

तथा— पञ्चपर्वाणि वर्ज्यानि षडशीतिमुखानि च ।
संक्रमश्चापि सूर्यस्य विषुवौ चापि वार्षिकौ ॥

पर्वसंक्रमग्रहणादेव चतुर्दश्ययनादिलाभे पुनरयनादिग्रहणं दोषातिशयार्थम् ।

॥ अथ पशुहिंसा-विधित्यागौ ॥

तत्र मनुः—

यज्ञार्थे पशवः सृष्टाः स्वयमेव स्वयम्भुवा ।
यज्ञश्च भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥

भूत्यै—भरणाय । सर्वस्य—देवादेः ।

मधुपर्के च सोमे च पितृदैवतकर्मणि ।
अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः ॥
एष्वर्थेषु पशून् हिंसन् वेदतत्त्वार्थविद्द्विजः ।
आत्मानञ्च पशूँश्चैव गमयत्युत्तमाङ्गतिम् ॥

तथा— यावन्ति पशुरोमाणि तावत्कृत्वेव मारणम् ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥

प्रेत्य स्वमारितपशुरोमसंमितं मारणं वृथापशुघ्नः प्राप्नोति । तस्मान्न वृथा पशुं हन्यादिति तात्पर्यम् ।

हारीतः— यथात्मनस्तथान्येषां यो विद्वान् स्वस्तिमिच्छति ।
स सर्वलोक प्रवरे ब्रह्मलोके महीयते ॥

॥ अथ भोजनोत्तरकर्म ॥

तत्र दक्षः—

भुक्त्वा तु सुखमास्थाय तदन्नं परिणामयेत् ।
इतिहास-पुराणाद्यैः षष्ठसप्तमकौ नयेत् ॥

अष्टमे लोकयात्रा स्याद्बहिः सन्ध्या ततः परम् ॥

षष्ठसप्तमकौ—अर्द्धप्रहरात्मकौ कालौ, दक्षेणाष्टधा दिनविभजनात्।

ब्रह्मपुराणे—

शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति ।
संनिवेशश्च तस्याशु शृणुष्व मुनि सत्तम ॥
उत्तानपादस्तस्याथ विज्ञेयो ह्युत्तरो हनुः ।
यशोधरस्तु विज्ञेयो धर्मो मूर्द्धानमास्थितः ॥
हृदि नारायणश्चान्ते अश्विनौ पूर्वपादयोः ।
वरुणश्चार्यमा चैव पश्चिमे तस्य सक्थिनी ॥
शिश्नः संवत्सरस्तस्य मित्रोपानं समाश्रितः ।
पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोथ ततो ध्रुवः ॥

एतद्दर्शने फलं तत्रैव—

"यदह्ना कुरुते पापं दृष्ट्वा तं निशि मुच्यते ।
यावत्यश्चेह तारास्तु शिशुमाराश्रिता दिवि ।
तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि च ॥

अभ्यधिकानि—शतवर्षाणीतिशेषः ।

॥ अथ शयनविधिः ॥

याज्ञवल्क्यः—

उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तामुपास्य च ।
भृत्यैः समावृतो भूत्वा नाति तृप्तोथ संविशेत् ॥

संविशेत्—शयीत ।

विष्णुपुराणे—

कृतपादादि शौचस्तु भुक्त्वा सायं ततो गृही ।
गच्छेच्छय्यामस्फुटितामेकदारुमयीं नृप ॥
नाविशालां न वा भग्नां नासमां मलिनां न च ।
न च जन्तुमयीं शय्यामधितिष्ठेदनास्तृताम् ॥
प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप ।
सदैव स्वपतः पुंसो विपरीतन्तु रोगदम् ॥

दक्षः— प्रदोष पश्चिमौ यामौ वेदाभ्यासेन तौ नयेत् ।
यामद्वयं शयानश्च ब्रह्मभूयाय कल्पते ॥

मार्कण्डेयपुराणे—नोदक्शिराः शयीतापि न च प्रत्यक्शिरा नरः ।
शिरस्यगस्त्यमाधाय शयीताथ पुरन्दरम् ॥
प्राक्शिरः शयने विद्यां धनमायुश्च दक्षिणे ।
पश्चिमे प्रबला चिन्ता हानि मृत्युरथोत्तरे ॥

हारीतः—"न तिर्यगुदक्प्रत्यक्शिराः कोणशिरा उत्तरशिरा पश्चिमशिराश्च"। न शयीतेत्यर्थः ।

विष्णुः—"नार्द्रपादः स्वप्यान्नोत्तराशिरा, न नग्नो, नानुवंशं, नाकाशे, न पालाशे, शयने न पञ्चदारुकृते, न गजभग्नकृते, न विद्युद्दग्धकृते, न भिन्ने, नाग्निप्लुष्टे, न घटसिक्तद्रुमजे, न श्मशान-शून्यालय-देवतागृहेषु, न चत्वरमध्ये, न गो-गुरु-हुताश-सुराणामुपरि, नोच्छिष्टो, न दिवा, न सन्ध्यायां, न भस्मनि, देशे च नाशुचौ नार्द्रे, न पर्वतमस्तके ।" अपरः—पश्चिमः । वंशो—गृहमूर्द्धस्थ दीर्घकाष्ठम् । अनुवंशं—तद्वंशदैर्घ्यानुगतः । आकाशे—अनावृतप्रदेशे । न पालाशे—न पलाशनिर्मित खटवादौ । न पञ्चदारुकृते—पञ्चजातीयकाष्ठकृते । तदुक्तं वराहेण— "एकद्रुमेण धन्यं, वृक्षद्वयनिर्मितञ्च धन्यतरं, त्रिभिरात्मजवृद्धिकरं, चतुर्भिरर्थो यशश्चाग्र्यम् । पञ्च-

वनस्पतिरचिते पञ्चत्वं याति तत्र यः शेते। षट् सप्ताष्ट तरूणां काष्ठे घटिते कुलं हन्ति।" न चपलमध्ये चपल उपहसितः। उशनाः—"न तैलाभ्यक्त-शिरा शयीत"। हारीतः—"तथा नान्यपूर्वे, नाश्मपीठोपधाने तथानासने, तथा न प्रगे।" अन्यपूर्वे—अन्येन पूर्वमुपभुक्तशयनीये। नाश्मेति अश्मनापीठे न वा नोपधानं कार्यम्। प्रगे—प्रातःकाले।

शङ्खः—"न विशीर्णायां खट्वायां, नान्यवर्णोपसेवितायामनभ्युक्ष्य, न पर्वणि, न रभसोत्सवे।" प्रतिपच्चतुर्दश्यो सन्धिः पर्व। रभसोत्सवो—हर्षोत्पादकपुत्राद्युत्पत्तिसमयः। उभयत्रापि न शयीतेत्यर्थः।

पैठीनसिः—"संवृते देशे मैथुनमाहूयेत। नादीक्षितः कृष्णवर्मणि स्वप्यात्।

नमो नन्दीश्वरायेति यः प्रोच्य स्वपते नरः।
तस्य कूष्माण्डराजेभ्यो न भविष्यति वै भयम्॥

सदा निशायां दारान् प्रत्यलङ्कुर्वीत"। विष्णुपुराणे—

स्नातः स्रग्गन्धधृक् प्रीतो नाध्मातः कुपितोपि वा।
सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत्॥

व्यवायो—मैथुनम्। मैथुने चोपवीतं कण्ठलम्बितं कार्यं, 'निवीतं ग्राम्यधर्मेष्विति' विष्णुवचनात्।

विष्णुपुराणे—

नास्नातान्तु स्त्रियङ्गच्छेन्नातुरां न रजस्वलाम्।
नाविष्टां न प्रकुपितां नाप्रशस्तां न गर्भिणीम्॥
नादक्षिणां नान्यकामां नाकामां नान्ययोषितम्।
क्षुत्क्षामामतिभुक्तां वा स्वयं चैभिर्गुणैर्युतः॥

नान्ययोनावयोनौ वा नोपयुक्तौषधिस्तथा ।
देवद्विजगुरूणाञ्च व्यवायी नाश्रमे भवेत् ॥
चैत्य-चत्वर-मीरेषु न चैव च चतुष्पथे ।
नैव श्मशानोपवने सलिलेषु महीपते ॥
प्रोक्तपर्वसु शेषेषु नैव भूपाल सन्ध्ययोः ।
गच्छेद्व्यवायं मतिमान्न मूत्रोच्चारपीड़ितः ॥

शेषन्तु तिथिवारादि यदत्र निषिद्धं तद्वर्षकृत्यैऽनुसन्धेयम् ।

मनुः—

ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा ।
पर्ववर्ज्जं व्रजेदेनां तद्व्रतो रतिकाम्यया ॥
ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोड़श स्मृताः ।
चतुर्भिरितरैः सार्द्धमहोभिः स्याद्विगर्हितैः ॥
तासामाद्याश्चतस्रस्तु निन्दितैकादशी तथा ।
त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः ॥
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् ॥
पुमान् पुंसोऽधिके शुक्रे स्त्री भवेदधिके स्त्रियाः ।
समेऽपुमान् स्त्री पुंसौ वा क्षीणेल्पे च विपर्ययः ॥
निन्द्यासु तासु चान्यासु स्त्रियो रात्रिषु वर्ज्जयन् ।
ब्रह्मचार्येव भवति यत्र तत्राश्रमे वसन् ॥

ऋतुः—स्त्रीणां गर्भग्रहणयोग्यावस्था । तदुपलक्षितः काल ऋतु-काल: । पर्ववर्ज्जमिति ऋतावनृतावपि । रतिकाम्ययेति, इदमनृतावपि

गमनं स्त्रियाः सकामत्वपक्षे तत्संरक्षणार्थम्। तदुक्तं बृहस्पतिना—

सदैव वा पर्ववर्ज्जं स्त्रीणामभिमतं हि तदिति। समे परिमाणेन च तुल्ये स्त्रीपुंसयोः शुक्रे अपुमान् स्त्रीपुंसौ वेति। इदञ्च द्विधाभूते समे शुक्रे बोद्धव्यम्। विषमे तु द्विधाभूते स्त्रीद्वयं पुंद्वयं वा। स्त्रीपुंसावित्यत्रापि सम इत्यस्यानुषङ्गात्। तथा च यमः—

यदि संयोगकाले तु पुरुषो रागमोहितः।
द्विधा समुत्सृजेच्छुक्रं यमकं तत्र जायते॥

क्षीणे निःसारे, अल्पे—अल्पपरिमाणे, विपर्ययो गर्भानुत्पत्तिः। निन्द्याः प्रथम-द्वितीय-तृतीय-चतुर्थैकादश—त्रयोदशरात्रयः। अन्यासु निन्दितासु अष्टसु यासुकासुचिद्रात्रिषु स्त्रियो वर्ज्जयन् ब्रह्मचर्यफलं लभत इत्यर्थः। यत्र तत्र गृहस्थाश्रमे वसन्नित्यर्थः।

यमः— शुक्रशोणितवैकृत्याज्जायते कृष्णपिङ्गलः।
एवमुत्पादिताः पुत्रा म्रियन्ते नाशतायुषः॥

कृष्णपिङ्गल इत्यनेक वर्णोपलक्षकम्। एवमुत्पादिताः—अनिन्दितसमरात्रिगर्भाधानजनिताः। अशतायुषोऽसंपूर्णायुषः सन्तो न म्रियन्त इत्यर्थः।

याज्ञवल्क्यः—

एवं गच्छन् स्त्रियं क्षामां मघां मूलञ्च वर्ज्जयेत्।
स्वस्थ इन्दौ सकृत् पुत्रं लक्षण्यं जनयेत् पुमान्॥

एवं निन्दतरात्रिवर्ज्जनेन, सकृत् एकस्यां रात्रावेकवारं, क्षामां—अल्पबलां स्त्रियं, स्त्रियं गच्छन् पुत्रं जनयेदित्यन्वयः। मघां मूलञ्चाभिगमसमये वर्ज्जयेत्। इन्दाविति शुभग्रहमात्रोपलक्षणं बलवत्त्वं स्वगृहादिस्थत्वम्। तच्चोक्तं ज्योतिषे

रवे र्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मृगकर्कौ च कन्या मीने बुधस्य च ॥
जीवस्य कर्क मकरौ मीनकन्ये सितस्य च ।
तुला मेषौ च मन्दस्य उच्चनीचे उदाहृते ॥

रवे र्मेष उच्च । तुला –नीचा । एवमग्रेपि । मृगो—मकरः । कर्कः कर्कटः । सितः शुक्रः । मन्दः शनैश्चर इति ।

भारते— स्नाताश्चतुर्थे दिवसे रात्रौ गच्छेद्विचक्षणः ॥

आपस्तम्बः—"चतुर्थी प्रभृत्युत्तरोत्तरां प्रजानिःश्रेयसार्थम् ।" एवञ्च—चतुर्थ्यामपि रात्र्यामभिगमः शास्त्रार्थ एव । किन्तु – तद्गर्भजप्रजा—अल्पायुष्ट्वन्तद्दोष इति । बृहस्पतिः—

तस्माच्छुक्रविशुद्ध्यर्थं वृष्यं स्निग्धञ्च भक्षयेत् ।
लघ्वाहारां स्त्रियं कुर्यादेवं सञ्जनयेत् सुतम् ॥

वृषं—शुक्रं, तस्मै हितं वृष्यं क्षीरादि । देवलः—

अतीर्थगमनात्पुंसस्तीर्थसङ्गूहनात् स्त्रियाः ।
उभयोर्द्धर्मलोपः स्याद्द्वेषश्च तु विशेषतः ॥
यौगपद्ये तु तीर्थानां विवाहक्रमशो व्रजेत् ।
रक्षणार्थमपुत्रां वा ग्रहणक्रमशोपि वा ॥

तीर्थं—ऋतुः । संगूहनं सङ्गोपनम् । अपुत्रां वेति । अपुत्रामादौ व्रजेदित्यर्थः । ग्रहणेति—अपुत्राणाम् एवानेकासां स्त्रीणामृतुग्रहणक्रमेण प्रवृत्तिः कार्येत्यर्थः । दम्पत्योरपत्यविशेषोदय आहारविशेषात् । तदुक्तं शतपथे पुत्रेष्टिप्रकरणे— "स य इच्छेत्पुत्रो मे गौरो जायेत, वेदमनुब्रवीत

सर्वमायुरियादिति तोरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयित वा। अथ य इच्छेत्पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदाननुब्रवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयित वा। अथ य इच्छेत्पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन्वेदाननुब्रवीत सर्वमायुरियादिति ओदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयित वा। अथ य इच्छेद् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयित वा। अथ य इच्छेत्पुत्रो मे पण्डितो विजगीथः समितिङ्गमः शुश्रूषितां वाचं भाषिता जायेत सर्वान्वेदाननुब्रवीत। सर्वमायुरियादिति मांसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयित वै।"

यमः—

ऋतुस्नातान्तु यो भार्यां सन्निधौ नोपगच्छति।
घोरायां ब्रह्महत्यायां पच्यते नात्र संशयः॥
भार्यामृतुमुखे यस्तु सन्निधौ नोपगच्छति।
पितरस्तस्य तं मासं तस्मिन्रजसि शेरते॥

देवलः— स्वदारानृतुषु स्नातान् स्वस्थश्चेन्नोपगच्छति।
भ्रूणहत्यामवाप्नोति गर्भं प्राप्य विनाशकः॥

बौधायनः— ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति।
तुल्यमाहुस्तयोर्दोषमपोनौ यश्च सिञ्चति॥

देवलः— अशुद्धिदिवसेष्वेतां मैथुनार्थं यदि व्रजेत्।
आयुः प्रज्ञा च धर्मश्च तस्य पुंसः प्रहीयते।
तस्मात् त्रिरात्रं चाण्डालीं पुष्पितां परिवर्जयेत्॥

चाण्डालीं – चाण्डालीसदृशीं। विष्णुः

"नाष्टमीषु चतुर्दशीषु स्त्रियमुपेयान्न श्राद्धं भुक्त्वा, नामन्त्रितः श्राद्धे, न व्रती, न दीक्षितो, न देवायतने, न श्मशानशून्यालयेषु, न वृक्षमूलेषु, न दिवा, न सन्ध्ययो, र्न मिलितानां नाभ्यक्तां, न रोगार्त्तां, न हीनाङ्गीं, न वयोधिकाम्।" "नोपेयाद् गर्भिणीन्नारीन्दीर्घमायु र्जिजीविषुः॥ दत्त्वेत्यत्र श्राद्धमित्यनुषज्यते। दीक्षितो - दीक्षाख्यसंस्कारवान्। अवभृथं-यावन्नस्त्रियमुपेयात्। वयोधिका – उपरतरजस्का। गर्भिणीनिषेधस्तु स्त्रिया अकामत्वे, तस्याः सकामत्वे तु तद्गमनमप्यदुष्टम्। "अद्य श्वो वा विजनिष्यमाणाः स्त्रियः पतिभिः सह शयीरन्निति स्त्रीणामिन्द्रदत्तो वर" इति वशिष्ठवचनात्। विजनिष्यमाणाः –प्रसोष्यन्तः। वामनपुराणे—

बुधे च योषां न समाचरेत पूर्णासु योषित् परिवर्ज्जनीया। तथा— 'योषिन्मघामुत्तरकृत्तिकासु'। याज्ञवल्क्यः—

षोड़शर्त्तु निशाः स्त्रीणां तस्मिन् युग्मासु संविशेत्।
पर्वणि ब्रह्मचार्याद्याश्चतस्रस्तु विवर्ज्जयेत्॥

ब्रह्मचारी – अमैथुनी। वराहः – "न नखदन्तविक्षतानि कुर्यादृतुसमये पुरुषः स्त्रियाः कथञ्चित्।"

मनुः— यदा तु दक्षिणे पार्श्वे देहे वहति मारुतः।
तदा रात्रौ भजेत्कान्तां पर्वबर्ज्जं सकृद् बुधः॥

तथा— नोपगच्छेत्प्रमत्तोपि स्त्रियमार्त्तवदर्शने।
समाने शयने चैव न शयीत तया सह॥
रजसाभिप्लुतां नारीं नरस्याभ्युपगच्छतः।
प्रज्ञा तेजो यशश्चक्षुरायुश्चैव प्रहीयते॥

तां विवर्जयतस्तस्य रजसा समभिप्लुताम् ।
प्रज्ञा लक्ष्मीर्यशश्चक्षुरायुश्चैव प्रवर्द्धते ॥

तदयं संक्षपः—त्रिरात्रमशौचात् चतुर्थरात्रावल्पायुरपत्यशङ्कया पञ्चम्यादिषु विषमरात्रिषु स्त्रुत्पत्तिशङ्कया नाभिगमनम् ।

ततश्चौकादशी त्रयोदशी पर्वमघा-मूल-कृत्तिकोत्तरशून्यषष्ठरात्रादौ षोड़शरात्राभ्यन्तरे चन्द्र बुध गुरु शुक्रेषु बलवत्समुच्चयेषु च रागद्वेषविमनस्कत्वान्यमनस्कत्वहीनां प्रहृष्टां सकामां सुवसनामलङ्कृतां स्रग्गन्धान्वितां स्वयमपि तादृशः स्वपत्नीं रात्रौ प्रथमप्रहराभ्यन्तरे सकृदभिगच्छेदिति ।

॥ अथ प्रसङ्गाद्रजस्वलानिरूपणम् ॥

हारीतः -"रजःप्राप्ता चेदधः शयीत, न देवकार्यं कुर्यात् । भूमौ कार्ष्णायसे पाशौ मृण्मये वाश्नीयात् ।" अध इति-खट्वादि निवृत्तित्वम् । न देवकार्यमिति । अस्पृश्यत्वादेव तस्याः साक्षाद्देवकार्यकरणनिषेधे सिद्धे न देवकार्यं कुर्यादित्यभिधानं, तदर्थं पुष्पनैवेद्याद्यवेक्षणमपि न कुर्यादित्येतदर्थम् । कार्ष्णायसं लौहपात्रम् , एवं तैजसपात्रे रजस्वलाया भोजनं निषिद्धम् । मृण्मयादिपात्रविशेषविधिबलादिति द्रष्टव्यम् ।

शतपथश्रुतिस्तु—"अथ यस्य जायामार्त्तवं विन्देत्त्र्यहं कंसे न पिबेदहतवासा, नैनां वृषलो, न वृषल्युपहन्यादिति ।" कंसे कांस्ये न पिबेत्—नाचरेत् । अहतवासाः — रजोतिरिक्तमलशून्यवस्त्रा लोपहन्यादिति शूद्रो—जातीयो नैनां स्पृशेत् , त्र्यहमिति सर्वत्रान्वेति ।

वशिष्ठः—

"त्रिरात्रं रजस्वलाऽशुचिर्भवति । सा नाञ्ज्यान्नाप्सु स्नायादधः शयीत, न दिवा स्वप्यान्नाग्नीं स्पृशेन्न रज्जुं सृजेत् , न रज्जुं कुर्यादित्यर्थः ।

खर्वेण वामपाणिना लोहितायसेन ताम्रपात्रेण। पैठीनसिः— "त्रिरात्रं मलवद्वासो धारयमाणा न नायान्न नखान्निकृन्तेत, न प्रणीयान्नोपमार्ज्जयेत्। न रज्जुं सृजेन्न स्रजं धारयेन्न गन्धानुपसेवेत। न पर्णेन न पत्रेण न प्रपायिनी, न गोपीथेन, नोपमार्ज्जयेत्।" नखानित्यनुषज्यते। न प्रणीयान्न प्रणयनं कुर्यात्, न किञ्चिदुपहरेदित्यर्थः। न पर्णेन किञ्चित्पिबेदित्यर्थः। न प्रपायिनी न प्रकृष्टपायिनी, न ताम्रादिपात्रेण पिबेदित्यर्थः। न गोपीथेन—न गोमुखेन पशुवत्पिबेदित्यर्थः।

अत्र स्नानादौ यदनिष्टं तदाह तैत्तरीयश्रुतिः— 'या मलवद्वासा भवति, यस्ततोऽजायते सोऽभिशस्तो, यामरण्ये तस्यै स्तेनो, यां पराचीं तस्यै ह्रीतमुख्यप्रगल्भो, या स्नाति तस्या अप्सु मारुको, याऽभ्यक्ते तस्यै दुश्चर्या, या प्रलिखते तस्यै खलतिरपमारो, या अंक्ते तस्यै काणो, या दतो धावते तस्यै श्यावदन्, या नखानि निकृन्तते तस्यै कुनखो, या किलति तस्यै क्लीबो, या रज्जुं सृजति तस्याउद्बन्धुका, या पर्णेन पिबति तस्या उन्मादुको, वा खर्वेण पिबति तस्यै खवस्तिस्रो रात्रिं व्रतं चरेदञ्जलिना वापि वेव खर्वेण वा पात्रेण प्रजायै गोपीथायेति।" या मलवद्वासा इति हारीतेन तु यन्मलवद्वस्त्रधारणं विहितं तद्रजौरूपमलशालिविषयम्। श्रौतस्तु प्रतिषेधोऽयं सहजमलिनवस्त्रविषयोऽतो न विरोधः। यामरण्य इति। यामरण्येऽभिगच्छति तस्या यदपत्यं जायते तच्चौरस्वभावं भवति। चतुर्थी च सर्वत्र षष्ठ्यर्थे। यां पराचीमिति—यां पराङ्मुखीं ह्रीणतमां स्त्रीमभिगच्छति, तस्याः पुत्रो ह्रीतमुखो ह्रीणस्वभावः अप्रगल्भो भवतीत्यर्थः। या स्नाति तस्या अप्सु मारुकइति ऋतुत्र्यहाभ्यन्तरे या स्नानं करोति तस्याः पानीयमरणस्वभावमपत्यम्भवतीत्यर्थः। याऽभ्यक्ते तस्यै दुश्चर्या इति। या तदैव तैलाभ्यङ्गं करोति तस्याः पुत्रो छिन्नध्वजाग्रो जायत इति। या प्रलिखत इति, तदैव या प्रलिखनं करोति आलेखपादेः तस्याः पुत्रो खलतिरपमारो भवतीत्यर्थः। या अंक्ते तस्यै काण इति, तदैव या नेत्राञ्जनवती भवति, तस्या अपत्यं काणं भवतीत्यर्थः। या

दत्त इत्यादि कुनखीत्यन्तं स्पष्टम्। या किलति तस्यै क्लीब इति तदैव या दीनभावं भजते तस्या नपुंसकं भवतीत्यर्थ। या रज्जु सृजति तस्या उद्बन्धुकइति, उद्बन्धनशील इत्यर्थः। उन्मादकइति—उन्मादीत्यर्थः। अञ्जलिना पिबेदिति—सर्वथा पात्राभावे, सहजतोऽञ्जलिनिषेधात्। प्रजायौ इदं सर्वमपत्यं हिताय चरेत्॥

वशिष्ठः—

विज्ञायते होन्द्रस्त्रिशीर्षाणां त्वाष्ट्रं हत्वा पापमगृतमात्मानमन्यत्, तं सर्वाणि भूतान्यभ्याक्रोशन्त भ्रूणहन्निति सस्त्रिय उपाधावदस्यै मे भ्रूणहत्यायै तृतीयं प्रतिगृह्णीतेति। ता अब्रुवन् किन्नो भूयादिति, सोऽब्रवीद्वरं वृणीध्वमिति, ता अब्रुवन् ऋतौ प्रजां विन्दामह इति काममाजनतोः सम्भवामेति, तथेति- ताः प्रति जगृहुः। सैषा ब्रह्महत्या मासि मास्याविर्भवति। तस्माद्रजस्वलाया अन्नं नाश्नीयाद् भ्रूणहत्याया एवैषा रूपं प्रतिच्छास्ते। अञ्जनाभ्यञ्जने वाभ्या न प्रतिप्रतिग्राह्ये तद्धि तस्या अन्नमिति। तस्मात्तस्या अन्नं न बोभत्सन्ते। मैव मेघमुपागादिति।

उदक्याऽन्वासते येषां ये च केचिदनग्नयः।
कुलं चौराश्रितं येषां सर्वे ते शूद्रधर्मिणः॥

पापमगृहीत—पापवन्तम्। भ्रूणहत्यायै इति चतुर्थी षष्ठ्यर्थे। भ्रूणः—साङ्गवेदपारगः। साङ्गामधीत्य भ्रूणो भवतीति बौधायनवचनात्। काममाजनितोः सम्भवामेति-कामं—निश्चितम् आविजनितोः- प्रसवपर्यन्तम्। सम्भवाम—मिथुनोभवामेत्यर्थः। अविजनितोरिति—भावलक्षणमित्यादि, नाताऽमुन्प्रत्ययः। एवेति—एषा—रजस्वला। भ्रूणहत्याया आकारं प्रतिमुच्य—प्रच्छाद्य स्त्र्याकारेणास्ते। पर्यन्ततस्तु—ब्रह्महत्यैवेयमित्यर्थः। अञ्जनाभ्यञ्जने इति—अञ्जनमिह मैथुनं स्नेहवद्द्रव्यस्नक्षणसाम्यात्। अभ्यञ्जनमा-

लिङ्गनम्। अञ्जनमभि त य वृत्तौ:। न चैतामाश्लिषेदिति-गौतमवचने-नालिङ्गननिषेधावसायादिति। रजस्वलाया अन्नं नाश्नीयादिति। यत्पूर्व-मुक्तं तत्रान्नपदार्थमाह- तद्धि तस्या अन्नमिति-अञ्जनमभ्यञ्जनञ्च तस्या अन्नम्। एवञ्च तदीये तण्डुलादिरूपेऽन्ने प्रतिगृह्यमाणेदोषो नास्तीति आह— तस्मात्तस्या अन्नं न बीभत्सते। तदीयन्तण्डुलादि न बिगायन्तीत्यर्थः। यद्यञ्जनाभ्यञ्जनमात्रेऽनर्हा, तदा यज्ञादौ न तस्याः प्रवेशः स्यादत आह— मैवं मेधमुपागादिति। सा एवंविधा सति-मेध-यज्ञं मा उपागात्- नैव यायात्। उदक्यां वा सत इति, उपासन - परिचरणरूप कुरुते। शेष सुगमम्।

एव शास्त्रत ऋतौ दारगमनमनृतावपि पत्न्या अत्यौत्सुक्यपक्षे तत्रो-भयत्रापि दम्पत्योः शौचहेतुमाह शातातप —

ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम्।
अनृतौ तु सदाकार्यं शौचं मूत्रपुरीषवत्॥
द्वावेतावशुची स्यातां दम्पती शयनंगतौ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान्॥

अत्यन्तलेपे पुरीषवत्। अल्पलेपे मूत्रवत्। इति व्यवस्थितो विकल्पः। नारी शुचिरिति स्नानादिकं विनैव न तु मृज्जलक्षालनाचमनाभावेपि, तस्य मलसम्बन्धोपाधिप्रयुक्तस्य न्यायप्राप्तत्वेन मैथुनानन्तरमनिवार्यत्वात्। गौतमः—

"न मिथुनीभूय शौचं प्रति विलम्बेत"। तथा च मैथुनानन्तरमेव यथोक्तमृज्जलक्षालनाचमनानन्तरमृतौ पुंसो रजन्यामेव नैमित्तिकं स्नानमपि,

नैमित्तिकानि कर्माणि निपतन्ति यदा यदा।
तदा तदैव कार्याणि कालस्तु न विधीयते॥

इति दक्षवचनात्।

वृद्धास्तु—गौतमवचने शौचमलक्षालनमात्रं, ऋतुगमनस्नानन्तु कर्माधिकारापादकं, न तु चाण्डालादिस्पर्शवदृतुगमनादप्रायत्तं भवति। तथा च—तत्स्नान नैव रात्रौ, किन्तु प्रातरेवेत्याहुः। कृतसंभोगौ च तौ न तस्यां रात्रावेकशय्यायां शयीयाताम्। यदाह आपस्तम्बः— यावत्सन्निपातश्च सह शय्या, ततो नानासन्निपातोऽभिगमः। नाना भिन्नभिन्नेत्यर्थः।

इति श्री मन्महामहोपाध्याय सन्मिश्र वाचस्पति विरचित
आचारचिन्तामणिः सम्पूर्णः।।

❀ शुद्धिपत्रम् ❀

अशुद्धिः	शुद्धिः	पृष्ठे	पंक्तौ
आमीर	आभीर	१	३
पाण	पाणि	१	४
निवध्यते	विबद्धयते	१	८
तेपा	तेषा	२	३
चामुत्तमं	चानुत्तमं	२	८
चा धर्ममजनित	चाधर्मजनित	२	१२
लोकानू	लोकान्	२	१७
मनीपिणः	मनीषिणः	२	१७
पुण्य	पुण्य	२	१९
सोषान	सोपान	२	२०
भस्येत	भ्रश्येत	२	२१
षादौ	पादौ	३	७
मुत्र	मूत्र	३	११
बिण्मुत्रञ्च	विण्मूत्रञ्च	३	१५
गृह्यते	गृह्यात्	३	१७
धृत्वा	धृत्वा	३	१९
वेष्ट	वेष्ट	३	२१
पूबा	पूर्वा	४	८
व्ययस्था	व्यवस्था	४	१२
त्रिमुहूर्त्तात्गके	त्रिमुहूर्त्तात्मके	४	१२
ददङ्	उदङ्	४	१२
पूर्वाहणे	पूर्वाह्णे	४	१३
मध्याहणे उदङ्मूखः	मध्याह्ने उदङ्मुखः	४	१३
प्राङ्सुखः	प्राङ्मुखः	४	१३, १४
शुप्क	शुष्क	४	१४
क्रादयः	कादयः	४	१६
यथामुख	यथासुख	४	२३
सकृच्छ्रमिति	प्राणबाधाभयेषु च	४	२३

श्वश्रृगाल ··गुरुतल्पगः—(प्रक्षिप्तः पाठः), चतुर्थपृष्ठे प्रथमपंक्तितः सप्तमपृष्ठे १६ तमपंक्ति यावत्, सन्दर्भानन्वयात् ।

मपा	मपो	७	२२
कूष	कूप	८	९
स्मशाने	श्मशाने	८	१०
विशिष्य	विशिष्य	८	२०
जीप्य	जीव्य	९	२

गामग्नि	गामग्नि	९	१३
ञ्जां	प्रज्ञां	९	१९
धमॉदि	धर्मादि	९	२२
नैऋत्यां	नैर्ऋत्यां	१०	१
वहन्या	वहन्या	१०	५
नार्द	नार्द्र	१०	७
वास्तोयं	वास्तीयं	१०	८
विघायः	निघाय	१०	८
यिप्र	विप्र	१०	१०
मध्याह्न	मध्याह्न	१०	११
सायाह्न	सायाह्न	१०	११
सायाह्न	सायाह्ने	१०	१२
धृत	धृत	१०	१३
लोष्टेन	लोष्ठेन	१०	१६
च्छौं च	च्छौच	१०	२१
तन्त्रितः	तन्द्रितः	११	१, २
ऋष्य	ऋष्य	११	२
स्वविणिक्के	सुविणिक्के	११	१२, १३
पाद्यादौ	पादादौ	११	१३
शौचेन	शौचे न	११	१३
स्वप्न	सुप्न	१२	४
रह	इद	१२	६
ऋष्य	ऋष्य	१२	११
विष्णुं	विष्णुं	१५	१८
ब्राण	ब्राणं	१८	१२
स्पष्टे	स्पृष्टे	१९	११
मूंर्द्ध	मूर्द्ध	१९	१३
जानु रुपरुस्पृश्य	जानुरुपस्पृश्य	२०	१३
मुक्तवा	भुक्त्वा	२५	१७
पञ्चताखा	पञ्चखाता	२५	१९
म्लेक्ष	म्लेच्छ	२५	२०
स्पश्य	स्पृश्य	२९	३
व्यवहिता	व्यविहिता	३३	२२
शिश्रु	शिग्रु	३४	११
शिग्रुः	शिग्रुः	३४	१६
दरित्थ	दधित्थ	३४	२०

कामेश्वर सिंह दरभङ्गा संस्कृत विश्वविद्यालय
कामेश्वर नगर, दरभङ्गा

विक्रेतव्य पुस्तकें

क्र. सं०	ग्रन्थ का नाम	सम्पादक का नाम	मूल्य
१,	म०म० महेश ठाकुर संस्कृत ग्रन्थमाला		
	(क) न्यायरत्नाकर	सम्पादक म० म० उमेश मिश्र	७।
	(ख) कालिदास साहित्य	डॉ० आद्या प्रसाद मिश्र	५।
	(ग) कालिदासीयोपरूपकाणां समुच्चयः	म० म० उमेश मिश्र	५।
२.	विद्यापति संस्कृत ग्रन्थावली (प्रथमभाग)	सम्पादक डॉ० जयमन्तमिश्र	७५रु०
	(क) (विभागसार एवं शैवसर्वस्वसार)	डॉ. इन्द्रकान्त झा	
	(ख) द्वितीयभाग (शैवसर्वस्वसार प्रमाण भूतपुराणसंग्रह एवं दानवाक्यावली)	डॉ. जयमन्तमिश्र पं० आनन्द झा	,,
३.	मीमांसा श्लोकवार्तिक (हि० अनु०)	विद्यावाचस्पति दुर्गाधर झा	१५०।
४.	ध्वनिकल्लोलिनी	ले. अनु श्री आनन्द झा	३०।
५,	शशिनाथ निबन्धावली	स्व० शशिनाथ झा	३०।
६	समासशक्तिदीपिका	ले० महावैयाकरण दीनबन्धु झा	५।
७.	विज्ञानं समाजश्च	ले० डा० सरयू प्रसाद गुप्त	२५।
८.	मेघदूतम (जगद्धरीयरसदीपिनी व्याख्योपेत)	स० प० श्री हृषीकेश झा	१२।
९.	उपसृष्टधात्वर्थसंग्रह—	ले० दीनबन्धु झा स० डॉ० शशिनाथ झा	६।
१०.	गोकुलनाथ ग्रन्थावली		
	(क) रसमहार्णवः	सं० प० श्री धर्मनाथ झा प० श्री कुमुदनाथ मिश्र	६।
	(ख) प्रत्यक्षालोकमंगलविचारः तर्कतत्वञ्च	सं० प० श्री धर्मनाथ झा प० श्री कुमुदनाथ मिश्र	२०।
	(ग) मासमीमांसा	प० श्री धर्मनाथ झा	६।
	(घ) अनुमिति दीधिति विद्योतः	प० श्री धर्मनाथ झा प० श्री रामसेवक झा	७।
	(ङ) गोकुलनाथ ग्रन्थगुच्छः (दिक्कालनिरूपणम् रूढ़िव्याख्या- रहस्यम्, मिथ्यात्वनिरूपणम्)	प० श्री धर्मनाथ झा प० श्री रामसेवक झा	७।
	(च) रश्मिचक्रम्	,,	१५।

११. सुभाषितावली (सानुवाद)	प० श्री उपेन्द्र झा	१२।
१२. नियमावली एवं पाठ्य ग्रन्थावली	प्रकाशक का. सिं द. सं. वि० वि० दरभङ्गा	७।
१३. रघुवंश महाकाव्यम् (मूलमात्रम्)	सं०वि०वा० श्री रामचन्द्रमिश्र	४।
१४. हरविजयम् (प्रथम सर्ग) सटीक	सं० ,,	१।
१५. मेघदूतम् (मूलमात्रम्)	,, ,,	५० पै०
१६ मिथिला माहात्म्यम	सं०अनु०प० श्री धर्मनाथझा	५। रु०
१७. अभिनन्दनमाला	सं० प० श्री रामचन्द्र मिश्र	६। ,,
१८. छन्दोगानां विवाहपद्धतिः	सं० अनु० प० तेजनाथ झा	५। ,,
१९. मिथिला का इतिहास	ले० डॉ० रामप्रकाश शर्मा	७५। ,,
२०. स्मृति साहस्री	ले० रमाकर	१५। ,,
२१. लौकिकन्यायरत्नाकरः	सं० प० श्री रामचन्द्र मिश्र	४५। ,,
२२. म० म० वाचस्पतिग्रन्थावली	सं० प० श्री जयमन्त मिश्र	
(क) कृत्यप्रदीपः	श्री धर्मनाथ झा	२४। ,,
(ख) श्राद्धचिन्तामणिः	,, डॉ० रामचन्द्र झा	३०। ,,
२३. ग्रहणमाला—हेमाङ्गद ठक्कुर कृता	सं० प० श्री व्रजकिशोर झा	२०। ,,
२४. तिथिनिर्णयः-म० म० राजनाथ मिश्रः	सं० डॉ० रामचन्द्र झा	२०। ,,
२५ प्रयोगपल्लवः भवनाथकृतः	सं० डॉ० शशिनाथ झा	....
२६. परमलघुमञ्जूषा (म०म० शशिनाथझा कृत टीका सहिता)	,, ,,	....

विशेष-१ प्रकाशन की कीमत 'कुलसचिव' कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय कामेश्वर नगर दरभंगा के पदनाम से स्टेट बैंक आफ इण्डिया का बैंक ड्राफ्ट पहले ही प्रेषणीय है। आदेश के बाद प्रफोरमा देयक भेजा जायगा।

अथवा

आधी राशि अग्रिम भेजकर किसी बैंक के माध्यम से भी मगवाया जा सकता है।

२ प्रामाणिक थोक ग्राहक को २५% कमीशन दी जाती है।

प्राप्ति स्थान :—

प्रकाशन विभाग

कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय

कामेश्वर नगर, दरभंगा (बिहार)

११. सुभाषितावली (सानुवाद)	प० श्री उपेन्द्र झा	१२।
१२. नियमावली एवं पाठ्य ग्रन्थावली	प्रकाशक का. सि द. सं. वि० वि० दरभङ्गा	७।
१३. रघुवंश महाकाव्यम् (मूलमात्रम्)	सं०वि०वा० श्री रामचन्द्रमिश्र	४।
१४. हरविजयम् (प्रथम सर्ग) सटीक	सं० ,,	१।
१५. मेघदूतम् (मूलमात्रम्)	,, ,,	५० पै०
१६. मिथिला माहात्म्यम	सं०अनु०प० श्री धर्मनाथझा	५। रु०
१७. अभिनन्दनमाला	सं० प० श्री रामचन्द्र मिश्र	६। ,,
१८. छन्दोगानां विवाहपद्धतिः	सं० अनु० प० तेजनाथ झा	५। ,,
१९. मिथिला का इतिहास	ले० डॉ० रामप्रकाश शर्मा	७५। ,,
२०. स्मृति साहस्री	ले० रमाकर	१५। ,,
२१. लौकिकन्यायरत्नाकरः	सं० प० श्री रामचन्द्र मिश्र	४५। ,,
२२. म० म० वाचस्पतिग्रन्थावली	सं० प० श्री जयमन्त मिश्र	
(क) कृत्यप्रदीपः	श्री धर्मनाथ झा	२४। ,,
(ख) श्राद्धचिन्तामणिः	,, डॉ० रामचन्द्र झा	३०। ,,
२३. ग्रहणमाला—हेमाङ्गद ठक्कुर कृता	सं० प० श्री व्रजकिशोर झा	२०। ,,
२४. तिथिनिर्णयः-म० म० राजनाथ मिश्रः	सं० डॉ० रामचन्द्र झा	२०। ,,
२५ प्रयोगपल्लवः भवनाथकृतः	सं० डॉ० शशिनाथ झा	....
२६. परमलघुमञ्जूषा (म०म० शशिनाथझा कृत टीका सहिता)	,, ,,	....

विशेष-१ प्रकाशन की कीमत 'कुलसचिव' कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय कामेश्वर नगर दरभंगा के पदनाम से स्टेट बैंक आफ इण्डिया का बैंक ड्राफ्ट पहले ही प्रेषणीय है। आदेश के बाद प्रफोरमा देयक भेजा जायगा।

अथवा

आधी राशि अग्रिम भेजकर किसी बैंक के माध्यम से भी मगवाया जा सकता है।

२ प्रामाणिक थोक ग्राहक को २५% कमीशन दी जाती है।

प्राप्ति स्थान :—

प्रकाशन विभाग

कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय

कामेश्वर नगर, दरभंगा (बिहार)

GB
294.
ANO/
JACLOO